51) [ नखमांसभेदजननो दुर्मुखो ( द्विमुखो ) ऽर्थि–( ऽस्थि- ) खण्डनसमर्थः । तथापि खलु मध्यावलितो नमत खलो नखहरसदृक्षः ॥ ] खलं नमत । यतः कीदृक् । नखमांसभेदजनकः । द्वयोरपि प्रीत्या मिलितयोर्नखमांसयोरिव, भेदनं वियोजनं जनयतीति जनकः । दुर्मुखः । ( ? द्विमुखः ? ) पश्चादन्यत पुरश्चान्यद्वादी । अस्तिखण्डनसमर्थः । परस्य अस्तिर्द्रव्यादिसमूहः, तत्खण्डने समर्थः । तथापि खलु मज्झावलिओ

---

1 Laber सूलाहिन्नु ( = शूलाभिन्नः or शूलभिन्नः ).

For Private And Personal Use Only

52) अकुलीणो दोमुहओ ता महुरो भोयणं मुहे जाव।
मुरउ व्व खलो जिण्णम्मि भोयणे विरसमारसइ ॥ ४ ॥

53) निद्धम्मो गुणरहिओ ठाणविमुक्को य लोहसंभूओ।
विंधइ जणस्स हिययं पिसुणो बाणु व्व लग्गंतो ॥ ५ ॥

54) जम्मे वि जं न हूयं न हु होसइ जं च जम्मलक्खे वि।
तं जंपंति तह च्चिय पिसुणा जह होइ सारिच्छं ॥ ६ ॥

मध्यावलिरश्चित्तवक्रः। अत एव नहरणसरिच्छो नखरूसदृक्षः। सोऽपि नखमांसयोर्भेदनं छेदनं तज्जनकः। दुर्मुखकः ( ? द्विमुखकः ? )। अस्ति- ( ? अस्थि– ) खण्डनसमर्थः। तथापि खलु मध्यावस्थितो मध्ये वक्रीकृतः ॥५१॥

52) [ अकुलीनो द्विमुखस्तावन्मधुरो भोजनं मुखे यावत्। मुरज इव खलो जीर्णे भोजने विरसमारसति ॥ ] खलो मुरज इव मर्दल इव भवति। [illegible]मित्याह। अकुलीनो आरजातः। द्विमुखो द्विजिह्वः। तावन्मधुरो भोजनं मुखे यावत्। यावदेव भोजनादि दीयते तावन्मधुरो हृष्टः। जीर्णे भोजने विरसमारसति कर्णकटुभाषी। मर्दलोऽप्येवंविधः। अकुलीनोऽस्पृष्टभूमिः। यतोऽङ्के धृत्वा वाद्यते। "मृदङ्गो मुरजो भेदास्त्वङ्क्याऽऽलिङ्ग्योर्ध्वगास्त्रयः" इत्यमरसिंहः ॥ ५२ ॥

53) [ निर्धर्मो गुणरहितः स्थानविमुक्तश्च लोभ–( लोह– ) संभूतः। विध्यति जनस्य हृदयं पिशुनो बाण इव लगन् ॥ ] पिशुनो बाण इव लगन् जनस्य हृदयं विध्यति। उभयोः श्लेषमाह। निर्धर्मः पापी। पक्षे धर्मशब्देन धनुर्लभ्यते। धनुर्मुक्तः। तथा गुणाः सत्त्वसौजन्यादयस्तै रहितः। त्यक्तप्रत्यञ्चश्च। ठाणविमुक्को स्थानविमुक्तः। पक्षे स्थानानि आलीढवैशाखप्रत्यालीढादीनि तैर्विमुक्तश्च। लोभसंभूतः। लोहसंभूतश्चेति ॥ ५३ ॥

54) [ जन्मन्यपि यन्न भूतं न खलु भविष्यति यच्च जन्मलक्षेऽपि। तज्जल्पन्ति तथैव पिशुना यथा भवति सदृक्षम् ॥ ] पिशुना जन्मन्यपि यन्न भूतं, न खलु भविष्यति यज्जन्मलक्षेऽपि, तज्जल्पन्ति तथैव यथा भवति सदृक्षम्। अयमत्र भावः। यत् कदाचित् कचिन्न[1] संघटते, तद् घटमानमिव साक्षाज्जल्पन्ति ॥ ५४ ॥

1 J क्वचिन्न भवति न संघटते।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



55) गुणिणो गुणेहि विहवेहि विहविणो होंतु गव्विया नाम।
दोसेहि नवरि गव्वो खलाण मग्गो च्चिय अउव्वो ॥ ७ ॥

56) संतं न देंति वारेंति देंतयं दिन्नयं पि हारेंति।
अणिमित्तवइरियाणं खलाण मग्गो च्चिय अउव्वो ॥ ८ ॥

57) परविवरलद्धलक्खे चित्तलए भीसणे जमलजीहे।
वंकपरिसक्किरे गोणसे व्व पिसुणे सुहं कत्तो ॥ ९ ॥

58) असमत्थमंततंताण कुलविमुक्काण भोयहीणाणं।
दिट्ठाण को न बीहइ वितरसप्पाण व खलाणं ॥ १० ॥

55) [ गुणिनो गुणैर्विभवैर्विभविनो भवन्तु गर्विता नाम। दोषैः केवलं गर्वः खलानां मार्ग एवापूर्वः ॥ ] खलानां मार्ग एवापूर्वः। कथं ज्ञायते। गुणिनो गुणैर्गर्विता भवन्तु, विभविनो विभवैर्गर्विता नाम। केवलं दोषैर्गर्वः खलानाम्, अत एवापूर्वो मार्गः। अत्र[1] गुणवन्तोऽपि विभविनोऽपि गर्वं न विदधते गुणविभवैः। तत्र दोषैः खला गर्वं कुर्वत इत्याश्चर्यम् ॥ ५५ ॥

56) [ सन्न ददति वारयन्ति ददतं दत्तमपि हारयन्ति। अनिमित्तवैरिणां खलानां मार्ग एवापूर्वः ॥ ] सदपि विद्यमानं न ददति। वारयन्ति ददतं पुरुषम्। दत्तमन्येनापि हारयन्ति, आच्छिद्य ग्राहयन्ति। अनिमित्तवैरिणां खलानां मार्गोऽपूर्वः ॥ ५६ ॥

57) [ परविवरलब्धलक्ष्ये चलचित्ते (चित्रले) भीषणे यमलजिह्वे। वक्रगमनशीले गोनस इव पिशुने सुखं कुतः ॥ ] पिशुने सुखं कुतो भवति। गोनसे सर्प इव। उभयोः श्लेषमाह। किंविशिष्टे। परस्य विवरं छिद्रं तत्र लब्धलक्ष्ये। पक्षे परविवरम् अन्येन मूषकादिना कृतं विवरम्। चित्तलए नानाचित्ते, आश्चर्ययुक्ते। पक्षे चित्रले। भीषणे। युगलजिह्वे। वंकपरिसक्किरे। सक्क गत्यर्थः। वक्रगमनशीले ॥ ५७ ॥

58) [ असमर्थमन्त्रतन्त्रेभ्यः कुलविमुक्तेभ्यो भोगहीनेभ्यः। दृष्टेभ्यः को न बिभेति व्यन्तरसर्पेभ्य इव खलेभ्यः। ] दृष्टेभ्यः खलेभ्यः को न

1 ] यत्र.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



59) एयं चिय बहुलाहो जीविज्जइ जं खलाण मज्झम्मि।
लाहो जं न डसिज्जइ भुयंगपरिवेढिए चलणे ॥ ११ ॥

60) न सहइ अब्भत्थणियं असइ गयाणं पि पिट्ठिमंसाइं।
दट्ठूण भासुरमुहं खलसीहं को न बीहेइ ॥ १२ ॥

61) मा वच्चह वीसंभं पमुहे बहुकूडकवडभरियाणं।
निव्वत्तियकज्जपरंमुहाण सुणयाण व खलाणं ॥ १३ ॥

बिभेति। व्यन्तरस्पर्शेभ्य इव। किंविशिष्टेभ्य उभयेभ्यः। असमत्थमंततंताण। असमर्थानि मन्त्रतन्त्राणि येषु तेऽसमर्थमन्त्रतन्त्रास्तेभ्यः। कुलविमुक्काण कुलविमुक्तेभ्योऽकुलीनेभ्यः। पक्षे, अष्टौ नागानां कुलानि, तद्व्यतिरिक्तेभ्यः। भोगहीणाण। भोगहीनेभ्यः, पक्षे निःफणेभ्यः ॥ ५८ ॥

59) [ एतदेव बहुलाभो जीव्यते यत् खलानां मध्ये। लाभो यन्न दश्यते भुजङ्गपरिवेष्टिते चरणे ॥ ] एतावदेव (? एतदेव ?) बहुलाभः खलानां मध्ये निवसद्भिर्यज्जीव्यते। अमुमर्थमर्थान्तरद्वारेण द्रढयति। लाभो यन्न दश्यते पुमान् भुजङ्गपरिवेष्टिते चरणे ॥ ५९ ॥

60) [ न सहतेऽभ्यर्थनाम् (न सहतेऽभ्रस्तनितम्) अश्नाति गतानामपि (गजानामपि) पृष्ठमांसानि। दृष्ट्वा भासुरमुखं खलसिंहं को न बिभेति ॥ ] खल एव सिंहस्तं दृष्ट्वा को न बिभेति। सिंहसाधर्म्यमाह। खलो न सहतेऽभ्यर्थनकं, सिंहश्च न सहतेऽभ्रस्तनितं मेघगर्जितम्। अश्नाति गतानामपि पृष्ठमांसानि। गतेष्वन्यत्र पुंसु दुर्वचनं वक्ति। पक्षे, गजानामपि पृष्ठमांसान्यश्नाति भक्षयति। किंविशिष्टं खलसिंहम्। भासुरमुखं भीषणाननम् ॥ ६० ॥

61) [ मा व्रजत विश्रम्भं प्रमुखे बहुकूटकपटभृतानाम्। निर्वर्तितकार्यपराङ्मुखानां शुनकानामिव खलानाम् ॥ ] मा व्रजत विश्वासं शुनकानामिव खलानां प्रमुखे बहुकूटकपटभृतानां[1] निर्वर्तितकार्यपराङ्मुखानाम्। शुनकपक्षे, निर्वर्तितं कार्यं सुरतं तत्र पराङ्मुखानाम्। स्वभाव एव तेषां, कृतसुरता योनिस्थितमेहना अपि पराङ्मुखा भवन्ति ॥ ६१ ॥

1 J बहुभिः कूटकपटैर्भृतानाम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



62) जेहिं चिय उब्भविया जाण पसाएण निग्गयपयावा।
समरा डहंति विंझं खलाण मग्गो च्चिय अउव्वो ॥ १४ ॥

63) सरसा वि दुमा दावाणलेण डज्झंति सुक्खसंवलिया।
दुज्जणसंगे पत्ते सुयणो वि सुहं न पावेइ ॥ १५ ॥

64) खलसज्जणाण दोसा गुणा य को वण्णिउं तरइ लोए।
जइ नवरि नायराओ दोहिं जीहासहस्सेहिं ॥ १६ ॥

## ६. मित्तवज्जा [ मित्रपद्धतिः ]

65) एक्कं चिय सलहिज्जइ दिणेसदियहाण नवरि निव्वहणं।
आजम्म एक्कमेक्केहि जेहि विरहो च्चिय न दिट्ठो ॥ १ ॥

62) [ यैरेवोर्ध्वीकृता येषां प्रसादेन निर्गतप्रतापाः। शबरा दहन्ति विन्ध्यं खलानां मार्ग एवापूर्वः ॥ ] यैरेवोर्ध्वीकृता, येषां प्रसादेन निर्गतप्रतापाः। य एवंविधास्ते शबरा दहन्ति विन्ध्यं पर्वतम्। खलानां मार्गोऽपूर्वः ॥ ६२ ॥

63) [ सरसा अपि द्रुमा दावानलेन दह्यन्ते शुष्कसंवलिताः। दुर्जनसंगे प्राप्ते सुजनोऽपि सुखं न प्राप्नोति ॥ ] सरसा आर्द्रा अपि द्रुमाः शुष्केण द्रुमेण संवलिताः संयुक्ताः सन्तो दह्यन्ते। दुर्जनसंगे प्राप्ते सुजनोऽपि सुखं न प्राप्नोति। अत्र सुजन आर्द्रवृक्षसदृशः। दुर्जनः शुष्कतुल्यः ॥ ६३ ॥

64) [ खलसुजनयोर्दोषान् गुणांश्च को वर्णयितुं शक्नोति लोके। यदि केवलं नागराजो द्वाभ्यां जिह्वासहस्राभ्याम् ] खलसज्जनयोर्दोषान् गुणांश्च को वर्णयितुं तरइ समर्थो भवति लोके। केवलं यदि नागराजो जिह्वासहस्राभ्यां द्वाभ्याम् ॥ ६४ ॥

65) [ एकमेव श्लाघ्यते दिनेशदिवसयोः केवलं निर्वहणम्। आजन्मैकैकाभ्यां याभ्यां विरह एव न दृष्टः ] एकमेव श्लाघ्यते दिनेशदिवसयोर्निर्वहणम्। आजन्म एकैकाभ्यां यकाभ्यां विनिर्दिष्टः स्नेह इति। परस्परं विना न भवति ॥ ६५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



66) पडिवन्नं दिणयरवासराण दोण्हं अखंडियं सुहइ।
सूरो न दिणेण विणा दिणो वि न हु सूरविरहम्मि ॥ २ ॥

67) मित्तं पयतोयसमं सारिच्छं जं न होइ किं तेण।
अहियाएइ मिलंतं आवइ आवट्टए पढमं ॥ ३ ॥

68) तं मित्तं कायव्वं जं किर वसणम्मि देसकालम्मि।
आलिहियभित्तिबाउल्लयं व न परंमुहं ठाइ ॥ ४ ॥

69) तं मित्तं कायव्वं जं मित्तं कालकंबलीसरिसं।
उयएण धोयमाणं सहावरंगं न मेल्लेइ ॥ ५ ॥

66) [ प्रतिपन्नं दिनकरवासरयोर्द्वयोरखण्डितं शोभते। सूर्यो न दिनेन विना दिनमपि न खलु सूर्यविरहे ॥ ] द्वयोर्दिनकरवासरयोरखण्डितं प्रतिपन्नं शोभते। तदेव दर्शयति। सूर्यो न दिनेन विना दिनमपि सूर्येण विना न भवति। पूर्वोऽप्यर्थोऽनेन गाथान्तरेणोद्वेल्लितः ॥ ६६ ॥

67) [ मैत्रं पयस्तोयसमं सदृक्षं यन्न भवति किं तेन। अधिकायते मिलदापद्यावर्तते प्रथमम् ॥ मित्रं (? मैत्रम् ?) पयस्तोयसमम्। सादृश्यं (? सदृशम् ?) यन्न भवति किं तेन। अधिकायते मिलदेकीभवद्। आवर्ते प्रथमम् आयाति तोयम् ॥ ६७ ॥

68) [ तन्मित्रं कर्तव्यं यत् किल व्यसने देशकाले। आलिखित-भित्तिपुत्रक इव न पराङ्मुखं तिष्ठति ॥ ] तन्मित्रं कर्तव्यं यत्। किर इति किलार्थे। व्यसने देशकाले च। आलिखितं भित्तौ बाउलयं चित्र-लिखितपुत्रक इव न पराङ्मुखं तिष्ठति। यादृग्विधो लिखितश्चित्रपुरुषः संमुखस्तद्वद्यो दुःखकाले संमुखं (? पराङ्मुखः ?) न भवति, पृष्ठं न प्रयच्छति ॥ ६८ ॥

69) [ तन्मित्रं कर्तव्यं यन्मित्रं कालकम्बलीसदृशम्। उदकेन धाव्यमानं स्वभावरङ्गं न मुञ्चति। ] तन्मित्रं कर्तव्यं यन्मित्रं कालकम्बली-सदृशम्। उदकेन धाव्यमानं स्वभावरङ्गं न मुञ्चति। यथा कृष्णः कम्बलः शतशः पानीयेन धौतः कृष्ण एव तथा यन्मित्रमापद्ग्रस्तमपि स्वभावं न मुञ्चति ॥ ६९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



70) सगुणाण निग्गुणाण य गरुया पालंति जं जि पडिवन्नं।
पेच्छह वसहेण समं हरेण वोलाविओ अप्पा ॥ ६ ॥

71) छिज्जउ सीसं अह होउ बंधणं चयउ सव्वहा लच्छी।
पडिवन्नपालणे सुपुरिसाण जं होइ तं होउ ॥ ७ ॥

72) दिढलोहसंकलाणं अन्नाण वि विविहपासबंधाणं।
ताणं चिय अहिययरं वायाबंधं कुलीणस्स ॥ ८ ॥

## ७. नेहवज्जा [ स्नेहपद्धतिः ]

73) चंदो धवलिज्जइ पुण्णिमाइ अह पुण्णिमा वि चंदेण।
समसुहदुक्खाइ मणे पुण्णेण विणा न लब्भंति ॥ १ ॥

---

70) [ सगुणानां निर्गुणानां च गुरवः पालयन्ति यदेव प्रतिपन्नम्। प्रेक्षध्वं वृषभेण समं हरेणातिक्रामित आत्मा ॥ ] सगुणानां निर्गुणानां च गुरुका महान्तः प्रतिपन्नं यत् तत् प्रतिपालयन्ति, नेतरे क्षुद्राः। अत्र दृष्टान्तमाह। प्रेक्षध्वं वृषभेण समं सह हरेण आत्मा अतिक्रामितः। यथा हरः सप्तभुवनाधिपतिर्हस्त्यश्वादि परिहृत्य आगतं वृषभमङ्गीचकार तथा निर्गुणं सगुणमपि पुरुषं महान् प्रतिपद्यत इति ॥ ७० ॥

71) [ छिद्यतां शीर्षमथ भवतु बन्धनं त्यजतु सर्वथा लक्ष्मीः। प्रतिपन्नपालने सुपुरुषाणां यद्भवति तद्भवतु ॥ ] छिद्यतां शीर्षं मस्तकम्। अथवा भवतु बन्धनम्। त्यजतु सर्वथा लक्ष्मीः। प्रतिपन्नपालने सत्पुरुषाणां यद्भवति तद्भवतु। यद्यपि पूर्वोक्तम् अहमहमिकयोल्लसति तथापि प्रतिपन्नं कुर्वत एव महान्तः ॥ ७१ ॥

72) [ दृढलोहशृङ्खलाभ्योऽन्येभ्योऽपि विविधपाशबन्धेभ्यः। तेभ्य एवाधिकतरं वाग्बन्धनं कुलीनस्य ॥ ]

73) [ चन्द्रो धवलीक्रियते पूर्णिमयाथ पूर्णिमापि चन्द्रेण। समसुखदुःखानि मन्ये पुण्येन विना न लभ्यन्ते ॥ ] चन्द्रो धवलीक्रियते पूर्णिमया अथ पूर्णिमापि चन्द्रेण। मणे इति अहं मन्ये। समसुख-दुःखाः पुण्येन विना न लभ्यन्ते। अमुमेवार्थमर्थान्तरेण प्रकटयति ॥७३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



74) पक्काइ नवरि नेहो पयासिओ तिहुयणम्मि जोण्हाए।
जा झिज्जइ झीणे ससहरम्मि वड्ढेइ वड्ढंते ॥ २ ॥

75) झिज्जइ झीणम्मि सया वड्ढइ वड्ढंतयम्मि सविसेसं।
सायरससीण छज्जइ जयम्मि पडिवन्ननिव्वहणं ॥ ३ ॥

76) पडिवन्नं जेण समं पुव्वणिओएण होइ जीवस्स।
दूरट्ठिओ न दूरे जह चंदो कुमुयसंडाणं ॥ ४ ॥

77) दूरट्ठिया न दूरे सज्जणचित्ताण पुव्वमिलियाणं।
गयणट्ठिओ वि चंदो आसासइ कुमुयसंडाइं ॥ ५ ॥

78) दिट्ठे वि हु होइ सुहं जइ वि न पावंति अंगसंगाइं।
दूरट्ठिओ वि चंदो सुणिव्वुइं कुणइ कुमुयाणं ॥ ६ ॥

74) [ एकया केवलं स्नेहः प्रकाशितस्त्रिभुवने ज्योत्स्नया। या क्षीयते क्षीणे शशधरे वर्धते वर्धमाने ॥ ] एकया एव ज्योत्स्नया त्रिभुवने स्नेहः प्रकाशितः। या शशधरे खिन्ने खिद्यते (? क्षीणे क्षीयते), वर्धमाने वर्धते ॥ ७४ ॥

75) [ क्षीयते क्षीणे सदा वर्धते वर्धमाने सविशेषम्। सागरशशिनो राजते जगति प्रतिपन्ननिर्वहणम् ॥ ] सागरशशिनोर्जगति प्रतिपन्ननिर्वहणं शोभते। योग्यतां भजते। कथम्। यत् सागरस्तस्मिन् क्षीणे क्षीयते, सदा सर्वदा वर्धमाने स्फीतीभवति, स्फायते ॥ ७५ ॥

76) [ प्रतिपन्नं येन समं पूर्वनियोगेन भवति जीवस्य। दूरस्थितो न दूरे यथा चन्द्रः कुमुदषण्डानाम् ॥ ] जीवस्य पूर्वनियोगेन पूर्वकृतकर्मणा येन समं प्रतिपन्नं भवति, स दूरस्थितोऽपि न दूरे। अत्र दृष्टान्तः। यथा चन्द्रः कुमुदखण्डानां कैरवाणां दूरस्थितोऽपि न दूरे भवति ॥७६॥

77) दूरस्थिता न दूरे सज्जनचित्तानां पूर्वमिलितानाम्। गगनस्थितोऽपि चन्द्र आश्वासयति कुमुदषण्डानि ॥ ] पूर्वमिलितानां सज्जनचित्तानां दूरस्थिता न दूरं भवन्ति। दृष्टान्तमाह। गगनस्थितोऽपि चन्द्रः कुमुदखण्डान्याशास्ते विकाशयतीति यावत् ॥ ७७ ॥

78) [ दृष्टेऽपि खलु भवति सुखं यद्यपि न प्राप्नुवन्त्यङ्गसंगान्। दूरस्थितोऽपि चन्द्रः सुनिर्वृतिं करोति कुमुदानाम् ॥ ] दृष्टेऽपि सुखं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



79) एमेव कह वि कस्स वि केण वि दिट्ठेण होइ परिओसो।
कमलायराण रइणा किं कज्जं जेण वियसंति ॥ ७ ॥

80) कत्तो उग्गमइ रई कत्तो वियसंति पंकयवणाई।
सुयणाण जए नेहो न चलइ दूरट्ठियाणं पि ॥ ८ ॥

८. नीइवज्जा [ नीतिपद्धतिः ]

81) जं जस्स मम्मभेयं चालिज्जंतं च दूमए हिययं।
तं तस्स कण्णकडुयं कुलेसु जाया न जपंति ॥ १ ॥

8.) संतेहि असंतेहि य परस्स किं जंपिएहि दोसेहिं।
अत्थो जसो न लब्भइ सो वि अमित्तो कओ होइ ॥ २ ॥

भवति यद्यपि अङ्गसंगं न प्राप्नोति। दूरस्थितोऽपि चन्द्रः कुमुदानां सुष्ठु निर्वृतिं सुखं, तात्त्विकतया विकाशं, करोति ॥ ७८ ॥

79) [ एवमेव कथमपि कस्यापि केनापि दृष्टेन भवति परितोषः। कमलाकराणां रविणा किं कार्यं येन विकसन्ति ॥ ] एवमेव मुधैव कथमपि कस्यापि केनापि दृष्टेन परितोषो भवति। कथं ज्ञायत इत्याह। कमलाकराणां पद्मखण्डानां रविणा सूर्येण किं कार्यं येन हेतुना ते विकसन्ति ॥ ७९ ॥

80) [ कुत उद्गच्छति रविः कुतो विकसन्ति पङ्कजवनानि। सुजनानां जगति स्नेहो न चलति दूरस्थितानामपि ॥ ] कुतः क्वोद्गच्छति रविः कुतश्च विकसन्ति पङ्कजवनानि। सुजनानां यत्र स्नेहो दूरस्थितानामपि न चलति ॥ ८० ॥

81) [ यद्यस्य मर्मभेदम् उच्यमानं च दूनयति हृदयम्। तत्तस्य कर्णकटुकं कुलेषु जाता न जल्पन्ति ॥ ] यद्यस्य मर्मभेदं चाल्यमानम् उच्यमानं दूयते हृदयम्। तत्तस्य कर्णकटुकं कुलेषु जाताः कुलजा न जल्पन्ति ॥ ८१ ॥

82) [ सद्भिरसद्भिश्च परस्य किं जल्पितैर्दोषैः। अर्थो यशो न लभ्यते स चामित्रः कृतो भवति ॥ ] परस्य सद्भिरसद्भिरपि जल्पितैर्दोषैः किं प्रयोजनं, न किमपि। अर्थो यशो न लभ्यते, स चामित्रीकृतो भवति, शत्रुः कृतो भवतीत्यर्थः ॥ ८२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



83) अप्पहियं कायव्वं जइ सक्कइ परहियं च कायव्वं ।
अप्पहियपरहियाणं अप्पहियं चेव कायव्वं ॥ ३ ॥

84) पुरिसे सच्चसमिद्धे अलियपमुक्के सहावसंतुट्ठे ।
तवधम्मणियममइए विसमा वि दसा समा होइ ॥ ४ ॥

85) सीलं वरं कुलाओ दालिद्दं भव्वयं च रोगाओ ।
विज्जा रज्जाउ वरं खमा वरं सुट्ठु वि तवाओ ॥ ५ ॥

86) सीलं वरं कुलाओ कुलेण किं होइ विगयसीलेण ।
कमलाइ कद्दमे संभवंति न हु हुंति मलिणाइं ॥ ६ ॥

83) [ आत्महितं कर्तव्यं यदि शक्यते परहितं च कर्तव्यम् । आत्महितपरहितयोरात्महितं चैव कर्तव्यम् ॥ ] आत्महितं कर्तव्यं, यदि शक्यते कर्तुं तदा परहितं च कर्तव्यम् । आत्महितपरहितयोर्मध्ये आत्महितं कर्तव्यम् इयमेव नीतिः ॥ ८३ ॥

84) [ पुरुषे सत्यसमृद्धेऽलीकप्रमुक्ते स्वभावसंतुष्टे । तपोधर्मनियममये विषमापि दशा समा भवति ॥ ] एते गुणाः पुरुषे वर्तमानं दशा-वैषम्यं नाशयन्तीति भावः ॥ ८४ ॥

85) [ शीलं वरं कुलात् दारिद्र्यं भव्यं च रोगात् । विद्या राज्याद्वरं क्षमा वरं सुष्ठ्वपि तपसः ॥ ] कुलाच्छीलं वरम् । रोगाद् दारिद्र्यं वरम्, अल्पव्ययं नीरोगत्वम् । वरं राज्याद्विद्या । सुष्ठ्वपि तपसः क्षमा वरम् । अकुलोऽपि यदि शीलवान्, दरिद्रोऽपि नीरोगो, भ्रष्टराज्यादपि ( ? भ्रष्ट-राज्योऽपि ? ) विद्यावान्, प्रतप्ततपसोऽपि ( प्रतप्ततपस्कोऽपि ? ) क्षमावान् पुरुषः श्रेष्ठ इति भावः ॥ ८५ ॥

86) [ शीलं वरं कुलात् कुलेन किं भवति विगतशीलेन । कमलानि कर्दमे संभवन्ति न खलु भवन्ति मलिनानि ॥ ] पूर्वोक्तानां पदार्थानामाद्यं दृष्टान्तयति । शीलं वरं कुलात् । कुलेन किं भवति विगत-शीलेन । यतः । कमलानि कर्दमे संभवन्ति, न खलु भवन्ति मलिनानि । अतः शीलं कारणं न तु वंशः ॥ ८६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



87) जं जि खमेइ समत्थो धणवंतो जं न गव्वमुव्वहइ।
जं च सविज्जो नमिरो तिसु तेसु अलंकिया पुहवी ॥ ७ ॥

88) छंदं जो अणुवट्टइ मम्मं रक्खइ गुणे पयासेइ।
सो नवरि माणुसाणं देवाण वि वल्लहो होइ ॥ ८ ॥

89) छणवंचणेण वरिसो नासइ दिवसो कुभोयणे भुत्ते।
कुकलत्तेण य जम्मो नासइ धम्मो अहम्मेण ॥ ९ ॥

90) छन्नं धम्मं पयडं च पोरिसं परकलत्तवंचणयं।
गंजणरहिओ जम्मो राढाइत्ताण संपडइ ॥ १० ॥

87) [ यत् खलु क्षमते समर्थो धनवान् यन्न गर्वमुद्वहति। यच्च सविद्यो नम्रस्त्रिभिस्तैरलङ्कृता पृथ्वी ॥ ] त्रिभिरेवालङ्कृता पृथ्वी। कैः कैरित्याह। यत् क्षाम्यति समर्थः। धनवांश्च यद्गर्वं नोद्वहति। यच्च सविद्यो नमिरो नम्रः ॥ ८७ ॥

88) [ छन्दं योऽनुवर्तते मर्म रक्षति गुणान् प्रकाशयति। स न केवलं मानुषाणां देवानामपि वल्लभो भवति ॥] छन्दं योऽनुवर्तते। कोऽर्थः। स्वामिनं प्रति। स्वामी कथयति दक्षिणामपि पूर्वां दिशं यदा, तदा यः सेवकः स वक्ति " इयं पूर्वैव दिग् न दक्षिणा "। तथा वटो वटोऽयं न भवति, किंतु पिप्पल इति, तत्र पिप्पल एवेति वक्ति। इदं छन्दानुवर्तनम्। मर्म रक्षति, गुणान् प्रकाशयति। स न केवलं मनुष्याणां, देवानां वल्लभो भवतीत्यर्थः ॥ ८८ ॥

89) [ क्षणवञ्चनेन वर्षो नश्यति दिवसः कुभोजने भुक्ते। कुकलत्रेण च जन्म नश्यति धर्मोऽधर्मेण ॥ ] क्षण उत्सवो दीपोत्सवादिः। तस्य वञ्चनेनाकरणेन वर्षो नश्यति। दिवसः कुभोजने भुक्ते। जन्म कुकलत्रेण, अधर्मेण धर्मोऽपि नश्यति ॥ ८९ ॥

90) [ छन्नो धर्मः प्रकटं च पौरुषं परकलत्रवञ्चनम्। कलङ्करहितं जन्म भव्यात्मनां संपद्यते ॥ ] धर्मश्छन्नोऽप्रकटः। प्रकटं च पौरुषम्। परकलत्रवञ्चनम्। कलङ्करहितं जन्म। राढाइत्ताण भव्यात्मनां भाग्यवतामिति यावत्। भवति संपद्यते ॥ ९० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ९. धीरवज्जा [ धीरपद्धतिः ]

91) अप्पाणं अमुयंता जे आरंभंति दुग्गमं कज्जं।
परमुहपलोइयाणं ताणं कह होइ जयलच्छी॥ १॥

92) सिग्घं आरुह कज्जं पारद्धं मा कहं पि सिढिलेसु।
पारद्धसिढिलियाइं कज्जाइ पुणो न सिज्झंति॥ २॥

93) अच्छउ ता इयरजणो अंगे च्चिय जाइ पंच भूयाइं।
ताहं च्चिय लज्जिज्जइ पारद्धं परिहरंतेण॥ ३॥

94) खीणविहवो वि सुयणो सेवइ रन्नं न पत्थए अन्नं।
मरणे वि अइमहग्घं न विक्किणइ माणमाणिक्कं॥ ४॥

95) दो मग्गा भुवणयले माणिणि माणुन्नयाण पुरिसाणं।
अहवा पावंति सिरिं अहव भमंता समप्पंति॥ ५॥

91) [ आत्मानममुञ्चन्तो य आरभन्ते दुर्गमं कार्यम्। परमुखावलोकिनां तेषां कथं भवति जयलक्ष्मीः॥ ] आत्मानममुञ्चन्तो य आरभन्ते दुर्गमं कार्यं परमुखावलोकिनां तेषां कथं जयलक्ष्मीर्भवति॥ ९१॥

92) [ शीघ्रमारोह कार्यं प्रारब्धं मा कथमपि शिथिलय। प्रारब्धशिथिलितानि कार्याणि पुनर्न सिध्यन्ति॥ ] शीघ्रमारभस्व कार्यं, प्रारब्धं मा कथमपि शिथिलय। प्रारब्धशिथिलितानि कार्याणि पुनर्न सिध्यन्ति॥९२॥

93) [ आस्तां तावदितरजनोऽङ्ग एव यानि पञ्च भूतानि। तेभ्य एव लज्यते प्रारब्धं परिहरता॥ ] आस्तां तावदितरजनः। अङ्गस्थितानि यानि पञ्च भूतानि पृथिव्यप्तेजोवाय्वाकाशास्तेभ्य एव लज्यते प्रारब्धं परिहरता त्यजता पुरुषेण॥ ९३॥

94) [ क्षीणविभवोऽपि सुजनः सेवतेऽरण्यं न प्रार्थयतेऽन्यम्। मरणेऽप्यतिमहार्घं न विक्रीणाति मानमाणिक्यम्॥ ] क्षीणविभवोऽपि सुजनः सेवतेऽरण्यं प्रार्थयते नान्यम्। मरणेऽप्यतिमहार्घं न विक्रीणाति मानमाणिक्यम्। धीरा दरिद्रिणोऽपि मरणभाजोऽपि मानं मुक्त्वान्यं न प्रार्थयन्त इति भावः॥ ९४॥

95) [ द्वौ मार्गौ भुवनतले मानिनि मानोन्नतानां पुरुषाणाम्। अथवा प्राप्नुवन्ति श्रियमथवा भ्रमन्तः समाप्यन्ते॥ ] द्वावेव मार्गौ भुवनतले

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



96) वेण्णि वि हुंति गईओ साहसवंताण धीरपुरिसाणं।
वेलहलकमलहत्था रायसिरी अहव पव्वज्जा॥ ६॥
97) अहवा मरंति गुरुवसणपेल्लिया खंडिऊण नियजीहं।
नो गंतूण खलाणं चवंति दीणक्खरं धीरा॥ ७॥
98) अह सुप्पइ पियमालिंगिऊण उत्तुंगथोरथणवट्टे।
अह नरकरंककंकालसंकुले भीसणमसाणे॥ ८॥
99) अह भुंजइ सह पियकामिणीहि कच्चोलथालसिप्पीहिं।
अहवा विमलकवाले भिक्खं भमिऊण पेयवणे॥ ९॥

---

मानिनि मानोन्नतानां पुरुषाणाम्। अथवा भ्रमन्तो ग्रामनगराटवीषु श्रियं प्राप्नुवन्ति, अथवा समाप्यन्ते म्रियन्त इत्यर्थः॥ ९.५॥

96) [ द्वे अपि भवतो गती साहसवतां धीरपुरुषाणाम्। विकसित-कमलहस्ता राजश्रीरथवा प्रव्रज्या॥ ] द्वे एव गती भवतः। केषाम्। साहसवतां धीरपुरुषाणाम्। के ते इत्याह। विकसितकमलहस्ता राजश्री-रथवा प्रव्रज्या॥ ९.६॥

97) [ अथवा म्रियन्ते गुरुव्यसनप्रेरिताः खण्डयित्वा निजजिह्वाम्। नो गत्वा खलानां जल्पन्ति दीनाक्षरं धीराः॥ ] अथवा धीरा निजजिह्वां खण्डयित्वा गुरुव्यसनप्रेरिताः सन्तो म्रियन्ते, नो गत्वा खलानां पुरतो दीनाक्षरं देहीत्यादि जल्पन्ति॥ ९.७॥

98) [ अथ सुप्यते प्रियामालिङ्ग्योत्तुङ्गपृथुस्तनपृष्ठे। अथ नरकरङ्ककङ्कालसंकुले भीषणश्मशाने॥ ] अथ पक्षान्तरे प्रियामालिङ्ग्योत्तुङ्ग-विस्तीर्णस्तनपृष्ठे धीरेण सुप्यते। अथ नरकरङ्ककङ्कालसंकुले भीषणे स्मशाने॥ ९.८॥

99) [ अथ भुङ्क्ते सह प्रियकामिनीभिः कच्चोलस्थालशुक्तिभिः। अथवा विमलकपाले भिक्षां भ्रान्त्वा प्रेतवने॥ ] अथवा भुङ्क्ते प्रिय-कामिनीभिः साकं कच्चोलस्थालशुक्तिभिः। अथवा विमलकपाले भिक्षां भ्रान्त्वा प्रेतवने भुङ्क्ते धीरः॥ ९.९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



100) नमिऊण जं विढप्पइ खलचलणं तिहुयणं पि किं तेण ।
माणेण जं विढप्पइ तणं पि तं निव्वुइं कुणइ ॥ १० ॥

101) ते धन्ना ताण नमो ते गरुया माणिणो थिरारंभा ।
जे गरुयवसणपडिपेल्लिया वि अन्नं न पत्थंति ॥ ११ ॥

102) तुंगो च्चिय होइ मणो मणंसिणो अंतिमासु वि दसासु ।
अत्थंतस्स वि रइणो किरणा उद्धं च्चिय फुरंति ॥ १२ ॥

103) ता तुंगो मेरुगिरी मयरहरो ताव होइ दुत्तारो ।
ता विसमा कज्जगई जाव न धीरा पवज्जंति ॥ १३ ॥

104) ता विच्छिण्णं गयणं ताव च्चिय जलहरा अइगहीरा ।
ता गरुया कुलसेला जाव न धीरेहि तुलंति ॥ १४ ॥

100) [ नत्वा यदर्ज्यते खलचरणं त्रिभुवनमपि किं तेन । मानेन यदर्ज्यते तृणमपि तन्निर्वृतिं करोति ॥ ] खलचरणं नत्वा यत् त्रिभुवनमप्यर्ज्यते, किं तेन त्रिभुवनेन । मानेन यत् तृणमप्यर्ज्यते तन्निर्वृतिं सुखं करोति ॥ १०० ॥

101) [ ते धन्यास्तेभ्यो नमस्ते गुरवो मानिनः स्थिरारम्भाः । ये गुरुव्यसनप्रतिप्रेरिता अप्यन्यं न प्रार्थयन्ते ॥ १०१ ॥ ]

102) [ तुङ्गमेव भवति मनो मनस्विनोऽन्तिमास्वपि दशासु । अस्तमयमानस्यापि रवेः किरणा ऊर्ध्वमेव स्फुरन्ति ॥ १०२ ॥ ]

103) [ तावत्तुङ्गो मेरुगिरिर्मकरालयस्तावद्भवति दुस्तरः । तावद्विषमा कार्यगतिर्यावन्न धीराः प्रपद्यन्ते ॥ ] तावत्तुङ्गो मेरुगिरिर्मकरगृहस्तावद्भवति दुस्तरः । तावद्विषमा कार्यगतिर्यावद्धीरा न प्रतिपद्यन्ते । धीरा एवैतत् पूर्वोक्तं कर्तुमलंकर्मीणाः ॥ १०३ ॥

104) [ तावद्विस्तीर्णं गगनं तावदेव जलधरा अतिगभीराः । तावद्गुरुकाः कुलशैला यावन्न धीरैस्तुल्यन्ते ॥ ] तावद्विस्तीर्णं गगनं तावदेव जलधरा अतिगभीराः, तावद्गुरुकाः कुलशैलाः, यावन्न धीरैस्तोल्यन्ते ॥ १०४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



105) मेरू तिणं व सग्गो घरंगणं हत्थछित्तं गयणयलं।
वाहलिया य समुद्दा साहसवंताण पुरिसाणं ॥ १५ ॥

106) संघडियघडियविघडियघडंतविघडंतसंघडिज्जंतं।
अवहत्थिऊण दिव्वं करेइ धीरो समारद्धं ॥ १६ ॥

१०. साहसवज्जा [ साहसपद्धतिः ]

107) साहसमवलंबंतो पावइ हियइच्छियं न संदेहो।
जेणुत्तमंगमेत्तेण राहुणा कवलिओ चंदो ॥ १ ॥

108) तं किं पि साहसं साहसेण साहंति साहससहावा[1]।
जं भाविऊण दिव्वो परंमुहो धुणइ नियसीसं ॥ २ ॥

105) [ मेरुस्तृणमिव स्वर्गो गृहाङ्गणं हस्तस्पृष्टं गगनतलम् ।
क्षुद्रनद्यः समुद्राः साहसवतां पुरुषाणाम् ॥ ] साहसवतां पुरुषाणां मेरुस्तृण-मिव, स्वर्गो गृहाङ्गणमिव, हस्तस्पृष्टं गगनतलं, समुद्राश्च क्षुद्रनद्य इव । को भावः । यथा तृणमाक्रम्यते तथा मेरुः । यथा गृहाङ्गणं तथा स्वर्गः । गगनतलं हस्तेन स्पृश्यते, समुद्राः क्षुद्रनद्य इव तीर्यन्त इति ॥ १०५ ॥

106) [ संघटितघटितविघटितघटमानविघटमानसंघट्यमानम् ।
अपहस्त्य दैवं करोति धीरः समारब्धम् ॥ ]

107) [ साहसमवलम्बमानः प्राप्नोति हृदयेप्सितं न संदेहः ।
येनोत्तमाङ्गमात्रेण राहुणा कवलितश्चन्द्रः ॥ ] साहसमवलम्बमानः पुमान् प्राप्नोति हृदयेप्सितं न संदेहः । कथमेवं ज्ञायत इत्याह । येन कारणेनोत्त-माङ्गमात्रेण शिरःशेषेण राहुणा स्वर्भानुना चन्द्रः कवलितः । अत्र साहस-मेव प्रमाणम् । नो चेद् हस्तपादाद्यवयवसंयुक्तं चन्द्रं मूर्धमात्रो राहुः कथं कवलयितुमीष्टे ॥ १०७ ॥

108) [ तत् किमपि साहसं साहसेन साधयन्ति साहसस्वभावाः ।
यद् भावयित्वा दैवं पराङ्मुखं धूनयति निजशिरः ॥ ] साहससहायाः पुमांसः साहसेन तत् किमपि साहसं साधयन्ति । यद् भावयित्वा दैवं पराङ्मुखं सच्छिरो निजं धूनयति "अहो अस्य साहसं यदेवमकार्षीत्" इति ॥ १०८ ॥

1 C साहससहाया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



109) थरथरइ धरा खुब्भंति सायरा होइ विम्हलो[1] दइवो।
असमववसायसाहसंलद्धजसाण धीराणं ॥ ३ ॥

110) अगणियसमविसमाणं साहसतुंगे समारुहंताणं।
रक्खइ धीराण मणं आसन्नभयाउलो दइवो ॥ ४ ॥

111) तं किं पि कम्मरयणं धीरा ववसंति साहसवसेणं।
जं बंभहरिहराण वि लग्गइ चित्ते चमक्कारो ॥ ५ ॥

112) धीरेण समं समसीसियाइ रे दिव्व आरुहंतस्स।
होहिइ किं पि कलंकं धुव्वंतं जं न फिट्टिहिइ ॥ ६ ॥

113) जह जह न समप्पइ विहिवसेण विहडंतकज्जपरिणामो।
तह तह धीराण मणे वड्ढइ बिउणो समुच्छाहो ॥ ७ ॥

109) [ कम्पते धरा क्षुभ्यन्ति सागरा भवति विह्वलं दैवम्। असमव्यवसायसाहससंलब्धयशोभ्यो धीरेभ्यः ॥ ] धीरेभ्य एवं भवति। कथमित्याह। धरा पृथ्वी थरथरायते कम्पते। क्षुभ्यन्ति सागराः। भवति विह्वलं दैवम्। किंविशिष्टेभ्यो धीरेभ्यः। असमव्यवसायसाहसवद्भयः ॥ १०९ ॥

110) [ अगणितसमविषमाणां साहसतुङ्गे समारोहताम्। रक्षति धीराणां मन आसन्नभयाकुलं दैवम् ॥ ]

111) [ तत्किमपि कर्मरत्नं धीरा व्यवस्यन्ति साहसवशेन। यद् ब्रह्महरिहराणामपि लगति चित्ते चमत्कारः ॥ ] तत किमपि कर्मरत्नं धीरा व्यवस्यन्ति साहसवशेन, यद् ब्रह्महरिहराणामपि चित्ते चमत्कारो लगति ॥ १११ ॥

112) [ धीरेण समं समशीर्षिकायां रे दैवारोहतः। भविष्यति कोऽपि कलङ्को धाव्यमानो यो न यास्यति ॥ ] रे दैव, धीरेण समं समसीसियाए स्पर्धया आरोहतस्तव कोऽपि कलङ्को भविष्यति यो धाव्यमानोऽपि न यास्यति ॥ ११२ ॥

113) [ यथा यथा न समाप्यते विधिवशेन विघटमानकर्मपरिणामः। तथा तथा धीराणां मनसि वर्धते द्विगुणः समुत्साहः ॥ ] यथा यथा विधि-

---

1 C भिंभलो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



114) फलसंपत्तीइ समोणयाइ तुंगाइ फलविपत्तीए।
हिययाइ सुपुरिसाणं महातरूणं व सिहराइं ॥ ८ ॥

115) हियए जाओ तत्थेव वड्ढिओ नेय पयडिओ लोए।
ववसायपायवो सुपुरिसाण लक्खिज्जइ फलेहिं[1] ॥ ९ ॥

116) ववसायफलं विहवो विहवस्स य विहलजणसमुद्धरणं।
विहलुद्धरणेण जसो जसेण भण किं न पज्जत्तं ॥ १० ॥

117) आढत्ता सप्पुरिसेहि तुंगववसायदिन्नहियएहिं।
कज्जारंभा होहिंति निप्फला कह चिरं कालं ॥ ११ ॥

वशेन विघटमानः कार्यपरिणामो न समाप्यते, न पूर्णो भवति, तथा तथा धीराणां मनसि द्विगुणः समुत्साहो वर्धते ॥ ११३ ॥

114) [ फलसंपत्त्या समवनतानि तुङ्गानि फलविपत्त्या। हृदयानि सुपुरुषाणां महातरूणामिव शिखराणि ॥ ] फलसंपत्त्या समवनतानि तुङ्गानि फलविपत्त्या, सत्पुरुषाणां हृदयानि महातरूणामाम्रादीनां शिखराणीव भवन्तीत्यध्याहर्तव्यम् ॥ ११४ ॥

115) [ हृदये जातस्तत्रैव वर्धितो नैव प्रकटितो लोके। व्यवसायपादपः सुपुरुषाणां लक्ष्यते फलैः ॥ ] व्यवसायपादपः सुपुरुषाणां फलैः लक्ष्यते। अत्र फलं कार्यनिष्पत्तिः। किंविशिष्टो व्यवसायपादपः। हृदये जात उत्पन्नस्तत्रैव वर्धितो नैव प्रकटितो लोके। अन्यो यः पादपो भवति स जातमात्रो दृश्यते वर्धमानश्च। अयं तु व्यवसायवृक्षः फलैरेव ज्ञायते। अयं भावः। सत्पुरुषाणां व्यवसायः फलित एव ज्ञायते, न पूर्वमिति ॥ ११५ ॥

116) [ व्यवसायफलं विभवो विभवस्य च विह्वलजनसमुद्धरणम्। विह्वलोद्धरणेन यशो यशसा भण किं न पर्याप्तम् ॥ ] व्यवसायफलं विभवः। विभवफलं विह्वलजनसमुद्धरणम्। विह्वलोद्धरणेन यशो, यशसा भण किं न पर्याप्तम् अपि तु सर्वमपि संपूर्णम् ॥ ११६ ॥

117) [ आरब्धाः सत्पुरुषैस्तुङ्गव्यवसायदत्तहृदयैः। कार्यारम्भा भविष्यन्ति निष्फलाः कथं चिरं कालम् ॥ ] सत्पुरुषैस्तुङ्गव्यवसायदत्त-

1 J फलेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



118) न महुमहणस्स[1] वच्छे मज्झे कमलाण नेय खीरहरे।
ववसायसायरे सुपुरिसाण लच्छी फुडं वसइ ॥ १२ ॥

119) तद्दियहारंभवियावडाण मित्तेक्ककज्जरसियाणं।
रविरहतुरयाण व सुपुरिसाण न हु हिययवीसामो ॥ १३ ॥

## ११. दिव्ववज्जा [ दैवपद्धतिः ]

120) अत्थो विज्जा पुरिसत्तणं च अन्नाइ गुणसहस्साइं।
दिव्वायत्ते कज्जे सव्वाइ नरस्स विहडंति ॥ १ ॥

121) सत्थत्थे पडियस्स वि मज्झेणं एइ किं पि तं कज्जं।
जं न कहिउं न सहिउं न चेव पच्छाइउं तरइ ॥ २ ॥

---

हृदयैः कार्यारम्भाः प्रारब्धाः कथं चिरकालं निष्फला भविष्यन्ति। अपि तु तत्क्षणादेव फलिष्यन्ति ॥ ११७ ॥

118) [ न मधुमथनस्य वक्षसि मध्ये कमलानां नैव क्षीरनिधौ। व्यवसायसागरे सुपुरुषाणां लक्ष्मीः स्फुटं वसति ॥ ] लक्ष्मीर्न मधुमथनस्य वक्षसि वसति, न कमलानां मध्ये, नैव क्षीरनिधौ। स्फुटं व्यवसायसागरे सत्पुरुषाणां व्यवसाय एव सागरस्तत्र वसति ॥ ११८ ॥

119) [ तद्दिवसारम्भव्यापृतानां मित्रैककार्यरसिकानाम्। रविरथतुरगाणामिव सुपुरुषाणां न खलु हृदयविश्रामः ॥ ] तद्दिवसारम्भविशेषव्यापृतानां मित्रैककार्यरसिकानां सत्पुरुषाणां न खलु हृदयविश्रामः। केषामिव। रविरथतुरंगाणामिव। यथा सूर्यस्यन्दनसंप्रसक्तानाम् ( तुरगाणाम् ) अहर्निशं परिभ्रमतां विश्रामो नास्ति। तेषामपि किंविशिष्टानाम्। मित्रः सूर्यः, तस्यैककार्यरसिकानाम् ॥ ११९ ॥

120) [ अर्थो विद्या पौरुषं चान्यानि गुणसहस्राणि। दैवायत्ते कार्ये सर्वाणि नरस्य विघटन्ते ॥ १२० ॥ ]

121) [ शास्त्रार्थे पतितस्यापि मध्येनैति तत् किमपि कार्यम्। यन्न कथयितुं न सोढुं न चैव प्रच्छादयितुं शक्नोति ॥ ] स्वस्थार्थे पतितस्यापि

---

1 BCJ: ण हु महुमहस्स



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



122) जइ विसइ विसमविवरं लंघइ उयहिं करेइ ववसायं।
तह वि हु फलं न पावइ पुरिसो दिव्वे पराहुत्ते॥ ३॥

123) नग्घंति गुणा विहडंति बंधवा वल्लहा विरज्जंति।
ववसाओ न समप्पइ नरस्स दिव्वे पराहुत्ते॥ ४॥

124) जं जं डालं लंबइ हत्थे गहिऊण वीसमइ जत्थ।
सा सा तडत्ति तुट्टइ नरस्स दिव्वे पराहुत्ते॥ ५॥

125) जं नयणेहि न दीसइ हियएण वि जं न चिंतियं कह वि।
तं तं सिरम्मि निवडइ नरस्स दिव्वे पराहुत्ते॥ ६॥

---

तत् किमपि कार्यं मध्य एति, यत् कार्यं न कथयितुं, न सोढुं, न चैव प्रच्छादयितुं तीर्यते समर्थ्यते॥ १२१॥

122) [ यदि विशति विषमविवरे लङ्घयत्युदधिं कुरुते व्यवसायम्। तथापि खलु फलं न प्राप्नोति पुरुषो दैवे पराभूते॥ ] यदि विशति विषमविवरे, उदधिं लङ्घयति अतिक्रामति, कुरुते व्यवसायं, तथापि दैवे पराङ्मुखे फलं पूर्वकृतस्य न प्राप्नोति पुमान्॥ १२२॥

123) [ नार्घन्ति गुणा विघटन्ते बान्धवा वल्लभा विरज्यन्ते। व्यवसायो न समाप्यते नरस्य दैवे पराभूते॥ ] नार्घन्ति गुणाः, विघटन्ते बान्धवाः, वल्लभा विरज्यन्ते। व्यवसायो न समाप्यते समाप्तिं याति नरस्य दैवे पराङ्मुखे॥ १२३॥

124) [ यां यां शाखां लम्बते हस्ते गृहीत्वा विश्राम्यति यस्याम्। सा सा तटदिति त्रुटयति नरस्य दैवे पराभूते॥ ] दैवे पराङ्मुखे सति यां यां शाखामालम्बते हस्तेन गृहीत्वा यस्यां च विश्राम्यति सा सा शाखा नरस्य त्रुट्यतीति दैवविलसितमिदम्॥ १२४॥

125) [ यन्नयनाभ्यां न दृश्यते हृदयेनापि यन्न चिन्तितं कथमपि। तच्छिरसि निपतति नरस्य दैवे पराभूते॥ ] यन्नयनाभ्यां नैव दृश्यते हृदयेनापि यन्न चिन्तितं कथमपि, तत्तच्छिरसि निपतति नरस्य दैवे पराङ्मुखे॥ १२५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## १२. विहिवज्जा [ विधिपद्धतिः ]

126) खंडिज्जइ विहिणा ससहरो वि सूरस्स होइ अत्थमणं।
हा दिव्वपरिणईए कवलिज्जइ को न कालेणं ॥ १ ॥

127) को एत्थ सया सुहिओ कस्स व लच्छी थिराइ पेम्माई।
कस्स व न होइ खलणं भण को हु न खंडिओ विहिणा ॥२॥

128) उन्नय नीया नीया वि उन्नया हुंति तक्खण श्चेव।
विहिपरिणामियकज्जं हरिहरबम्हा न याणंति ॥ ३ ॥

129) विहिणा जं च्चिय लिहियं नलाडवट्टीइ तेण दइवेण।
पच्छा सो वि पसन्नो अन्नह करिउं न हु समत्थो ॥ ४ ॥

---

126) [ खण्ड्यते विधिना शशधरोऽपि सूर्यस्य भवत्यस्तमनम्। हा दैवपरिणत्या कवलीक्रियते को न कालेन ॥ ] विधिना पुराकृतकर्मणा शशधरोऽपि खण्ड्यते, सूर्यस्य भवत्यस्तमनम्। हा खेदे। दैवपरिणत्या को न कालेन कवलीक्रियते। आस्तां तावन्मनुष्यादिः। यत्र सर्वकार्यसमर्थयो-र्दिननिशाकरयोरेवंविधो भवति विवर्तस्तत्र का कथा पुरुषादेः ॥ १२६ ॥

127) [ कोऽत्र सदा सुखितः कस्य वा लक्ष्मीः स्थिराणि प्रेमाणि। कस्य वा न भवति स्खलनं भण कः खलु न खण्डितो विधिना ॥ ] कोऽत्र जगति सदा सुखितः। कस्य लक्ष्मीः स्थिरा, कस्य प्रेमाणि स्थिराणि। कस्य वा स्खलनं न भवति। भण कः खलु विधिना न खण्डितः॥ १२७॥

128) [ उन्नता नीचा नीचा अप्युन्नता भवन्ति तत्क्षणादेव। विधिपरिणामितकार्यं हरिहरब्रह्माणो न जानन्ति ॥ ] उन्नता ये नीचा भवन्ति ते तत्क्षणादेव, नीचाश्चोन्नताः। विधिपरिणामितकार्यं हरिहर-ब्रह्माणोऽपि न जानन्ति ॥ १२८ ॥

129) [ विधिना यदेव लिखितं ललाटपट्टे तेन दैवेन। पश्चात्सो-ऽपि प्रसन्नोऽन्यथा कर्तुं न खलु समर्थः ॥ ] तेन दैवेन विधिना ललाटपट्ट्यां यल्लिखितं पश्चात्सोऽपि कथमप्याराधनेन प्रसन्नः सन्, अन्यथा-कर्तुं न समर्थस्तल्लिखितम् ॥ १२९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



130) किं करइ किर वराओ साहसववसायमाणगरुओ वि ।
पुरिसो भग्गपयावो विहिणा विवरीयरूवेण ॥ ५ ॥

131) वेण्णि वि महणारंभे पेच्छह जं पुव्वकम्मपरिणामो ।
उप्पज्जइ हरह विसं कण्हस्स घणत्थणा लच्छी ॥ ६ ॥

132) विहिविहियं च्चिय लब्भइ अमयं देवाण महुमहे लच्छी ।
रयणायरम्मि महिए हरस्स भाए विसं जायं ॥ ७ ॥

## १३. दीणवज्जा [ दीनपद्धतिः ]

133) परपत्थणापवन्नं मा जणणि जणेसु परिसं पुत्तं ।
उयरे वि मा धरिज्जसु पत्थणभंगो कओ जेण ॥ १ ॥

---

130) [ किं करोति किल वराकः साहसव्यवसायमानगुरुरपि ।
पुरुषो भग्नप्रतापो विधिना विपरीतरूपेण ॥ ] किं करोति वराकः किल साहसव्यवसायमानगुरुरपि । यतो विपरीतरूपेण विधिना भग्नप्रतापः ॥ १३० ॥

131) [ द्वे अपि मथनारम्भे प्रेक्षध्वं यत् पूर्वकर्मपरिणामः । उत्पद्यते हरस्य विषं कृष्णस्य घनस्तनी लक्ष्मीः ॥ ] प्रेक्षध्वं यत् पूर्वकर्मपरिणामः । मथनारम्भे द्वावेव हरहरौ विधेते । तत्र मथनारम्भे कृते हरह इति ईश्वरस्य विषमुत्पद्यते, कृष्णस्य घनस्तनी लक्ष्मीः । अत्र हरह इति अपभ्रंशे षष्ठयाःस्थाने ह इति रूपम् । पूर्वकर्मणा, समयोरपि पुरुषयोः पूर्वं कर्म परिणमति ॥ १३१ ॥

132) [ विधिविहितमेव लभ्यतेऽमृतं देवानां मधुमथने लक्ष्मीः । रत्नाकरे मथिते हरस्य भागे विषं जातम् ॥ ] गाथान्तरेण तमेवार्थमुद्देश्यति । विधिविहितमेव लभ्यते कथमित्याह । अमृतं देवानाम् । मधुमथने लक्ष्मीः संजाता । हरस्य भागे विषं जातम् ॥ १३२ ॥

133 ) [ परप्रार्थनाप्रपन्नं मा जननि जनयेदृशं पुत्रम् । उदरेऽपि मा धारय प्रार्थनाभङ्गः कृतो येन ॥ ] परप्रार्थनाप्रपन्नं मा जननि जनयस्वेदृशं पुत्रम् । उदरेऽपि मा धारय तं येन परप्रार्थनाभङ्गः कृतः ॥ १३३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



134) ता रूवं ताव गुणा लज्जा सच्चं कुलक्कमो ताव।
ताव च्चिय अहिमाणो देहि त्ति न भण्णए जाव ॥ २ ॥

135) तिणतूला वि हु लहुयं दीणं दइवेण निम्मियं भुवणे।
वाएण किं न नीयं अप्पाणं पत्थणभएण ॥ ३ ॥

136) थरथरथरेइ हिययं जीहा घोलेइ कंठमज्झम्मि।
नासइ मुहलावण्णं देहि त्ति परं भणंतस्स ॥ ४ ॥

137) किसिणिज्जंति लयंता उयहिजलं जलहरा पयत्तेण।
धवलीहुंति हु देंता देंतलयंततरं पेच्छ ॥ ५ ॥

---

134) [ तावद्रूपं तावद्गुणा लज्जा सत्यं कुलक्रमस्तावत्। तावद्देवाभिमानो देहीति न भण्यते यावत् ॥ ] तावद्रूपं तावद्गुणास्तावल्लज्जा सत्यं कुलक्रमँस्तावत्। तावद्देवाभिमानः। तावत् कथम्। यावद्देहीति न भण्यते पुरुषेण ॥ १३४ ॥

135) तृणतूलादपि खलु लघुर्दीनो दैवेन निर्मितो भुवने। वातेन किं न नीत आत्मानं प्रार्थनभयेन ॥ ] तृणकर्पासादेरपि लघुर्दीनो याचको दैवेन निर्मितः। तृणतूलवद् यद् वातेन न नीयते, तत्र को हेतुः। आत्मनः प्रार्थनाभयेन। अयं याचको मामपि याचिष्यते नीतः सन्निति न नीयते ॥ १३५ ॥

136) [ कम्पते हृदयं जिह्वा घूर्णते कण्ठमध्ये। नश्यति मुखलावण्यं देहीति परं भणतः ॥ ] परमन्यं देहीति भणतो याचकस्य थरथरायते कम्पते हृदयं, जिह्वा कण्ठमध्य इततश्चलति, नश्यति मुखलावण्यम् ॥ १३६ ॥

137) [ कृष्णीभवन्ति गृह्णन्त उदधिजलं जलधराः प्रयत्नेन। धवलीभवन्ति खलु ददतो ददद्गृह्णदन्तरं प्रेक्षस्व ॥ ] ददल्लादन्तरं पश्य ददतो लातो गृह्णतश्चान्तरम्। तदेव दर्शयति। उदधिजलं लान्तो गृह्णन्तो जलधराः कृष्णीभवन्ति खलु। तदेव ददतो वर्षन्तो धवलीभवन्ति। सजलाः कृष्णा निर्जला धवला घना भवन्तीति स्वभावः ॥ १३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## १४. दारिद्दवज्जा [ दारिद्र्यपद्धतिः ]

138) दारिद्दय तुज्झ गुणा गोविज्जंता वि धीरपुरिसेहिं।
पाहुणएसु छणेसु य वसणेसु य पायडा हुंति ॥ १ ॥

139) दारिद्दय तुज्झ नमो जस्स पसाएण एरिसी रिद्धी।
पेच्छामि सयललोए ते मह[1] लोया न पेच्छंति ॥ २ ॥

140) जे जे गुणिणो जे जे वि माणिणो जे वियड्ढसंमाणा।
दालिद्द रे वियक्खण ताण तुमं साणुराओ सि ॥ ३ ॥

141) दीसंति जोयसिद्धा अंजणसिद्धा वि के वि दीसंति।
दारिद्दजोयसिद्धं मं ते लोया न पेच्छंति ॥ ४ ॥

138) [ दारिद्र्यक तव गुणा गोप्यमाना अपि धीरपुरुषैः। प्राघूर्णकेषु क्षणेषु च व्यसनेषु च प्रकटा भवन्ति ॥ ] दारिद्र्यक। अत्र कप्रत्ययो नीचार्थः। अतो हे दारिद्र्य नीच। तव गुणा धीरपुरुषैर्गोप्यमाना अपि प्रकटीभवन्ति। केषु। प्राघूर्णकेषु आगतेषु। क्षणेषु दीपोत्सवादिषु। व्यसनेषु च ॥ १३८ ॥

139) दारिद्र्यक तुभ्यं नमो यस्य प्रसादेनेदृश्यृद्धिः। प्रेक्षे सकललोकांस्ते मां लोका न प्रेक्षन्ते ॥ ] हे दारिद्र्य तुभ्यं नमः। यस्य प्रसादेनेदृश्यृद्धिः संजाता। तामेव दर्शयति। सकललोकानहं पश्यामि। ते लोकाः खलु मां न पश्यन्ति ॥ १३९ ॥

140) [ ये ये गुणिनो ये येऽपि मानिनो ये विदग्धसंमानाः। दारिद्र्य रे विचक्षण तेषां त्वं सानुरागमसि ॥ ] ये ये गुणिनो ये चापि मानिनो ये विदग्धसंमानाः। दारिद्र्य हे विचक्षण तेषां त्वं सानुरागमसि। अन्योऽपि यो विचक्षणो भवति स गुणमानवत्सु सानुरागः स्यात् ॥ १४० ॥

141) [ दृश्यन्ते योगसिद्धा अञ्जनसिद्धा अपि केचन दृश्यन्ते। दारिद्र्ययोगसिद्धं मां ते लोका न प्रेक्षन्ते ॥ ] दृश्यन्ते योगसिद्धा अञ्जनसिद्धाश्च केचन दृश्यन्ते। दारिद्र्यमेव योगस्तेन सिद्धं मां लोकास्ते न प्रेक्षन्ते ॥ १४१ ॥

1 J मं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



142) जे भग्गा विहवसमीरणेण वंकं ठवंति पयमग्गं।
ते नूणं दालिद्दोसहेण जइ पंजलिज्जंति ॥ ५ ॥

143) किं वा कुलेण कीरइ किं वा विणएण किं व रूवेण।
धणरहियाणं सुंदरि नराण को आयरं कुणइ ॥ ६ ॥

144) जाई रूवं विज्जा तिन्नि वि गच्छंतु कंदरे विवरे।
अत्थो च्चिय परिवड्ढउ जेण गुणा पायडा हुंति ॥ ७ ॥

145) धम्मत्थकामरहिया जे दियहा निद्धणाण वोलीणा।
जइ ताइ गणेइ विही गणेउ न हु एरिसं जुत्तं ॥ ८ ॥

---

142) [ ये भग्ना विभवसमीरणेन वक्रं स्थापयन्ति पदमार्गम्। ते नूनं दारिद्र्यौषधेन यदि प्राञ्जलीक्रियन्ते ॥ ] ये भग्ना विभवसमीरणेन विभववातेन, वक्रं स्थापयन्ति पदमार्गम्। कोऽर्थः। वक्रं चलन्ति। ते नूनं दारिद्र्यौषधेन प्राञ्जलीभवन्ति। अन्येऽपि वातरुग्णा औषधेन पुनर्ऋजूभवन्ति ॥ १४२ ॥

143) [ किं वा कुलेन क्रियते किं वा विनयेन किं वा रूपेण। धनरहितानां सुन्दरि नराणां क आदरं करोति ॥ ] किं वा कुलेन क्रियते किं वा विनयेन किं वा रूपेण। हे सुन्दरि धनरहितानां नराणां को नामादरं करोति ॥ १४३ ॥

144) [ जाती रूपं विद्या त्रीण्यपि गच्छन्तु कन्दरे विवरे। अर्थ एव परिवर्धतां येन गुणाः प्रकटा भवन्ति ॥ ] जातिर्विद्या रूपं त्रीण्यपि गच्छन्तु कन्दरे[1] विवरे। अर्थ एव परिवर्धतां येन गुणाः प्रकटीभवन्ति ॥ १४४ ॥

145) [ धर्मार्थकामरहिता ये दिवसा निर्धनानामतिक्रान्ताः। यदि तान् गणयति विधिर्गणयतु न खल्वीदृशं युक्तम् ॥ ] "सुंदरं एयं" इति पाठः। धर्मार्थकामरहिता ये दिवसा निर्धनानामतिक्रान्ता, यदि तान् गणयति विधिर्गणयतु न खल्वीदृशं युक्तम्। "सुंदरं एयं" इति पाठे न खल्विदं सुन्दरम् ॥ १४५ ॥

---

1 J अवरे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



146) संकुयइ संकुयंते वियसइ वियसंतयम्मि सूरम्मि।
खिसिरे दोरकुडुंबं पंकयलीलं समुव्वहइ ॥ ९ ॥

### १५. पहुवज्जा [ प्रभुपद्धतिः ]

147) छज्जइ पहुस्स ललियं पियाइ माणो खमा समत्थस्स।
जाणंतस्स य भणियं मोणं च अयाणमाणस्स ॥ १ ॥

148) सच्छंदं बोलिज्जइ किज्जइ जं नियमणस्स पडिहाइ।
अजसस्स न बीहिज्जइ पहुत्तणं तेण रमणिज्जं ॥ २ ॥

149) जम्मदिणे थणणिवडणभएण दिज्जंति धाइउच्छंगे।
पहुणो जं नीयरया मन्ने तं खीरमाहप्पं ॥ ३ ॥

---

146) [ संकुचति संकुचति विकसति विकसति सूर्ये। शिशिरे दरिद्रकुटुम्बं पङ्कजलीलां समुद्वहति ।। ] शिशिरे दरिद्रकुटुम्बं पङ्कजलीलां कमलसादृश्यं समुद्वहति। सूर्ये संकुचति सति अस्तमयमाने संकुचति। विकसति उद्गच्छति सूर्ये विकसति विकाशं लभते। हस्तपादं प्रसारयति शीताभावात्। कमलमपि संकुचति मुकुलीभवति, विकसति तस्मिन् विकसति पुष्पतीत्यर्थः ।। १४६ ।।

147) [ राजते प्रभोर्ललितं प्रियाया मानः क्षमा समर्थस्य। जानतश्च भणितं मौनं चाजानतः ।। ] प्रभोर्ललितं क्रीडितं शोभते। प्रियाया मानः क्षमा समर्थस्य। जानतो भणितमजानतो मौनम्। "छज्जइ" इति सर्वत्र सम्बध्यते ।। १४७ ।।

148) [ स्वच्छन्दं कथ्यते क्रियते यन्निजमनसः प्रतिभाति। अयशसो न भीयते प्रभुत्वं तेन रमणीयम् ।। ] प्रभुत्वं तेन हेतुना रमणीयं मनोऽभीष्टम्। कथम्। स्वच्छन्दमुच्यते सेवकानां गाल्यादिकं क्रियते। यन्निजमनसः प्रतिभाति अयुक्तकरणमेव। यदयशस्तस्मान्न भीयते ।।१४८।।

149) [ जन्मदिने स्तननिपतनभयेन दीयन्ते धात्र्युत्सङ्गे। प्रभवो यन्नीचरता मन्ये तत्क्षीरमाहात्म्यम् ।। ] प्रभवो यन्नीचरतास्तन्मन्ये क्षीर-माहात्म्यं स्तन्यकारणम्। कथमेवम्। यतः प्रभवो जन्मदिवसे तन्मातुः स्तननिपतनभयेन धात्री उपमाता तदुत्सङ्गे दीयन्ते। ये किल राज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



150) हिट्ठट्ठे जडणिवहं तह य सुपत्ताइ उत्तमंगेसु।
जह होइ तरू तह जइ पहुणो ता किं न पज्जत्तं ॥ ४ ॥

१६. सेवयवज्जा [ सेवकपद्धतिः ]

151) जं सेवयाण दुक्खं चारित्तविवज्जियाण नरणाह।
तं होउ तुह रिऊणं अहवा ताणं पि मा होउ ॥ १ ॥

152) भूमीसयणं जरचीरबंधणं बंभचेरयं भिक्खा।
मुणिचरियं दुग्गयसेवयाण धम्मो परं नत्थि ॥ २ ॥

153) जइ नाम कह वि सोक्खं होइ तुलग्गेण सेवयजणस्स।
तं खवणयसग्गारोहणं व विग्गोवयसएहिं ॥ ३ ॥

महिष्यामुत्पन्नास्ते कथं नीचा भवन्ति। परं धात्रीस्तन्यं पिबतां नीचत्वमेव भवति ॥ १४९ ॥

150) [ अधोऽधो मूलनिवहं ( जडनिवहं ) तथा च सुपत्राणि ( सुपात्राणि ) उत्तमाङ्गेषु। यथा भवति तरुस्तथा यदि प्रभवस्तत् किं न पर्याप्तम् ॥ ] यथा भवति तरुस्तथा यदि प्रभवो भवेयुस्तत् किं न पर्याप्तम्। कथम्। अधोऽधो जडनिवहं तथा च सुपत्राणि शोभनच्छदानुत्तमाङ्गेषु। धारयन्तीत्यध्याहार्यम्। प्रभवः पुनस्तरुभ्यः प्रतीपाः। अधोऽधः सुपात्राणि धारयन्ति। कोऽर्थः। सुपात्राणि विदुषस्तृणायापि न मन्यन्ते। उत्तमाङ्गेषु मूर्खवृन्दं सर्वथा संमानयन्तीत्यर्थः ॥ १५० ॥

151) [ यत्सेवकानां दुःखं चारित्र्यविवर्जितानां नरनाथ। तद्भवतु तव रिपूणामथवा तेषामपि मा भवतु ॥ ] यत्सेवकानां दुःखं चारित्र्यविवर्जितानां नरनाथ, तद्दुःखं तव रिपूणां शत्रूणां भवतु, अथवा तेषामपि मा भवतु ॥ १५१ ॥

152) [ भूमीशयनं जरच्चीरबन्धनं ब्रह्मचर्यं भिक्षा। मुनिचरितं दुर्गतसेवकानां धर्मः परं नास्ति ॥ ] भूमीशयनं जरच्चीरधारणं ब्रह्मचर्यं भिक्षा, यावत् मुनिचरित्रं दुर्गतसेवकानां, धर्मः परं नास्ति। मुनिचरित्रे सर्वं भवति। दुर्गतसेवकस्य च धर्ममृते ॥ १५२ ॥

153) [ यदि नाम कथमपि सौख्यं भवति काकतालीयेन सेवकजनस्य। तत्क्षपणकस्वर्गारोहणमिव व्याकुलभावशतैः ॥ ] यदि नाम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



154) ओलग्गिओ सि धम्मम्मि होज्ज एण्हि नरिंद वच्चामो।
आलिहियकुंजरस्स व तुह पहु दाणं चिय न दिट्ठं ॥ ४ ॥

155) आसन्नफलो फणसो व्व नाह सयलस्स सेवयजणस्स।
अम्हं पुण पत्थिव पत्थिओ वि तालो तुमं जाओ ॥ ५ ॥

156) फणसेण समं महिमंडलम्मि का तरुवराण समसीसी।
करिकुंभसच्छहं मग्गणाण जो देइ फलणिवहं ॥ ६ ॥

---

कथमपि सौख्यं सेवकजनस्य तुलाग्रेण काकतालीयन्यायेन भवति, तद् क्षपणकस्वर्गारोहणमिव विमोपवाशतैः। अयं भावः। यथा संन्यासिनो मृतस्य श्राद्धैश्च तन्माहात्म्यान्नरविमानमारोहितस्य ददद्वानं वाद्यमानमर्दलं नीयमानस्य संस्काराय दुःखं[1] भवति, तथा सेवकजनस्याहर्निशं सेवां कुर्वाणस्य। उक्तं च यतः। सेवया धनमिच्छद्भिः सेवकैः पश्य किं कृतम्। स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥ १५३ ॥

154) [ अवलग्नोऽसि धर्मे भूया इदानीं नरेन्द्र व्रजामः। आलिखितकुञ्जरस्येव तव प्रभो दानमेव न दृष्टम् ॥ ] हे नरेन्द्र, अवलगितो धर्मे भूयाः। इदानीं व्रजामः। आलिखितकुञ्जरस्येव तव प्रभो दानं न दृष्टम्। यथा चित्रलिखितस्य कुञ्जरस्य दानं मदजलं न भवति, तथा तवापीत्यर्थः ॥ १५४ ॥

155) [ आसन्नफलो पनस इव नाथ सकलस्य सेवकजनस्य। अस्माकं पुनः पार्थिव प्रार्थितोऽपि तालस्त्वं जातः ॥ ] हे नाथ त्वं सर्वस्यापि सेवकजनस्य आसन्नफलः। क इव। पनस इव। हे पार्थिव प्रार्थितोऽपि त्वमस्माकं तालः संजातोऽसि। तालश्च शतवर्षं यावदेकदैव फलति ॥१५५॥

156) [ पनसेन समं महीमण्डले का तरुवराणां समशीर्षिका। करिकुम्भसदृक्षं मार्गणानां यो ददाति फलनिवहम् ॥ ] पनसेन समं पृथ्वीवलये का तरुवराणां स्पर्धा, यो मार्गणानां याचकानां करिकुम्भसदृक्षं फलनिवहं ददाति ॥ १५६ ॥

---

1 J संस्कार्यदुःखं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



157) वरिसिहिसि तुमं जलहर भरिहिसि भुवणंतराइ नीसेसं।
तण्हासुसियसरीरे मुयम्मि वप्पीहयकुडुंबे ॥ ७ ॥

158) देहि त्ति कह नु भण्णइ सुपुरिसववहारबाहिरं वयणं।
सेविज्जइ विणएणं एस च्चिय पत्थणा लोए ॥ ८ ॥

159) भुंजंति कसणदसणा अब्भंतरसंठिया गइंदस्स।
जे उण विहुरसहाया ते धवला बाहिर च्चेय ॥ ९ ॥

160) तंबाउ तिन्नि सुपओहराउ चत्तारि पक्कलवइल्ला।
निप्पन्ना रालयमंजरीउ सेवा सुहं कुणउ ॥ १० ॥

---

157) [ वर्षिष्यसि त्वं जलधर भरिष्यसि भुवनान्तराणि निःशेषम् । तृष्णाशोषितशरीरे मृते चातककुटुम्बे ॥ ] वर्षिष्यसि त्वं जलधर, पूरयिष्यसि भुवनान्तराणि निःशेषम् । क सति । तृष्णाशोषितशरीरे चातककुटुम्बे मृते सति ॥ १५७ ॥

158) [ देहीति कथं नु भण्यते सुपुरुषव्यवहारबहिर्भूतं वचनम् । सेव्यते विनयेनैषैव प्रार्थना लोके ॥ ] कथं नु भण्यते देहीति सत्पुरुषव्यवहारबहिर्भूतं वचनम् । सेव्यते विनयेन एषैव प्रार्थना लोके लोकमध्ये ॥ १५८ ॥

159) [ भुञ्जते कृष्णदशना अभ्यन्तरसंस्थिता गजेन्द्रस्य । ये पुनर्विधुरसहायास्ते धवला बहिरेव ॥ ] गजेन्द्रस्य मुखाभ्यन्तरस्थिताः कृष्णदशना भुञ्जते । ये पुनर्विधुरसहायास्ते धवला बहिरेव वर्तन्ते । अयमत्र भावः । मलिनचित्ताः प्रभोरभ्यन्तरस्थिता विभवजातं भुञ्जते । ये पुनः शुद्धस्वभावास्ते बहिःस्थिता एव केवलं क्लेशमनुभवन्ति ॥ १५९ ॥

160) [ गावस्तिस्रः सुपयोधराश्चत्वारः समर्थवृषभाः । निष्पन्ना रालकमञ्जर्यः सेवा सुखं करोतु ॥ ] सेवा सुखं करोतु । सेवया पर्याप्तम् । किमिति । गावस्तिस्रः सुपयोधराः, चत्वारश्च समर्था वृषभाः, निष्पन्ना रालकमञ्जर्यः । अयं भावः । धेनुवृषभरालकधान्येषु विद्यमानेषु सेवयालमित्यर्थः ॥ १६० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



161) सव्वो छुहिओ सोहइ मढदेउलमंदिरं च चच्चरयं ।
नरणाह मह कुडुंबं छुहछुहियं दुब्बलं होइ ॥ ११ ॥

## १७. सुहडवज्जा [ सुभटपद्धतिः ]

162) जं दिज्जइ पहरपरव्वसेहि मुच्छागएहि पयमेक्कं ।
तह नेहस्स पयस्स व न याणिमो को समब्भहिओ ॥ १ ॥

163) भग्गे वि बले वलिए वि साहणे सामिए निरुच्छाहे ।
नियभुयविक्कमसारा थक्कंति कुलुग्गया सुहडा ॥ २ ॥

164) वियलइ धणं न माणं झिज्जइ अंगं न झिज्जइ पयावो ।
रूवं चलइ न फुरणं सिविणे वि मणंसिसत्थाणं ॥ ३ ॥

161) [ सर्वो धवलितः शोभते मठदेवकुलमन्दिरं च चत्वरम् । नरनाथ मम कुटुम्बं सुधाधवलितं (क्षुधाक्षुधितं) दुर्बलं भवति ॥ ] सर्वः छुहिओ सुधाधवलितः शोभते मठदेवकुलमन्दिरं च चत्वरकं चतुष्पथम् । अत्र शब्दच्छलः[1] । एकत्र छुहिओ धवलितः । अन्यत्र क्षुधितः बुभुक्षायुक्तः ॥ १६१ ॥

162) [ यद्दीयते प्रहारपरवशैर्मूर्छागतैः पदमेकम् । तथा स्नेहस्य पदस्य वा न जानीमः किमभ्यधिकम् ॥ ] यत् दीयते प्रहारपरवशैर्मूर्छागतैः पदं चरणविन्यास एकः । तथा स्नेहस्य पयसो वा न जानीमः किमभ्यधिकम् । स्नेहपानीययोर्मध्ये ॥ १६२ ॥

163) [ भग्नेऽपि बले वलितेऽपि साधने स्वामिनि निरुत्साहे । निजभुजविक्रमसारास्तिष्ठन्ति कुलोद्गताः सुभटाः ॥ ] भग्ने बले, साधने वलिते पश्चाद्भूते, स्वामिनि निरुत्साहे, एवं समरसंमर्दे निजभुजविक्रमसाराः कुलोद्गताः सुभटास्तिष्ठन्ति, नेतरे कातरा नीचाश्चेति ॥ १६३ ॥

164) [ विगलति धनं न मानः क्षीयतेऽङ्गं न क्षीयते प्रतापः । रूपं चलति न स्फुरणं स्वप्नेऽपि मनस्विसार्थानाम् ॥ ] विगलति धनं न मानः, क्षीयतेऽङ्गं न प्रतापः क्षीयते । रूपं चलति न स्फुरणं तेजः, स्वप्नेऽपि मनस्विसार्थानां सुभटानाम् इति ॥ १६४ ॥

1 ) अत्र शब्दे छलम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



165) अवमाणिओ व्व संमाणिओ व्व नवसेवओ व्व कुविओ व्व ।
पहरइ कयावराहो व्व निब्भओ को वि संगामे ॥ ४ ॥

166) उयरे असिकप्परिए अंतोहे निवडियम्मि चलणेसु ।
भमइ भडो जसलुद्धो ससंकलो मत्तहत्थि व्व ॥ ५ ॥

167) दाहिणकरेण खग्गं वामेण सिरं धरेइ निवडंतं ।
अंतावेढियचलणो जाइ[1] भडो एक्कमेक्कस्स ॥ ६ ॥

168) अज्ज वि विहुरो सुपहू अज्ज वि पहरंति सुहडसंघाया ।
अज्ज वि मज्झत्था जयसिरी वि ता जीव मा वच्च ॥ ७ ॥

165) [ अपमानित इव संमानित इव नवसेवक इव कुपित इव । प्रहरति कृतापराध इव निर्भयः कोऽपि संग्रामे ॥ ] कोऽपि निर्भयः प्रहरति संग्रामे । अपमानित इव, संमानित इव, नवसेवक इव, कुपित इव, कृतापराध इव ॥ १६५ ॥

166) [ उदरेऽसिदारितेऽन्त्रौघे निपतिते चरणयोः । भ्रमति भटो यशोलुब्धः सशृङ्खलो मत्तहस्तीव ॥ ] भटो भ्रमति । किंविशिष्ट इव[2]। सशृङ्खलो मत्तहस्तीव । किंविशिष्टः । यशोलुब्धः । क सति । उदरे खड्गदारितेऽन्त्रौघे चरणयोर्निपतिते । खड्गघातदारितोदरनिपतितान्त्रमालानिगडितचरणः सुभटोऽन्दुकक्षिप्तपादस्य मत्तहस्तिन उपमां[3] धारयति ॥ १६६ ॥

167) [ दक्षिणकरेण खड्गं वामेन शिरो धारयति निपतत् । अन्त्रावेष्टितचरणो याति भट एकैकस्य ॥ ] याति भट एकैकस्य प्रतिसुभटस्य । किंविशिष्टः । अन्त्रमालावेष्टितचरणः । पूर्वं किं करोति । दक्षिणकरेण खड्गं, वामेन निपतत् परच्छिन्नं शिरो धारयति ॥ १६७ ॥

168) [ अद्यापि विधुरः सुप्रभुरद्यापि प्रहरन्ति सुभटसंघाताः । अद्यापि मध्यस्था जयश्रीरपि तस्माज्जीव मा व्रज ॥ ] अद्यापि विधुरः प्रभुरद्यापि प्रहरन्ति सुभटसंघाताः । अद्यापि मध्यस्था जयश्रीरियं

1 J and Laber धाइ (= धायइ = धावति) 2 J कथंभूत इव. 3 J औपम्यम्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



169) नेच्छइ सग्गग्गमणं कुवइ भडो सुरवहूहि निज्जन्तो ।
गरुयपडिवक्खपेल्लियसामियकज्जे अणिम्माए ॥ ८ ॥

170) एक्को वि को वि नियगोत्तभूसणो धरउ जणणिउयरम्मि ।
जो रिउघडाण समुहो परंमुहो परकलत्ताणं ॥ ९ ॥

171) वियडं सो परिसक्कउ सामिपसायं च सो समुव्वहउ ।
दुव्वारवेरिवारणणिवारणा जस्स भुयदंडा ॥ १० ॥

172) एकं दंतम्मि पयं बीयं कुंभम्मि तइयमलहंतो ।
बलिबंधविलसियं महुमहस्स आलंबए सुहडो ॥ ११ ॥

---

मत्स्वामिनं नालिङ्गति । अत एव हे जीव मा व्रजेति सुभटप्रकाण्डवचन-मिदम् ॥ १६८ ॥

169) [ नेच्छति स्वर्गगमनं कुप्यति भटः सुरवधूभिर्नीयमानः। गुरुकमतिपक्षक्षिप्तस्वामिकार्येऽनिर्मिते ॥] कश्चित्सुभटः स्वर्गगमनं नेच्छति। सुरवधूभिश्च नीयमानः स्वर्गं, ताभ्यः कुप्यति । क सति । गुरुप्रतिभट-प्रेरितस्वामिकार्येऽनिर्मितेऽकृते सति। अयमत्र भावः। स्वामिकार्यकरणोत्थित-यशःप्रसरं विहाय, गत्वरं स्वर्गतरुणीसुखं तृणायापि न मन्यत इति ॥१६९॥

170) [ एकोऽपि कोऽपि निजगोत्रभूषणो ध्रियतां जनन्युदरे । यो रिपुघटानां संमुखः पराङ्मुखः परकलत्रेभ्यः ॥ ] एकोऽपि निजगोत्र-भूषणं, तं जनन्युदरे धारयतु । यो रिपुघटानां संमुखोऽपयोद्धा । पराङ्मु-खश्च परकलत्रेभ्यः । एतेनैतस्य शौर्यशीलशालित्वं व्यज्यते ॥ १७० ॥

171) [ विकटं स परिक्रामतु स्वामिप्रसादं च स समुद्वहतु । दुर्वारवैरिवारणनिवारणौ यस्य भुजदण्डौ ॥ ] स विकटं परिशक्नोतु (? परिष्वस्कतु), स्वामिप्रसादं च स समुद्वहतु । दुर्वारवैरिवारणनिवारणौ यस्य भुजदण्डौ । यो दुःसहशत्रुसामजनिवारणबाहुदण्डो भवति ॥ १७१ ॥

172) [ एकं दन्ते पदं द्वितीयं कुम्भे तृतीयमलभमानः । बलि-बन्धविलसितं मधुमथनस्यालम्बते सुभटः ॥ ] सुभटो बलिबन्धविलसितं महुमहस्स वामनमूर्तेर्विष्णोरालम्बते । किं कुर्वाणः सुभटः । एकं पदं चरण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



173) चलचमरकण्णचालिरविज्जिज्जंतो भडो गइंदेण।
ओ सुवइ सामिकयकज्जणिब्भरो दंतपलंके ॥ १२ ॥

174) गाढासणस्स कस्स वि उयरे निहयस्स मंडलग्गेण।
अद्धं महीइ पडियं तुरंगपिट्टिट्ठियं अद्धं ॥ १३ ॥

175) सब्भावे पहुहियए जीए सग्गे जसे जए सयले।
ठविए रणम्मि सीसे कयकज्जो नच्चिओ सुहडो ॥ १४ ॥

विन्यासं दन्ते, द्वितीयं कुम्भे, तृतीयं पदमलभमानः। उक्तं च। एक्को पाउ पयाले बीओ बंभंडमंडलविलग्गो। तइओ रोसपुरंतो बलिबंधे वामणो जयइ ॥ १७२ ॥

173) [ चलचामरकर्णचञ्चलवीज्यमानो भटो गजेन्द्रेण। अहो स्वपिति स्वामिकृतकार्यनिर्भरो दन्तपल्यङ्के ॥ ] ओ इति अहो। भटः स्वपिति दन्तपल्यङ्के स्वामिकृतकार्येण निर्भरो निश्चिन्तः। किं क्रियमाणः। चलचमरौ यौ कर्णौ, ताभ्यां चालनशीलाभ्यां (? चलनशीलाभ्यां) वीज्यमानः। केन गजेन्द्रेण हस्तिना। कोऽर्थः। हस्तिना कृतप्रहारोऽपि तद्दन्तमारूढः सन् मृत एव तिष्ठति। ज्ञायते किल कर्णचमरवीज्यमानः कृतस्वामिकार्यनिश्चिन्तः स्वपिति। अन्योऽपि यो नरः कृतस्वामिकार्यो भवति, स निश्चिन्तः सन् पल्यङ्के चामरैर्वीज्यमानः शेते ॥ १७३ ॥

174) [ गाढासनस्य कस्याप्युदरे निहतस्य मण्डलाग्रेण। अर्धं मह्यां पतितं तुरंगपृष्ठस्थितमर्धम् ॥ ] कस्यचित् सुभटस्यार्धं मह्यां पतितम्। यतः किंविशिष्टस्य। उदरे मण्डलाग्रेण खड्गेन निहतस्य प्रहतस्य। अर्धं च तुरंगपृष्ठस्थितम्। तत्र कारणमाह विशेषणद्वारा। किंविशिष्टस्य। गाढासनस्य। अनेन सुभटस्य योधित्व[1]शूरत्वमुक्तम् ॥ १७४ ॥

175) [ सद्भावे प्रभुहृदये जीवे स्वर्गे यशसि जगति सकले। स्थापिते रणे शिरसि कृतकार्यो नर्तितः सुभटः ॥ ] सुभटो नर्तितः। किंविशिष्टः। कृतकार्यः। क सति। सद्भावे प्रभुहृदये, जीवे स्वर्गे, यशसि जगति सकले, रणे शिरसि स्थापिते कृतकृत्यः। सद्भावं युद्धे निष्कपटत्वं

1 J योधत्व

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



176) छिन्ने रणम्मि बहुपहुपसायमालापडिच्छिरे सीसे।
उत्तिण्णगरुयभारं व नच्चियं नरवरकबंधं ॥ १५ ॥

177) पक्खानिलेण पहुणो विरमउ मुच्छ त्ति पासपडिएण।
गिद्धंतकड्ढणं दूसहं पि साहिज्जइ भडेण ॥ १६ ॥

178) वच्छत्थलं च सुहडस्स रुहिरकुंकुमविलित्तयंगस्स।
वरकामिणि व्व चुंबइ उरे निसण्णा सिवा वयणं ॥ १७ ॥

जानानः स्वामी हृष्टहृदयः कृतः। कृतयुद्धः सन् मृतः स्वर्गे जीवं स्थापयामास। निःशङ्कयुद्धोत्थितकीर्तिप्रसरेण जगद् धवलयामास। मृतः सन् पतितशिरसा महीमानर्च। इति कृतकार्यो निष्कबन्धः सुभटो ननर्त। सुभटसहस्रमरणे रणे सुभटो नृत्यतीति बहुश्रुताः कथयन्ति। प्रायः सहस्रनाशे समरमुखे नृत्यति कबन्धः ॥ १७५ ॥

176) [ छिन्ने रणे बहुप्रभुप्रसादमालाप्रतीच्छिणि शीर्षे। उत्तीर्णगुरुकभारमिव नर्तितं नरवरकबन्धम् ॥ ] नरवरकबन्धं नर्तितम्। उत्प्रेक्षते। उत्तीर्णगुरुकभारमिव। कथं ज्ञायते। रणे शीर्षे छिन्ने सति। किंविशिष्टे शीर्षे। बहुप्रभुप्रसादमालाप्रतीक्षणशीले। अयं भावः। अनवरतप्राप्तस्वामिप्रसादवृन्दाप्यायितशरीरः सकलमेव कालं युद्धमेव वाञ्छते। ततश्च प्राप्तयुद्धः केन प्रकारेण स्वामिप्रसादानृण्यं यास्यामीति धिया विचिन्त्य तावद्युयुधे युधि, यावच्छिरो निपपात। ततश्च दत्तस्वामिप्रसाद उत्तीर्णशिरोभारः सन् ननर्तैव ॥ १७६ ॥

177) [ पक्षानिलेन प्रभोर्विरमतु मूर्छेति पार्श्वपतितेन। गृध्रान्त्रकर्षणं दुःसहमपि सह्यते भटेन ॥ ] भटेन गृध्रैरन्त्राकर्षणं दुःसहमपि सह्यते। किंविशिष्टेन[1]। स्वस्वामिपार्श्वपतितेन। किमिति जीवता सामर्थ्यवतापि सह्यत इत्याह। इति कथम्। प्रभोर्मूर्छा एतत्पक्षानिलेन विरमत्विति। एतेन स्वामिभक्तत्वं कौलीन्यं च दर्शितम् ॥ १७७ ॥

178) [ वक्षःस्थलं च सुभटस्य रुधिरकुंकुमविलिप्ताङ्गस्य। वरकामिनीव चुम्बत्युरसि निषण्णा शिवा वदनम् ॥ ] शिवा शृगाली

1 J reads here and elsewhere किंभूत or कथंभूत for किंविशिष्ट.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## १८. धवलवज्जा [ धवलपद्धतिः ]

179) संचुण्णियथोरजुयप्पहारसंजणियगरुयकिणसोहो।
धवलस्स महाभरकड्ढणाइ कंधो च्चिय कहेइ ॥ १ ॥

180) अह मरइ धुरालग्गो संचुण्णियसंधिबंधणो धवलो।
न हु पामरस्स विहुरे आरापरिघट्टणं सहइ ॥ २ ॥

181) अह तोडइ नियकंधं अह कड्ढइ गुरुभरम्मि दुव्वोज्झं।
धवलो धुरम्मि जुत्तो न सहइ उच्चारियं झक्कं ॥ ३ ॥

---

कस्यचित् सुभटस्योरसि निषण्णा वदनं चुम्बति। किंविशिष्टस्य? रुधिरमेव कुंकुमं तेन विलिप्ताङ्गस्य। वरकामिनीव। यथा वरकामिनी कुंकुमविलिप्ताङ्गस्य स्वकमितुः कामार्ता वदनं चुम्बति। अयं भावः। शस्त्रखण्डितशरीरस्रुतासृप्लावितमुखवक्षःस्थलं सुभटमवलोक्य शृगाली रुधिर-मांसलौल्यात् तदुपरि निपपात। अतोऽनुमीयते (? अत उपमीयते) वरकामिन्या सहेति ॥ १७८ ॥

179) [ संचूर्णितपृथुयुगप्रहारसंजनितगुरुककिणशोभः। धवलस्य महाभरकर्षणानि स्कन्ध एव कथयति ॥ ] धवलस्य महाभराकर्षणानि स्कन्ध एव कथयति। किंविशिष्टः। संचूर्णितदीर्घयुगप्रहारसंजनित-गुरुकिणशोभः। संचूर्णितश्चासौ विस्तीर्णयुगप्रहारसंजनितगुरुकिणशोभ-श्चेति कर्मधारयः ॥ १७९ ॥

180) [ अथ म्रियते धुरालग्नः संचूर्णितसन्धिबन्धनो धवलः। न खलु पामरस्य विधुर आरापरिघट्टनं सहते ॥ ] अथ म्रियते धुरालग्नः संचूर्णितसन्धिबन्धनः। न खलु विधुरे पामरस्य आरापरिघट्टनं सहते धवलः ककुद्मान् ॥ १८० ॥

181) [ अथ त्रोटयति निजस्कन्धमथ कर्षति गुरुभरे दुर्वाह्यम्। धवलो धुरि युक्तो न सहत उच्चारितं प्रेरणम् ॥ ] अथ त्रोटयति निजस्क-न्धम्, अथ कर्षति गुरुभरे दुर्वाह्यं वस्तु। धवलो धुरि युक्तो न सहत उच्चारितं प्रेरणम् ॥ १८१ ॥

वज्जा ४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



182) चिक्कणचिक्खल्लचहुट्टचक्कथक्के भरम्मि जाणिहिसि ।
अविसेसन्नय गहवइ परंमुहो जं सि धवलाणं ॥ ५ ॥

183) अमुणियगुणो न जुप्पइ[1] न मुणिज्जइ स य गुणो अजुत्तस्स ।
थक्के भरे विसूरइ अउव्ववग्गं गओ धवलो ॥ ६ ॥

184) सो च्चिय सयडे सो च्चिय हलम्मि सो च्चिय वहेइ पिट्ठीए ।
बहुगोधणो वि हलिओ नंदइ एक्केण धवलेण ॥ ६ ॥

185) कत्तो लब्भंति धुरंधराइ धवलाइ भरसमत्थाइं ।
अइविहुरे गुरुभारं कड्ढंति य लीलमत्ताए ॥ ७ ॥

182) [ चिक्कणकर्दममग्नचक्रस्थिते भरे ज्ञास्यसि । अविशेषज्ञ गृहपते पराङ्मुखो यदसि धवलेभ्यः ॥ ] गृहपतेऽविशेषज्ञ, यद् धवलेभ्यः पराङ्मुखोऽसि, तद् भरे ज्ञास्यसि । किंविशिष्टे भरे । चिक्कणः स्त्यानश्चासौ चिक्खल्लो कर्दमः, तत्र चहुट्टं मग्नं यत् चक्रं, तेन थक्को स्थितः । तस्मिन्नेवंविधे भरे सति । कश्चनाविशेषज्ञस्त्यक्तविधुरे सहायभूतभृत्यः पश्चाद्व्यसनशतपतितकुटुम्ब एवमुच्यते ॥ १८२ ॥

183) [ अज्ञातगुणो न युज्यते न ज्ञायते स च गुणोऽयुक्तस्य । स्थिते भरे खिद्यतेऽपूर्ववल्गां गतो धवलः ॥ ] अज्ञातगुणोऽनसि न योज्यते । स च गुणस्तस्यायोजितस्य न ज्ञायते । धवलोऽपूर्ववल्गां गतोऽपूर्वेण सह योजितो भरे स्थिते सति विसूरइ खिद्यते ॥ १८३ ॥

184) [ स एव शकटे स एव हले स एव वहति पृष्ठे । बहुगोधनोऽपि हालिको नन्दत्येकेन धवलेन ॥ ] हालिको ग्रामणीर्बहुगोधनोऽप्येकेन धवलेन नन्दति, हृष्यति, समृद्धो भवति वा । कथम् । तदेव दर्शयति । स एव शकटेऽनसि, स एव हले, स एव वहति पृष्ठायाम् । अतः कारणादेको धवलः सकलमपि कार्यं गृहपतेः साधयतीत्यर्थः ॥ १८४ ॥

185) [ कुतो लभ्यन्ते धुरंधरा धवला भरसमर्थाः । अतिविधुरे गुरुभरं कर्षन्ति च लीलामात्रेण ॥ ] कुतो लभ्यन्ते धुरंधरा भरसमर्था

1 I, J जुज्जइ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## १९. विंझवज्जा [ विन्ध्यपद्धतिः ]

186) दंतच्छोहं तडवियडमोडणं सरसपल्लवुल्लिहणं।
अइ विंझो च्चिय न सहइ ता करिणो कत्थ वच्चंति ॥ १ ॥

187) सा रेवा ताइ पाणियाइ ते च्चेव करिणिसंघाया।
सा सल्लइ सल्लइ गयवरस्स विंझं मुयंतस्स ॥ २ ॥

188) विंझेण विणा वि गया नरवइभवणेसु गोरविज्जंति।
विंझो न होइ अगओ गएहि बहुएहि वि गएहिं ॥ ३ ॥

189) गोमहिसतुरंगाणं पसूण सव्वाण जुज्जए ठाणं।
दद्धगइंदाण पुणो अह विंझो अह महाराओ ॥ ४ ॥

धवला: । अत्र प्राकृते पुंस्त्वेऽपि नपुंसकत्वम्[1] । यतस्तेऽतिविधुरे नघुत्तारे नघुच्चतटादौ गुरुभरं लीलयैव कर्वन्ति । एवंविधा धवला दुर्लभाः ॥१८५॥

186) [ दन्तक्षोभं तटविकटमोटनं सरसपल्लवोल्लेखनम् । यदि विन्ध्य एव न सहते तत् करिणः कुत्र व्रजन्ति ॥ ] दन्तक्षोभं, तटविकटमोटनं, सरसपल्लवोल्लेखनं सरसपल्लवत्रोटनं यदि विन्ध्यो न सहते तदा करिणः कुतो व्रजन्ति । न कुत्रापि ॥ १८६ ॥

187) [ सा रेवा तानि पानीयानि ते चैव करिणीसंघाताः । सा सल्लकी शल्यायते गजवरस्य विन्ध्यं मुञ्चतः ॥ ] सा रेवा नर्मदा । तानि लोकोत्तराणि स्वादूनि पानीयानि । त एव स्नेहलाः करिणीसंघाताः । गणिकारिकावृन्दानि (?) । सा सरसपल्लवा सल्लकी गजवरस्य शल्यायते । किं कुर्वतः । विन्ध्यं मुञ्चतः । एते पदार्था विन्ध्योत्पन्नाः ॥ १८७ ॥

188) [ विन्ध्येन विनापि गजा नरपतिभवनेषु गौरविता भवन्ति । विन्ध्यो न भवत्यगजो गजैर्बहुभिरपि गतैः ॥ ] विन्ध्येन विनापि गजा नरपतिभुवनेषु गौरव्यन्ते । विन्ध्योऽगजो न भवति गजैर्बहुभिरप्यन्यत्र गतैः । एतेन गजविन्ध्ययोरपि परस्परं शोभातिशयः ॥ १८८ ॥

189) [ गोमहिषतुरंगाणां पशूनां सर्वेषां युज्यते स्थानम् । दग्धगजेन्द्राणां पुनरथ विन्ध्योऽथ महाराजः ॥ १८९ ॥ ]

1 J अत्र प्राकृते नपुंसकेऽपि पुंस्त्वम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## २०. गयवज्जा [ गजपद्धतिः ]

190) वियलियमएण गयजोव्वणेण चलंतदंतमुसलेण।
अज्ज वि वणं सणाहं जूहाहिव पइ जियंतेण ॥ १ ॥

191) अज्ज वि संभरइ गओ मज्जंतो सरवरम्मि लीलाए।
जं करिणिकरग्गुम्मूलिएण पहओ मुणालेण ॥ २ ॥

192) मा सुमरसु चंदणपल्लवाण करिणाह गेण्ह तिणकवलं।
जा जह परिणमइ दसा तं तह धीरा पडिच्छंति ॥ ३ ॥

193) मा झिज्जसु अणुदियहं करिणिविओएण मूढ करिणाह।
सोक्खं न होइ कस्स वि निरंतरं एत्थ संसारे ॥ ४ ॥

---

190) [ विगलितमदेन गतयौवनेन चलद्दन्तमुसलेन। अद्यापि वनं सनाथं यूथाधिप त्वया जीवता ॥ ] हे यूथाधिप, अद्यापि त्वया जीवता वनं सनाथं सस्वामि। "पइ मइ" इति त्वया मयेत्यर्थे। किंविशिष्टेन। विगलितमदेन, गतयौवनेन, चलद्दशनमुसलेन ॥ १९० ॥

191) [ अद्यापि संस्मरति गजो मज्जन् सरोवरे लीलया। यत् करिणीकराग्रोन्मूलितेन प्रहतो मृणालेन ॥ ] अद्यापि गजः संस्मरति। किमिति। यत् प्रहतो मृणालेन। किंविशिष्टेन। करिणीकराग्रोन्मूलितेन। किं कुर्वन्। सरोवरे लीलया मज्जन् ॥ १९१ ॥

192) [ मा स्मर चन्दनपल्लवानां करिनाथ गृहाण तृणकवलम्। या यथा परिणमति दशा तां तथा धीराः प्रपद्यन्ते ॥ ] मा स्मर चन्दनपल्लवानां करिनाथ गृहाण तृणकवलम्। या यथा परिणमति दशा तां तथा धीराः प्रतीच्छन्ति। चन्दनपल्लवान् परित्यज्य प्राप्तानि तृणानि भक्षयेत्यर्थः ॥ १९२ ॥

193) [ मा क्षीयस्वानुदिवसं करिणीवियोगेन मूढ करिनाथ। सौख्यं न भवति कस्यापि निरन्तरमत्र संसारे ॥ ] हे मूढ करिनाथ, अनुदिवसं करिणीवियोगेन मा खिद्यस्व। सौख्यं न भवति कस्याप्यनवरतमत्र संसारे ॥ १९३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



194) जायासुयविरहविसंठुलस्स जूहाहिवस्स विंझम्मि।
ते सरसपल्लवा सल्लईइ विसकवलसारिच्छा ॥ ५ ॥

195) गरुयच्छुहाउलियस्स य वल्लहकरिणीसुहं भरंतस्स।
सरसो मुणालकवलो गयस्स हत्थे च्चिय विलीणो ॥ ६ ॥

196) तह नीससियं जूहाहिवेण चिरविलसियं भरंतेण।
करगहियं तिणकवलं हरियं जह झत्ति पज्जलियं ॥ ७ ॥

197) विरहपलित्तो रे वरगइंद मा भंज सयलवणराई।
उम्मूलिए वि विंझे विरहावत्था तह च्चेय ॥ ८ ॥

198) जूहाओ वणगहणं गहणाउ सरं सराउ गिरिसिहरं।
सिहराओ पुहविं नियइ हत्थी पियाविरहे ॥ ९ ॥

---

194) [ जायासुतविरहविसंष्ठुलस्य यूथाधिपतेर्विन्ध्ये। ते सरसपल्लवाः सल्लक्या विषकवलसदृक्षाः ॥ ] विन्ध्ये यूथाधिपतेस्ते सरसपल्लवाः सल्लक्या विषकवलसदृक्षाः। कारणं विशेषणद्वारेणाह। किंविशिष्टस्य यूथाधिपतेः। जायासुतविरहविसंष्ठुलस्य ॥ १९४ ॥

195) [ गुरुक्षुधाकुलितस्य च वल्लभकरिणीसुखं स्मरतः। सरसो मृणालकवलो गजस्य हस्त एव विलीनः ॥ ] गजस्य सरसो मृणालकवलो हस्त एव विलीनो हस्त एव स्थितः। न तु भक्षितः। कारणमाह। वल्लभकरिणीसुखं स्मरतः। कदाचिद् अक्षुधितो भवेत्। गरुयच्छुहाउलियस्स वि बृहत्क्षुधाकुलितस्यापि ॥ १९५ ॥

196) [ तथा निःश्वसितं यूथाधिपेन चिरविलसितं स्मरता। करगृहीतं तृणकवलं हरितं यथा झटिति प्रज्वलितम् ॥ ] तथा निःश्वसितं यूथाधिपेन चिरविलसितं स्मरता, यथा करगृहीतं हरितमपि आर्द्रतृणकवलं झटिति प्रज्वलितम् ॥ १९६ ॥

197) [ विरहप्रदीप्त रे वरगजेन्द्र मा भङ्ग्धि सकलवनराजीः। उन्मूलितेऽपि विन्ध्ये विरहावस्था तथैव ॥ ] विरहप्रदीप्त रे वरगजेन्द्र मा भञ्जय सकलवनराजीः, यतो विन्ध्येऽप्युन्मूलिते विरहावस्था तथैव ॥ १९७ ॥

198) [ यूथाद्वनगहनं गहनात्सरः सरसो गिरिशिखरम्। शिखरात्पृथिवीं पश्यति हस्ती प्रियाविरहे ॥ ] हस्ती प्रियाविरहे यूथाद्वन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



199) करिणिकरप्पियणवसरससल्लईकवलभोयणं दंती।
जइ न मरइ सुमरंतो ता किं किसिओ वि मा होउ ॥ १० ॥

## २१. सीहवज्जा [ सिंहपद्धतिः ]

200) किं करइ कुरंगी बहुसुएहि ववसायमाणरहिएहिं।
एक्केण वि गयघडदारणेण सिंही सुहं सुवइ ॥ १ ॥
201) जाइविसुद्धाण नमो ताण मइंदाण अहह जियलोए।
जे जे कुलम्मि जाया ते ते गयकुंभणिद्दलणा ॥ २ ॥

गहनं पश्यति, वाञ्छतीति यावत्। गहनात् सरः सरोवरम्। सरोवराद्गिरिशिखरम्। गिरिशिखरात् पृथ्वीं वाञ्छति। विरहासहनात् ( ? विरहासहनत्वात् ) क्वापि स्थितिं न भजते ॥ १९८ ॥

199) [ करिणीकरार्पितनवसरससल्लकीकवलभोजनं दन्ती। यदि न म्रियते स्मरंस्तदा किं कृशितोऽपि मा भवतु ॥ ] दन्ती यदि न म्रियते तदा कृशोऽपि किं मा भवतु। किं कुर्वन्। स्मरन्। किं तत्। करिणीकरार्पितनवार्द्रसल्लकीकवलभोजनम्। अयमत्र भावः। आत्मवल्लभाशुण्डादण्डार्पितसल्लकीकवलभोजनं स्मरतो मरणं संभवति का कथा कार्श्यस्येति ॥ १९९ ॥

200) [ किं करोति कुरङ्गी बहुसुतैर्व्यवसायमानरहितैः। एकेनापि गजघटादारकेण सिंही सुखं स्वपिति ॥ ] व्यवसायमानरहितैर्बहुसुतैः कुरङ्गी हरिणी किं करोति। तथा बहुसुतेष्वपि विद्यमानेषु मृगी न निर्भया भवति। सिंही पुनः सुखं स्वपिति, एकेनैव सुतेन सिंहकिशोरकेण। यतः किंविशिष्टेन। गजघटादारकेण। अत एव निर्भया सिंही भवतीत्यर्थः ॥ २०० ॥

201) [ जातिविशुद्धेभ्यो नमस्तेभ्यो मृगेन्द्रेभ्योऽहह जीवलोके। ये ये कुले जातास्ते ते गजकुम्भनिर्दलनाः ॥ ] अहह इति अद्भुते। तेभ्यो मृगेन्द्रेभ्यो नमो नमस्कारोऽस्तु। क्व। जीवलोके। किंविशिष्टेभ्यः। जातिविशुद्धेभ्यः। यतस्तेषां कुले ये ये जातास्ते ते गजकुम्भनिर्दलनाः ॥ २०१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



202) मा जाणह जह[1] तुंगत्तणेण पुरिसाण होइ सोंडीरं।
मडहो वि मइंदो करिवराण कुंभत्थलं दलइ ॥ ३ ॥
203) वेण्णि वि रण्णुप्पन्ना बज्झंति गया न चेव केसरिणो।
संभाविज्जइ मरणं न गंजणं धीरपुरिसाणं ॥ ४ ॥

२२. वाहवज्जा [व्याधपद्धतिः]

204) एक्कसरपहरदारियमाइंदगइंदजुज्झमाभिडिए।
वाहि न लज्जसि नच्चसि दोहग्गे पायडिज्जंते ॥ १ ॥

202) मा जानीत यथा तुङ्गत्वेन पुरुषाणां भवति शौण्डीर्यम्। लधुरपि मृगेन्द्रः करिवराणां कुम्भस्थलं दलयति ॥ ] पुरुषाणां तुङ्गत्वेन शौण्डीर्यं बलं भवति इति मा स्म जानीत। तुङ्गत्वेन न किमपि सिध्यति। मृगेन्द्रो लघुरपि करिवराणां हस्तिराजानां कुम्भस्थलं दारयति। केवलं तेज एव कारणं न तूच्चैस्त्वम्। मडहो लघुः। देशीयपदमिदम्। अग्रेऽपि वक्ष्यति मालतीपद्धतौ यथा "मडहा मालइकलिया" (गाथा २२०) इति ॥ २०२ ॥

203) [द्वावप्यरण्योत्पन्नौ बध्यन्ते गजा न चैव केसरिणः। संभाव्यते मरणं न कलङ्को धीरपुरुषाणाम् ॥ ] बध्यन्ते गजा न चैव केसरिणः। उभयेऽपि किंविशिष्टाः। अरण्योत्पन्नाः। यतो मरणमेव संभाव्यते न गंजनं विगोपकं धीरपुरुषाणाम् ॥ २०३ ॥

204) [एकशरप्रहारदारितमृगेन्द्रगजेन्द्रयुद्धे प्रवृत्ते। व्याधि न लज्जसे नृत्यसि दौर्भाग्ये प्रकट्यमाने ॥ ] एकशरप्रहारदारितमृगेन्द्रगजेन्द्रयुद्धे प्रवृत्ते, हे व्याधि व्याधवनिते, न लज्जसे, यन्नृत्यसि। यतः दौर्भाग्ये प्रकटीक्रियमाणे। अयं भावः। एकशरप्रहारपातितसिंहगजं भर्तारमवलोक्य शौर्यवतो वनितास्मीति गर्वायमाणा व्याधवधूर्ननर्त। तां च नृत्यन्तीं समवलोक्य तत्सखी ब्रूते। हे मूढे, त्वत्पतिश्चेत् त्वय्यासक्तो भवेत् ततः किं, बहुभिरपि शरप्रहारैर्हरिणं हन्ति। अत एव त्वय्यननुरक्तत्वाच्छवितक्षयाभावे गजेन्द्रमृगेन्द्रावेकेनैव शरेण जघान। अतस्तत्र नर्तनं निजदौर्भाग्यप्रकटनाय प्रस्तुतेदमिति। प्राकृते पहरपहारौ शब्दौ द्वावपि भवतः ॥ २०४ ॥

1 B, C, G, I, Laber जइ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



205) कत्तो तं रायघरेसु विलसियं जं घरम्मि वाहस्स ।
गयकुंभवियारियमोत्तिएहि जं जंगलं किणइ ॥ २ ॥

206) अज्ज कयत्थो दियहो वाहवहू रूवजोव्वणुम्मइया ।
सोहग्गं धणुरुंपच्छलेण रच्छासु विक्खिरइ ॥ ३ ॥

207) ओ खिप्पइ मंडलमारुएण गेहंगणाउ वाहीए ।
सोहग्गधयवडाइ व्व धणुरओरुंपरिंछोली ॥ ४ ॥

208) जह जह वड्ढंति थणा तह तह झिज्जंति पंच वत्थूणि ।
मज्झं पइ कोयंडं पलिजुवाणा सवत्तीओ ॥ ५ ॥

---

205) [ कुतस्तद्राजगृहेषु विलसितं यद्गृहे व्याधस्य । गजकुम्भ-विदारितमौक्तिकैर्यज्जाङ्गलं क्रीयते ।। ] कुतस्तद्राजगृहेषु विलसितं यद् गृहे व्याधस्य वर्तते । कथम् । यद्गजकुम्भविदारितमौक्तिकैरुपलक्षितं मांसं क्रीयते ।। २०५ ।।

206) [ अद्य कृतार्थो दिवसो व्याधवधू रूपयौवनोन्मत्ता । सौभाग्यं धनुरुल्लिखनच्छलेन रथ्यासु विकिरति ।। ] अद्य कृतार्थो दिवसो व्याधवधू रूपयौवनोन्मादिता सौभाग्यं धनुरुल्लिखनव्याजेन रथ्यासु विस्तृणोति । अयं भावः । तस्यामासक्तः शक्तिक्षयात् प्रत्यहं धनुस्तनूकरोति भर्ता । तस्य च त्वगुत्करं कचवरं रथ्यायां निक्षिपति तद्वधूः । ज्ञायते किलात्मीयं सौभाग्यं लोकेषु दर्शयति ।। २०६ ।।

207) [ अहो क्षिप्यते मण्डलमारुतेन गेहाङ्गणाद्व्याधवध्वाः । सौभाग्यध्वजपटानीव धनूरजस्त्वक्पङ्क्तिः ।। ] ओ अहो मंडलमारुएण मण्डलीवातेन धनूरजस्त्वक्पङ्क्तिः क्षिप्यत उड्डीयते । कस्मात् । गेहाङ्गणात् । सौभाग्यध्वजपताकेव व्याधवध्वाः ।। २०७ ।।

208) [ यथा यथा वर्धेते स्तनौ तथा तथा क्षीयन्ते पञ्च वस्तूनि । मध्यं पतिः कोदण्डः पल्लियुवानः सपत्न्यः ।। ] यथा यथा वर्धेते स्तनौ व्याधवध्वास्तथा तथा खिद्यन्ते ( ? क्षीयन्ते ) पञ्च वस्तूनि । कानि तानीत्याह । मध्यमुदरम् । पतिः । कोदण्डः । पल्लियुवानः । सपत्न्यः ॥ २०८ ॥

209) जह जह वड्ढंति थणा वियसइ मयणो सवम्महा दिट्ठी ।
तह तह वाहजुवाणो दियहे दियहे धणुल्लिहइ ॥ ६ ॥

210) जह जह न चडइ चावो उम्मिल्लइ करह पल्लिणाहस्स ।
तह तह सुण्हा विप्फुल्लगंडविवरुम्मुही हसइ ॥ ७ ॥

211) दिन्नं थणाण अग्घं करिणीजूहेण वाहवहुयाए ।
रंडत्तणं न पत्तं हे सुंदरि तुह पसाएण ॥ ८ ॥

212) सिहिपेहुणावयंसा वहुया वाहस्स गव्विरी[1] भमइ ।
गयमुत्तागहियपसाहणाण मज्झे सवत्तीणं ॥ ९ ॥

209) [ यथा यथा वर्धेते स्तनौ विकसति मदनः समन्मथा दृष्टिः । तथा तथा व्याधयुवा दिवसे दिवसे धनुरुल्लिखति ॥ ] दिवसे दिवसे प्रतिदिवसम् ॥ २०९ ॥

210) [ यथा यथा नारोहति चापो भ्रश्यते (स्रंसते) करात् पल्लिनाथस्य । तथा तथा स्नुषा विपुल्लगण्डविवरोन्मुखी भवति ॥ ] यथा यथा चापो न चटति, करह हस्तात उम्मिल्लइ भ्रश्यति । कस्य । पल्लिनाथस्य । तथा तथा सुण्हा वधूर्विस्फुल्लगण्डपराङ्मुखी हसति । अचटितप्रत्यञ्चं कराद् भ्रश्यच्च धनुर्दृष्ट्वा सुन्दरं मय्यासक्तोऽसौ प्रिय एवंविधामवस्थां प्राप्नोति विकसितकपोलं पराङ्मुखी हसति ॥ २१० ॥

211) [ दत्तः स्तनयोरर्घः करिणीयूथेन व्याधवध्वाः । रण्डात्वं न प्राप्तं हे सुन्दरि तव प्रसादेन ॥ ] करिणीजूहेण हस्तिनीवृन्देन व्याधवध्वाः स्तनयोरर्घो दत्तम् । किमिति । हे सुन्दरि तव स्तनयोः पूजनं कुर्मः । तव प्रसादतो रण्डात्वं न प्राप्तमस्माभिः । यदि त्वय्यनासक्तोऽभविष्यत् तर्हि त्वद्भर्तास्मत्पतिम् एकैकैवेषुणाहनिष्यत् । इदानीं त्वत्कुचप्रसादतो जीवद्धवाः स्म इति भावः ॥ २११ ॥

212) [ शिखिपिच्छावतंसा वधूर्व्याधस्य गर्ववती भ्राम्यति । गजमुक्तागृहीतप्रसाधनानां मध्ये सपत्नीनाम् ॥ ] व्याधस्य वधूर्गर्वोद्वहनशीला भ्राम्यति । क । मध्ये सपत्नीनाम् । किंविशिष्टानाम् । गजमुक्ताभिर्गृहीतप्रसाधनानाम् । सा च किंविशिष्टा । शिखिपिच्छावतंसा । तर्हि गर्वो-

1 G गव्विया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



213) वाणियय हत्थिदंता कत्तो अम्हाण वग्घकित्तीओ ।
उत्तुंगथोरथणवट्टसालसा जं वहू सुवइ ॥ १० ॥

214) वग्घाण नहा सीहाण केसरा मोत्तिया गइंदाणं ।
कत्तो वाणिय अम्हं मयचम्मपरिग्गहो नत्थि ॥ ११ ॥

२३. हरिणवज्जा [ हरिणपद्धतिः ]

215) हरिणा जाणंति गुणा रण्णे वसिऊण [1]गेयमाहप्पं ।
ताणं चिय नत्थि धणं जीयं वाहस्स अप्पंति ॥ १ ॥

216) अम्हाण तिणंकुरभोयणाण न हु किंचि संचियं दविणं ।
मह मंसपिंडतुट्ठो जइ वच्चइ ता अहं धन्नो ॥ २ ॥

दहनशीला कथम् । एता मत्तपत्नीः कामयमानस्तद्दिनेऽद्रवीभूतचित्तः शक्तिबाहुल्याद्गजान् हन्ति । गजशिरःपिण्डगलितमुक्ताफलैर्मण्डयति ताः । मय्यासक्तश्च क्षीणशक्तिस्तद्दिने मयूरं मारयति । तन्मयूरपिच्छावतंसका धन्याहमिति भावः ॥ २१२ ॥

213) [ वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृतयः । उत्तुंगपृथुस्तनपट्टसालसा यद्वधूः स्वपिति ॥ ] वाणिजक कुतोऽस्माकं हस्तिदन्ताः कुतश्च व्याघ्रकृतयो व्याघ्रचर्माणि, यतो हेतोरुत्तुंगविस्तीर्णस्तनपट्टसालसा वधूः स्वपिति ॥ २१३ ॥

214) [ व्याघ्राणां नखाः सिंहानां केसरा मौक्तिकानि गजेन्द्राणाम् । कुतो वाणिजास्माकं मृगचर्मपरिग्रहो नास्ति ॥ ] व्याघ्राणां नखाः सिंहानां केसरा मौक्तिकानि गजेन्द्राणां कुतो वाणिज अस्माकं मृगचर्मपरिग्रहोऽपि नास्ति । अत्रापि पूर्वोक्तो भावो ज्ञातव्यः ॥ २१४ ॥

215) [ हरिणाः जानन्ति गुणानरण्ये उषित्वा गेयमाहात्म्यम् । तेषामेव नास्ति धनं जीवं व्याधस्यार्पयन्ति ॥ २१५ ॥ ]

216) [ अस्माकं तृणाङ्कुरभोजनानां न खलु किमपि संचितं द्रविणम् । मम मांसपिण्डतुष्टो यदि व्रजति तदाहं धन्यः ॥ ] अस्माकं तृणाङ्कुरभोजनानां न खलु किमपि संचितं द्रविणं वर्तते । यद्यसौ गायनो व्याधो मम मांसपिण्डतुष्टो व्रजति तदाहं धन्यः ॥ २१६ ॥

1 G गीयमाहप्पं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



217) एक्केण वि सरउ सरेण वाह किं बीयएण गहिएण ।
एक्के पि वसइ जीयं हयास दोण्हं पि य सरीरे ॥ ३ ॥

218) सरसल्लिएण भणियं कंधं धुणिऊण जुण्णहरिणेण ।
गिज्जउ पुणो वि गिज्जउ जाव य कंठट्ठिओ जीवो ॥ ४ ॥

219) घाएण मओ सद्देण मई चोज्जेण वाहवहुया वि ।
अवलंभिऊण धणुहं वाहेण वि मुक्किया[1] पाणा ॥ ५ ॥

२५. करहवज्जा [करभपद्धतिः]

220) कंकेल्लिपल्लवोव्वेल्लमणहरे जइ वि नंदणे चरइ ।
करहस्स तह वि मरुविलसियाइ हियए खुडुक्कंति ॥ १ ॥

---

217) [ एकेनापि पूर्यतां शरेण व्याध किं द्वितीयेन गृहीतेन । एकोऽपि वसति जीवो हताश द्वयोरपि च शरीरे ॥ ] हे व्याध, एकेनापि शरेण सरउ पूर्यतां, किं द्वितीयेन गृहीतेन । एकमेव जीवं ( ? जीवितं ) द्वयोरप्यावयोर्दम्पत्योः शरीरे वसति । हे हताश । हता आशा येन तस्य संबोधनम् ॥ २१७ ॥

218) [ शरशल्यितेन भणितं स्कन्धं धूत्वा जीर्णहरिणेन । गीयतां पुनर्गीयतां यावच्च कण्ठस्थितो जीवः ॥ ] शरशल्यितेन भणितं स्कन्धं विधूय जीर्णहरिणेन । गीयतां पुनरपि गीयतां यावन्मम कण्ठस्थितो जीवः ॥ २१८ ॥

219) [ घातेन मृगः शब्देन मृगी आश्चर्येण व्याधवधूरपि । अवष्टभ्य धनुर्व्याधेनापि मुक्ताः प्राणाः ॥ ] घातेन मृगो मृत इत्यध्याहार्यम् । शब्देन म्रियमाणमृगशब्देन हरिणारटितेन मृगी मृता । चोज्जेण – " अहो एतस्या मृग्या अपि प्रेमातिरेकः," इत्याश्चर्येण व्याधवधूरपि । धनुरवष्टभ्य, " हरिणदम्पती तावन्मया मारितौ । मन्ये एतयोः पश्वोरपि प्रेमातिरेकमवलोक्य मृता । एतया विना ममापि जीवितेन किं कर्तव्यम् " इति व्याधेनापि मुक्ताः प्राणाः ॥ २१९ ॥

220) [ कङ्केल्लिपल्लवोद्वेलमनोहरे यद्यपि नन्दने चरति । करभस्य तथापि मरुविलसितानि हृदये आविर्भवन्ति ॥ ] कङ्केल्लिपल्लवोद्वेलमनोहरे

---

1 C मुंचिया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



221) ते गिरिसिहरा ते पीलुपल्लवा ते करीरकसरक्का ।
लब्भंति करह मरुविलसियाइ कत्तो वणेत्थम्मि ॥ २ ॥

222) पुणरुत्तपसारियदीहकंधरो करह किं पलोएसि ।
कत्तो लब्भंति मरुत्थलीउ दिव्वे पराहुत्ते ॥ ३ ॥

223) दीहुण्हपउरणीसाससोसियासेसपीलुसयसिहरो ।
कवलं पि न गेण्हसि करह मुद्ध किं चक्खियमपुव्वं ॥ ४ ॥

224) उन्नयकंधर मा जूर करह ता चरसु किं चि चरिऊण ।
तुह जोग्गा अक्कमरुत्थलीइ[1] तुंगा तरू कत्तो ॥ ५ ॥

---

यद्यपि नन्दने चरति, तथापि करभस्य मरुविलसितानि मरुस्थले कण्टकजालभक्षणानि हृदय आविर्भवन्ति ।। २२० ।।

221) [ तानि गिरिशिखराणि ते पीलुपल्लवास्ते करीरकुड्मलाः । लभ्यन्ते करभ मरुविलसितानि कुतो वनेऽत्र ।। ] तानि गिरिशिखराणि । प्राकृते नपुंसकेऽपि पुंस्त्वं क्वापि । ते पीलुपल्लवाः । ते करीरकसरक्का करीरकुड्मलस्वेच्छाभक्षणानि । एवंविधानि मरुविलसितानि कुतोऽत्र वने लभ्यन्ते । न कापीत्यर्थः ।। २२१ ।।

222) [ पुनरुक्तप्रसारितदीर्घकन्धरः करभ किं प्रलोकयसि । कुतो लभ्यन्ते मरुस्थल्यो दैवे पराङ्मुखे ।। २२२ ।। ]

223) [ दीर्घोष्णप्रचुरनिःश्वासशोषिताशेषपीलुशतशिखरः । कवलमपि न गृह्णासि करभ मुग्ध किमास्वादितमपूर्वम् ।। ] दीर्घोष्णप्रचुरनिःश्वासशोषिताशेषपीलुशतशिखरो यत् कवलमपि न गृह्णासि हे मुग्ध करभ किमपूर्वं भवतास्वादितम् ।। २२३ ।।

224) [ उन्नतकन्धर मा खिद्यस्व करभ तावद् चरस्व किंचिच्चरित्वा । तव योग्या अर्कमरुस्थल्यां तुङ्गास्तरवः कुतः ।। ] उन्नतकन्धर हे करभ मा खिद्यस्व । तत तस्माद् चरस्व किंचिच्चरित्वा । तव योग्या अर्कमरुस्थल्यस्तुङ्गास्तरवः कुतो वर्तन्ते, अपि तु न सन्ति ।। २२४ ।।

---

1 BC अक्कमरुत्थलीउ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



225) जं जीहाइ विलग्गं किंचि वरं मामि तस्स तं दिट्ठं।
थुक्केइ चक्खिउं वणसयाइ करहो धुयग्गीवो ॥ ६ ॥

226) अन्नेहिं पि न पत्ता पत्तलकरहेहि करह सा वेल्ली।
को एसो तुज्झ गहो जं चिंतसि विंझसिहराइं ॥ ७ ॥

## २५. मालईवज्जा [ मालतीपद्धतिः ]

227) तह तुह विरहे मालइ महिमंडलवंदणिज्जमयरंदे।
परिझीणं भमरउलं जह जायं मसयवंदं व ॥ १ ॥

---

225) [ यज्जिह्वायां विलग्नं किंचिद्वरं सखि तस्य तद्दृष्टम्। थूत्करोत्यास्वाद्य वनशतानि करभो धुतग्रीवः ॥ ] कश्चन युवा कांचनापूर्वां तरुणीमवलोक्य विरुद्धामपि पूर्वरमितामनाकलय्य तामलभमानः शिरो धूनयति। थूत्कारयति च। तं तादृशमवलोक्य सा रूपवती सखीं प्रति ब्रूते। हे मामि सखि, करभो धुतग्रीवो वनशतानि चक्खिउं आस्वादयितुं थूत्करोति। युक्तोऽयमर्थोऽथवा यद्विरुद्धमपि यस्य जिह्वायां लग्नम्। कोऽर्थः। यस्मै यद्रोचते तस्य तदेव वरम् इति भावः ॥ २२५ ॥

226) [ अन्यैरपि न प्राप्ता कृशकरभैः करभ सा वल्ली। क एष तव ग्रहो यच्चिन्तयसि विन्ध्यशिखराणि ॥ ] हे करभ, अन्यैरपि कृशकरभैरियं वल्ली न प्राप्ता। क एष तव ग्रहो यच्चिन्तयसि विन्ध्यशिखराणि। को भावः। इयं मत्सखी रन्तुम् अकुण्ठसौभाग्ययुक्तैरपि युवभिर्न प्रापे। त्वद्भाग्याच्च स्वयमप्यागतामिमां किमित्यवगणयसि यदन्यामवलोकयसि। को नाम तवाग्रह इति ध्वन्यते ॥ २२६ ॥

227) [ तथा तव विरहे मालति महीमण्डलवन्दनीयमकरन्दे। परिक्षीणं भ्रमरकुलं यथा जातं मशकवृन्दमिव ॥ ] हे मालति जाति, तव विरहे, महीमण्डलवन्दनीयमकरन्दे, तथा क्षीणं कृशीभूतं भ्रमरकुलं यथा मशकवृन्दमिव जातम् इत्युत्तरार्धः। भावार्थस्त्वयम्। कांचन नायिकामागत्य दूती वदति। हे महीमण्डलस्थितयुवप्रार्थनीयसौभाग्यवति, त्वद्विरहे सकलमपि युवजातं तथा तानवमवलम्बते यथा द्वित्रिषु दिनेष्वनिष्टमागमिष्यति ॥ २२७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



228) वड्ढसु मालइकलिए निब्भरमयरंदपरिमलुग्गारे।
मुंचंतु छप्पया सेसकुसुमसेवाकिलेसस्स ॥ २ ॥

229) वियसंतु नाम गंधुद्धुराउ सेसाउ कुसुमजाईओ।
इंदिंदिरस्स रणरणयकारणं मालई च्चेव ॥ ३ ॥

230) मउहं मालइकलियं महुयर दट्ठूण किं पराहुत्तो।
एत्तो पसरइ भुवणंतराइ गंधो वियंभंतो ॥ ४ ॥

228) [ वर्धस्व मालतीकलिके निर्भरमकरन्दपरिमलोद्गारे। मुञ्चन्तु षट्पदाः शेषकुसुमसेवाक्लेशम् ॥ ] हे मालतीकलिके निर्भरमकरन्दपरिमलोद्गारे वर्धस्व। किमिति। पुष्पितायां त्वयि षट्पदा अशेषकुसुमसेवाक्लेशान्मुच्यन्ताम्। अशेषकुसुमानि परित्यज्य त्वत्कुसुमान्येवास्वादयन्तु, इत्युत्तरार्धः। भावार्थः पुनरेषः। हे तामरसाक्षि निर्भरयौवनरमणीये भवन्ती सर्वावयवरूढप्रौढयौवनामालोक्य सर्वेऽपि युवानस्त्वामेवाहमहमिकया वाञ्छन्तु। भविष्यत्प्रौढतारुण्यारूढां नायिकां प्रति सखीवाक्यमिति ॥ २२८ ॥

229) [ विकसन्तु नाम गन्धोद्धुराः शेषाः कुसुमजातयः। इन्दिन्दिरस्य रणरणककारणं मालत्येव ॥ ] विकसन्तु नाम गन्धोद्धुराः शेषकुसुमजातयः। इन्दिन्दिरस्य भ्रमरस्य रणरणककारणं मालत्येव। अयमभिप्रायः। भवन्तु सर्वा अपि स्त्रियो, यूनः पुनः कस्यापि कर्णान्तविश्रान्तलोचना कुचयुगलपीड्यमानचिबुका, चम्पककलिकागौराङ्गी अवतीर्णतारुण्या युवती रणरणकहेतुर्भवति ॥ २२९ ॥

230) [ लघ्वीं मालतीकलिकां मधुकर दृष्ट्वा किं पराङ्मुखः। इतः प्रसरति भुवनान्तराणि गन्धो विजृम्भमाणः ॥ ] हे मधुकर लघ्वीं मालतीकलिकामवलोक्य किं पराङ्मुखः संजातः। यत इतो मालत्या गन्धः प्रसरति। किं कुर्वाणः। भुवनान्तराणि विजृम्भमाणो व्याप्नुवन्। अयं भावः। कश्चिद्युवानवतीर्णतारुण्यां नायिकामालोक्य तामकामयमानस्तत्सख्योच्यते। हे युवन् किं पराङ्मुखः संजातोऽसि। अस्याः स कोऽपि यौवनभरः समुल्लसिष्यति येन सकलनगरीनारीरप्यतिशयिष्यते ॥ २३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



231) मउहुलियाइ किं तुह इमीइ किं वा दलेहि तलिणेहिं।
आमोए महुयर मालईइ जाणिहिसि माहप्पं ॥ ५ ॥

232) तह वासियं वणं मालईइ कुसुमेहि निब्भरं सरए।
जह इत्थ तत्थ कत्थ वि भमरा दुक्खेहि लक्खंते ॥ ६ ॥

233) का समसीसी सह मालईइ सेसाण कुसुमजाईणं।
जस्स वि गंधविलित्ता भसला भसलेहि पिज्जंति ॥ ७ ॥

234) कलियामिसेण उब्भेवि अंगुलिं मालईइ महमहियं।
धरउ[1] जु धरणसत्थो मह एंतो महुयरजुवाणो ॥ ८ ॥

---

231) [ लघुतया किं तवैतस्याः किं पत्रैस्तलिनैः। आमोदे मधुकर मालत्या ज्ञास्यसि माहात्म्यम् ॥ ] हे मधुकर, एतस्या लघुतया किं तव, किंवा तलिणेहिं विरलैः स्तोकैर्वा दलैः पत्रैः। यतोऽस्या आमोदेन माहात्म्यं ज्ञास्यसि। अयं भावः। कश्चन युवा संपूर्णकुचयुगलां मुग्धां वामाक्षीमवलोक्य तत्सख्योच्यते। अस्याः सुरतपाण्डित्येन गुणातिशयं ज्ञास्यसि। एतां मुग्धां लघ्वीं मा ज्ञासीरिति ॥ २३१ ॥

232) [ तथा वासितं वनं मालत्या कुसुमैर्निर्भरं शरदि। यथात्र तत्र कुत्रापि भ्रमरा दुःखैर्लक्ष्यन्ते ॥ ] तथा वासितं मालत्या कुसुमैर्वनं निर्भरम्। क। शरदि। यथा अत्र तत्र कुत्रापि भ्रमरा दुःखैर्लक्ष्यन्ते ॥ २३२ ॥

233) [ का समशीर्षिका सह मालत्या शेषाणां कुसुमजातीनाम्। यस्यापि गन्धविलिप्ता भ्रमरा भ्रमरैः पीयन्ते ॥ ] शेषाणां कुसुमजातीनां मालत्या सह का प्रतिस्पर्धा। यस्या गन्धविलिप्ता भ्रमरा भ्रमरैरेव पीयन्ते। गन्धवासिता भ्रमराः कुसुमान्येतानीति भ्रान्त्या भ्रमरैरास्वाद्यन्ते। गन्धातिशयोक्तिरियम् ॥ २३३ ॥

234) [ कलिकामिषेणोर्ध्वीकृत्याङ्गुलिं मालत्या कथितम्। धरतु यो धरणसमर्थो माम् आयन् मधुकरयुवा ॥ ] कलिकाव्याजेनाङ्गुलिमूर्ध्वीकृत्य मालत्या महमहियं कथितमिति संज्ञा। किमित्याह। यो धारयितुं समर्थः स धारयतु मधुकरयुवा मां प्रत्यागच्छन्। भावोऽयम्। काचन नारी

---

1 B, C, G धरइ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



235) पक्खुक्खेवं नहसूइखंडणं भमरभरसमुव्वहणं ।
उव सहइ थरहरंती वि दुब्बला मालइ च्चेव ॥ ९ ॥

## २६. इंदिंदिरवज्जा [ इन्दिन्दिरपद्धतिः ]

236) इंदिंदिर छप्पय भसल भमर भमिओ सि काणणं सयलं ।
मालइसरिसं कुसुमं जइ दिट्ठं किं न ता भणसि ॥ १ ॥

237) कत्थ वि दलं न गंधं कत्थ वि गंधो न पउरमयरंदो ।
एक्ककुसुमम्मि महुयर बे तिन्नि गुणा न लब्भंति ॥ २ ॥

238) एक्कं महुयरहिययं तं चिय पुण मालईइ पडिरुद्धं ।
सेसा फुल्लंतु फलंतु पायवा को निवारेइ ॥ ३ ॥

---

सर्वाङ्गरूपवती सुभगा गर्वेण वक्ति । मद्रूपश्रियमवलोक्य यो युवा मामागच्छति तमेतं निवारयतु कश्चन यस्य शक्तिरस्ति ॥ २३४ ॥

235) [ पक्षोत्क्षेपं नखसूचिखण्डनं भ्रमरभरसमुद्वहनम् । पश्य सहते कम्पमानापि दुर्बला मालत्येव ॥ ] पक्षोत्क्षेपं नखसूचीखण्डनं भ्रमरभरसमुद्वहनं पश्य कम्पमानापि दुर्बला मालत्येव सहते ॥ २३५ ॥

236) [ इन्दिन्दिर षट्पद भसल भ्रमर भ्रान्तोऽसि काननं सकलम् । मालतीसदृशं कुसुमं यदि दृष्टं किं न तदा भणसि ॥ ] इन्दिन्दिर षट्पद भसल भ्रमर त्वं भ्रान्तोऽसि काननं सकलं, मालतीसदृशं कुसुमं यदि दृष्टं किं न तदा भणसि ॥ २३६ ॥

237) [ कुत्रापि दलं न गन्धः कुत्रापि गन्धो न प्रचुरमकरन्दः एककुसुमे मधुकर द्वौ त्रयो गुणा न लभ्यन्ते ॥ ] कुत्रापि दलं पत्रं न गन्धः । कुत्रापि गन्धो न प्रचुरमकरन्दः । एकस्मिन् कुसुमे हे मधुकर द्वौ त्रयो वा गुणा न लभ्यन्ते ॥ २३७ ॥

238) [ एकं मधुकरहृदयं तदेव पुनर्मालत्या प्रतिरुद्धम् । शेषाः पुष्यन्तु फलन्तु पादपाः को निवारयति ॥ ] एकं मधुकरहृदयं, तदेव मालत्या प्रतिरुद्धम् । मालती विना मधुकरहृदयं नान्यत्र रमते । अतः शेषाः पादपाः पुष्पन्तु फलन्तु, कस्तान्निवारयति ॥ २३८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



239) मालइ पुणो वि मालइ हा मालइ मालइ त्ति जंपंतो ।
उव्विग्गो[1] भमइ अली हिंडंतो सयलवणराई ॥ ४ ॥

240) रुणरुणइ वलइ[2] वेल्लइ पक्खउडं धुणइ खिवइ अंगाइं ।
मालइकलियाविरहे पंचावत्थं गओ भमरो ॥ ५ ॥

241) मालइविरहे रे तरुणभसल मा रुयसु निब्भरुक्कंठं ।
वल्लहविओयदुक्खं मरणेण विणा न वीसरइ ॥ ६ ॥

242) जाव न वियसइ सरसा वरइ न ईसं पि मालईकलिया ।
अविणीयमहुयरेहिं ताव च्चिय पाउमारद्धा ॥ ७ ॥

243) वियसंतसरसतामरसभसल वियसेइ मालई जाव ।
ता जत्थ व तत्थ व जह व तह व दियहा गमिज्जंति ॥ ८ ॥

239) [ मालति पुनरपि मालति हा मालति मालतीति जल्पन् । उद्विग्नो भ्रमत्यलिर्हिण्डमानः सकलवनराजीः ॥ ] मालति पुनरपि मालति हा मालति मालतीति जल्पन्नुद्विग्नो भ्रमत्यलिर्हिण्डमानः सकलवनराजीः । अयं भावः । सकलगुणयुक्तां मालतीमनवलोकयन् सकला अपि पुष्पजातीस्तृणायापि न मन्यत इत्यर्थः ॥ २३९ ॥

240) [ रुणरुणायते वलति वेल्लति पक्षपुटं धुनोति क्षिपत्यङ्गानि । मालतीकलिकाविरहे पञ्चावस्थां गतो भ्रमरः ॥ २४० ॥ ]

241) [ मालतीविरहे रे तरुणभ्रमर मा रोदीर्निर्भरोत्कण्ठम् । वल्लभवियोगदुःखं मरणेन विना न विस्मर्यते ॥ ] रे तरुण भ्रमर मा रोदीर्निर्भरोत्कण्ठम् । वल्लभवियोगदुःखं मरणेन विना न विस्मरति ॥ २४१ ॥

242) [ यावन्न विकसति सरसा वृणोति नेशमपि मालतीकलिका । अविनीतमधुकरैस्तावदेव पातुमारब्धा ॥ ] यावत्सरसा मालती न विकसति, ईसं पि न वरइ ईषदपि न वृणोति, अविनीतमधुकरैस्तावदेव पातुमास्वादयितुमारब्धा । अयं भावः । काचन नायिका अनवतीर्णतारुण्यापि प्रियैः पातुमारब्धा । परकीयासती नायिका ॥ २४२ ॥

243) [ विकसत्सरसतामरसभ्रमर विकसति मालती यावत् । तावद्यत्र वा तत्र वा यथा वा तथा वा दिवसा गम्यन्ते ॥ ] विकसत्सरस-

1 G उव्विण्णो 2 G चलइ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



244) छप्पय गमेसु कालं वासवकुसुमाइ ताव मा मुयसु।
मन्न जियंतो पेच्छसि पउरा' रिद्धी वसंतस्स ॥ ९ ॥

245) मा इंदिंदिर तुंगसु पंकयदलणिलय मालईविरहे।
तुंबिणिकुसुमाइ न संपडंति विव्वे पराहुत्ते ॥ १० ॥

246) इयरकुसुमेसु महुयर दे बंध रइं विमुंच रणरणयं।
झायंतो च्चिय मरिहिसि कत्तो ते मालई सरए ॥ ११ ॥

247) भमरो भमरो त्ति गुणोज्झिएहि कुसुमेहि ठाइओ दोसो।
लहिऊण मालई पुण सो निउणो भमउ जइ भमइ ॥ १२ ॥

---

तामरसेषु स्थितो योऽसौ भ्रमरस्तस्य संबोधनम्। हे विकसत्सरसकमलभ्रमर, यावन्मालती विकसति तावदत्र तत्र यथा तथा दिवसा नीयन्ताम् ॥ २४३ ॥

244) [ षट्पद गमयस्व कालं वासवकुसुमानि तावन्मा मुञ्च। मन्ये जीवन् पश्यसि प्रचुरा ऋद्धीर्वसन्तस्य ॥ ] षट्पद गमयस्व कालं समयम्। वासवकुसुमानि आटरूषकपुष्पाणि मा मुञ्च। किमिति। मन्न मन्ये अहमिति। जीवन् प्रचुरर्द्धिं वसन्तस्य पश्यसि ॥ २४४ ॥

245) [ मेन्दिन्दिर ताम्य पङ्कजदलनिलय मालतीविरहे। तुम्बिनि-कुसुमानि न संपतन्ति दैवे पराग्भूते ॥ ] हे भ्रमर मा तुंगसु मा भ्राम्य। तर्हि किं करोमीत्याह। मालतीविरहे पंकयदले कमलपत्रे निलय लग। यतो दैवे पराङ्मुखे तुम्बीकुसुमानि न संपद्यन्ते। आसतां चम्पककुसुमादीनि, अलाबुपुष्पाण्यपि न प्राप्यन्ते ॥ २४५ ॥

246) [ इतरकुसुमेषु मधुकर हे बधान रतिं विमुञ्च रणरणकम्। ध्यायन्नेव मरिष्यसि कुतस्ते मालती शरदि। ] दे इति प्रार्थनायां निपातः। हे मधुकर इतरकुसुमेषु बधान रतिं, विमुञ्च रणरणकम्। ध्यायन्नेव मरिष्यसि, कुतस्ते मालती शरदि ॥ २४६ ॥

247) [ भ्रमरो भ्रमर इति गुणोज्झितैः कुसुमैरारोपितो दोषः। लब्ध्वा मालतीं पुनः स निपुणो भ्रमतु यदि भ्रमति ॥ ] गुणोज्झितैः

---

1 G पवरा ( प्रवरा )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



248) कुंदलयामउलपरिट्ठिएण भरिऊण मालइविलासं।
तह नीससियं इंदिंदिरेण जह सा वि पज्जलिया॥ १३॥

249) वोसट्टबहुलपरिमलकेयइमयरंदवासियंगस्स।
हियइच्छियपियलंभा[1] चिरा सया कस्स जायंति॥ १४॥

250) वियलियदलं पि गंधोज्झियं पि विरसं पि मालईविडवं।
भसलेहिं नेय मुक्कं पढमरसं संभरंतेहिं॥ १५॥

कुसुमैर्यो दोष आरोपितः, अयं भ्रमरो भ्रमणं करोतीति भ्रमर इति दोषो भ्रमर आरोपितो नेदं युक्तम्। निपुणो विदग्धोऽयं भ्रमरो मालतीं प्राप्य यदि भ्रमति, तर्हि भ्रमतु। परमन्यत्र न यातीति। अयं भावः। सकला अपि नारीर्दर्शं दर्शं परिभ्रमति, परमेकामपि न कामयते सर्वाङ्गसुन्दरीमलभमानः। एवं स्थिते कामिन वक्ति। सर्वत्र परिभ्रमति, परं क्वापि स्थितिं न विधत्तेऽयम् इत्युपालभ्यते। तदुपालम्भनं श्रुत्वान्यः कश्चिद् ब्रूते। यदि मनोगतां सर्वगुणपरिपूर्णां प्राप्नोति, तर्हि न भ्राम्यतीति॥ २४७॥

248) [ कुन्दलतामुकुलपरिस्थितेन स्मृत्वा मालतीविलासम्। तथा निःश्वसितमिन्दिन्दिरेण यथा सापि प्रज्वलिता॥ ] कुन्दलतामुकुलोपरिस्थितेनेन्दिन्दिरेण मालतीविलासं स्मृत्वा तथा निःश्वसितं यथा सापि कुन्दलता प्रज्वलिता॥ २४८॥

249) [ विकसितबहलपरिमलकेतकीमकरन्दवासिताङ्गस्य। हृदयेप्सितप्रियालम्भाश्चिरात् सदा कस्य जायन्ते॥ ] विकसितबहुलपरिमलकेतकीमकरन्दवासिताङ्गस्य भ्रमरस्य हृदयेप्सितप्रियालम्भाश्चिरात् सदा कस्य जायन्ते॥ २४९॥

250) [ विगलितदलोऽपि गन्धोज्झितोऽपि विरसोऽपि मालतीविटपः। भ्रमरैर्नैव मुक्तः प्रथमरसं संस्मरद्भिः॥ ] मालतीविटपं भ्रमरैर्नैव मुक्तम्। कदाचित्सुन्दरं भवेदित्याह। विगलितदलं शटितपत्रमपि। गन्धोज्झितमपि, विरसमपि। तर्हि केन गुणेन न मुक्तमिति विशेषणद्वार

1 G वेलंभा ( for पियलंभा )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



251) ¹ढंखरसेसो वि हु महुयरेहि मुक्को न मालईविडवो।
दरवियसियकलियामोयबहलिमं संभरंतेहिं ॥ १६ ॥

252) निविडदलसंठियं पि हु कलियं वियसाविऊण सविसेसं।
जे पढमं तीइ रसं पियंति ते छप्पया छेया ॥ १७ ॥

२७. सुरतहविसेसवज्जा [ सुरतरुविशेषपद्धतिः ]

253) वसिऊण सग्गलोए गंधं गहिऊण पारिजायस्स।
रे भसल किं न लज्जसि चुंबंतो इयरकुसुमाइं ॥ १ ॥

कारणमाह। प्रथमरसं संस्मरता ( ? संस्मरद्भिः )। अयमर्थः यथा कश्चन युवातिक्रान्ततारुण्यामपि गुणगणयुक्तां नारीं प्रथमोपभुक्तां न त्यजति ॥ २५० ॥

251) [ पत्रपुष्परहितशाखाशेषोऽपि खलु मधुकरैर्मुक्तो न मालतीविटपः। दरविकसितकलिकामोदबाहुल्यं संस्मरद्भिः ॥ ] मधुकरैर्मुक्तो न मालतीविटपः। किंविशिष्टोऽपि। पत्रपुष्पादिरहितोऽपि खलु। को हेतुरिति विशेषणद्वारेणाह। ईषद्विकसितकलिकामोदबाहुल्यं संस्मरद्भिः ॥ २५१ ॥

252) [ निबिडदलसंस्थितामपि खलु कलिकां विकास्य सविशेषम्। ये प्रथमं तस्या रसं पिबन्ति ते षट्पदाश्छेकाः ॥ ] ये षट्पदा भ्रमरा निबिडदलसंस्थितामपि कलिकां विकास्य सविशेषं यथा स्यात्तथा, प्रथमं तस्या मालत्या रसं पिबन्ति ते छेका विदग्धाः। इदमैदंपर्यम्। यथा कश्चन कामुकः कांचनानवतीर्णतारुण्यां कयापि युक्त्या सुरतक्षमां विधाय तामुपभुङ्क्ते स निपुणो भवेदिति ॥ २५२ ॥

253) [ उषित्वा स्वर्गलोके गन्धं गृहीत्वा पारिजातस्य। रे भ्रमर किं न लज्जसे चुम्बन्नितरकुसुमानि ॥ ] हे भ्रमर स्वर्गलोके उषित्वा गन्धं गृहीत्वा पारिजातस्य वृक्षस्य, इतरकुसुमानि चुम्बन् लज्जसे। अयं भावः। प्रधानस्थानस्थितां निबिडकुचयुगलभरनम्यमानमध्यां मध्यवयसं नारीं रमित्वा, इदानीमितरनारीः कामयमानो न लज्जसे हे युवन्निति युगलभोक्तिः ॥ २५३ ॥

1 C ढंखर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



254) कत्तो लवंगकलिया इच्छं पूरेइ छेयभमरस्स।
अमरतरुमंजरिरसेण जस्स आणंदियं हिययं ॥ २ ॥

255) भमर भमंतेण तए अणेयवणगहणकाणणुद्देसे।
दिट्ठो सुओ य कत्थ वि सरिसतरू पारिजायस्स ॥ ३ ॥

256) अमरतरुकुसुममंजरि वाउहया महुयरेण जं रसिया।
तल्लद्धरसेण कओ संकप्पो सेसकुसुमाणं ॥ ४ ॥

## २८. हंसवज्जा [ हंसपद्धतिः ]

257) हंसो सि महासरमंडणो सि धवलो सि धवल किं तुज्झ।
खलवायसाण मज्झे ता हंसय कत्थ पडिओ सि ॥ १ ॥

---

254) [ कुतो लवङ्गकलिकेच्छां पूरयति छेकभ्रमरस्य। अमरतरुमञ्जरीरसेन यस्यानन्दितं हृदयम् ॥ ] कुतो लवङ्गकलिकेच्छां विदग्धभ्रमरस्य पूरयति, यस्यामरतरुमञ्जरीरसेन हृदयमानन्दितम्। सर्वगुणपरिपूर्णायाः कर्णान्तविश्रान्तलोचनायाः सुरते सुखीभूतहृदयस्य यूनो हृदयं सामान्यनारीरतं यथा नानन्दयति तथा केनचिदुच्यते ॥ २५४ ॥

255) [ भ्रमर भ्राम्यता त्वयानेकवनगहनकाननोद्देशम्। दृष्टः श्रुतश्च कुत्रापि सदृशतरुः पारिजातस्य ॥ ] हे भ्रमर त्वया पारिजातस्य सदृशस्तरुर्दृष्टः श्रुतः कुत्रापि। किं कुर्वता त्वया। अनेकवनगहनकाननोद्देशं भ्राम्यता ॥ २५५ ॥

256) अमरतरुकुसुममञ्जरी वायुहता मधुकरेण यद्रसिता। तल्लब्धरसेन कृतः संकल्पः शेषकुसुमानाम् ॥ ] अमरतरुकुसुममञ्जरी वायुहता यद्भ्रमरेणास्वादिता, तल्लब्धरसेन मधुकरेण तेन शेषकुसुमानां संकल्पो नियमः कृतः ॥ २५६ ॥

257) [ हंसोऽसि महासरोमण्डनमसि धवलोऽसि धवल किं तव। खलवायसानां मध्ये तस्माद्धंस कुत्र पतितोऽसि ॥ ] हंसोऽसि महासरोमण्डनमसि। त्वया विना तडागस्य कुतो लक्ष्मीः। धवलोऽसि, धवल किं तव कथ्यते। खलवायसानां मध्ये ततः कारणात् कुतः पतितोऽसि। अयमभिप्रायः। यथा कश्चिद् विपश्चित्प्रकाण्डः सकलपरिषन्मण्डनभूतः सज्जनशिरोमणिर्दुर्जनसंसन्मध्यगतः केनचिदेवमुच्यते ॥ २५७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



258) हंसो मसाणमज्झे काओ जइ वसइ पंकयवणम्मि ।
तह वि हु हंसो हंसो काओ काओ च्चिय वराओ ॥ २ ॥

259) अहिणवघणउच्छलिया सवित्थरा[1] जइ वि पाउसवसेण ।
तह वि हु किं सेविज्जइ वाहलिया रायहंसेहिं ॥ ३ ॥

260) बे वि सपक्खा तह बे वि धवलया बे वि सरवरणिवासा ।
तह वि हु हंसबयाणं जाणिज्जइ अंतरं गरुयं ॥ ४ ॥

261) नवणलिणमुणालुल्लोलमालियं हंस माणसं मोत्तुं ।
लज्जाइ कह न मूओ सेवंतो गामवाहलियं ॥ ५ ॥

---

258) [ हंसः श्मशानमध्ये काको यदि वसति पङ्कजवने । तथापि खलु हंसो हंसः काकः काक एव वराकः ॥ ] हंसः सितच्छदो यदि श्मशानमध्ये वसति, काकश्च पङ्कजवने, तथापि खलु हंसो हंसः काकः काक एव वराकः ॥ २५८ ॥

259) [ अभिनवघनोच्छलिता सविस्तरा यद्यपि प्रावृड्वशेन । तथापि खलु किं सेव्यते क्षुद्रनदी राजहंसैः ॥ ] तथापि खलु किं क्षुद्रनदी हंसैः सेव्यते, यद्यप्येवंभूता संजाता । अभिनवघनोच्छलिता एव पउत्तरा चलद्बहुजला । केन । प्रावृड्वशेन ॥ २५९ ॥

260) [ द्वावपि सपक्षौ तथा द्वावपि धवलौ द्वावपि सरोवरनिवासौ । तथापि खलु हंसबकयोर्ज्ञायतेऽन्तरं गुरुकम् ॥ ] यद्यपि द्वावपि सपक्षौ, द्वावपि धवलौ, द्वावपि सरोवरनिवासौ, तथापि हंसबकयोर्महदन्तरं ज्ञायते आकारदुरन्तत्वेनेति ॥ २६० ॥

261) [ नवनलिनमृणालोल्लोलमालितं हंस मानसं मुक्त्वा । लज्जया कथं न मृतः सेवमानो ग्रामक्षुद्रनदीम् ॥ ] हे हंस नवनलिनीमृणालोपलक्षिता उल्लोलास्तैर्मालितं मानसं सरो मुक्त्वा लज्जया कथं न मृतः । किं कुर्वाणः । सेवमानः । काम् । गामवाहलियं ग्रामजलनिर्गमनोद्भवनदीम् । इयं शृङ्गारे वर्तते । यथा कश्चन युवा कांचन विदग्धवनितां चलच्चमूरुचक्षुषमुपभुज्य निकृष्टां कामयमानः केनापि सख्यैवमुच्यते ॥ २६१ ॥

---

1 B, C, G पउत्तरा ( पयोत्तरा )

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



262) पक्केण य पासपरिट्ठिएण हंसेण होइ जा सोहा।
तं सरवरो न पावइ बहुएहि वि ढिंकसत्थेहि ॥ ६ ॥

263) माणससररहियाणं जह न सुहं होइ रायहंसाणं।
तह तस्स वि तेहि विणा तीरुच्छंगा न सोहंति ॥ ७ ॥

## २९. चंदवज्झा [ चन्द्रपद्धतिः ]

264) सव्वायरेण रक्खह तं पुरिसं जत्थ जयसिरी वसइ।
अत्थमिय चंदबिंबे ताराहि न कीरए जोण्हा ॥ १ ॥

265) जह जह वड्ढेइ ससी तह तह ओ पेच्छ घेप्पइ मएण।
वयणिज्जवज्जियाओ कस्स वि जइ हुंति रिद्धीओ ॥ २ ॥

---

262) [ एकेन च पार्श्वपरिस्थितेन हंसेन भवति या शोभा। तां सरोवरो न प्राप्नोति बहुभिरपि ध्वांक्षसार्थैः ॥ ] एकेनैव पार्श्वस्थितेन हंसेन भवति या शोभा, तां सरोवरो बहुभिरपि ढिंकसार्थैर्न प्राप्नोति ॥२६२॥

263) [ मानससरोरहितानां यथा न सुखं भवति राजहंसानाम्। तथा तस्यापि तैर्विना तीरोत्सङ्गा न शोभन्ते ॥ ] यथा मानससरोवररहितानां हंसानां सुखं न भवति, तथा तस्यापि मानसस्य तैर्विना तीरोत्सङ्गा न शोभन्ते ॥ २६३ ॥

264) [ सर्वादरेण रक्षत तं पुरुषं यत्र जयश्रीर्वसति। अस्तमिते चन्द्रबिम्बे ताराभिर्न क्रियते ज्योत्स्ना ॥ ] सर्वादरेण सर्वप्रयत्नेन तं पुरुषं रक्षत यत्र जयलक्ष्मीर्वसति। अमुमेवार्थमर्थान्तरेण साधयति। अस्तमिते चन्द्रमण्डले ताराभिर्ज्योत्स्ना न क्रियत इति ॥ २६४ ॥

265) [ यथा यथा वर्धते शशी तथा तथाहो पश्य गृह्यते मृगेण (मदेन)। वचनीयवर्जिताः कस्यापि यदि भवन्त्यृद्धयः ॥ ] यथा यथा वर्धते शशी। 'ओ' इति अहो। पश्य गृह्यते मृगेण, मदेन च गर्वेण। वचनीयवर्जिताः कस्यचिद् यदि भवन्त्यृद्धयः। न तु सर्वेषाम्। यथा यथा पुमान् अर्थेन गुणगणेन परिपूर्णो भवति तथा तथा गर्वायत इति। निर्मदो भाग्यवानेको न तु सर्वे लक्ष्मीपूरिता इति ॥ २६५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



266) जइ चंदो किं बहुतारएहि बहुएहि किं च तेण विणा।
जस्स पयासो लोए धवलेइ महामहीवट्ठं[1] ॥ ३ ॥

267) चंदस्स खओ न हु तारयाण रिद्धी वि तस्स न हु ताणं।
गरुयाण चडणपडणं इयरा उण निच्चपडिया य ॥ ४ ॥

268) रयणायरम्मि जम्मो हरसिरतिलओ सहोयरा लच्छी।
विहडियकलाकलावो वसिया वि समोहए चंदो ॥ ५ ॥

269) हरसिरसरणम्मि गओ लुक्कंतो तह जडाण मज्झम्मि।
तह वि गिलिज्जइ चंदो विहिविहियं को निवारेइ ॥ ६ ॥

266) [ यदि चन्द्रः किं बहुतारकाभिर्बहुभिः किं च तेन विना। यस्य प्रकाशो लोके धवलयति महामहीपृष्ठम् ॥ ] यदि चन्द्रोऽस्ति किं बहुतारकैः। बहुभिस्तैः किं च तेन विना, यस्य प्रकाश एव, आस्तां तावत् किरणनिकुरुम्बो, महन्महीतलं धवलयति ॥ २६६ ॥

267) [ चन्द्रस्य क्षयो न खलु तारकाणामृद्धिरपि तस्य न खलु तासाम्। गुरुकाणामारोहणपतनमितरे पुनर्नित्यपतिताश्च ॥ ] चन्द्रस्य क्षयो न खलु तारकाणाम्। ऋद्धिरपि तस्य न खलु तेषाम्। महतां चटनपतनं, न क्षुद्राणाम्। इतरे पुनः क्षुद्राः पतिता एव। महतां हानिवृद्धी भवतः, क्षुद्राणां लघूनां सर्वदा हानिरेवेत्यर्थः ॥ २६७ ॥

268) [ रत्नाकरे जन्म हरशिरस्तिलकः सहोदरा लक्ष्मीः। विघटितकलाकलापो दशामपि समीहते चन्द्रः ॥ ] सोऽयं चन्द्रो विघटितकलाकलापो द्वैतीयिको दशामपि वस्त्राञ्चलस्थितं तन्तुपुञ्जमपि समीहते वाञ्छति। लोकेभ्य इति शेषः। य एवंविधः। यस्य जन्म रत्नाकरे। यश्च त्रिभुवनतिलको ज्योत्स्नावत्त्वात्। सहोदरा लक्ष्मीः। एवंविधोऽपि विघटितकलाकलापो दशां समीहत इति ॥ २६८ ॥

269) [ हरशिरःशरणे गतो निलीयंस्तथा जटानां मध्ये। तथापि गिल्यते चन्द्रो विधिविहितं को निवारयति ॥ ] तथापि चन्द्रो निजैगिल्यते, अर्थाद्राहुणा, यद्यपि हरशिरसि शरणं गतः। तत्रापि गतः

1 G महासहोवट्ठं ( महामहीपट्टम् )

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ३०. छइल्लवज्जा [ विदग्धपद्धतिः ]

270) नयरं न होइ अट्टालएहि पायारतुंगसिहरेहिं।
गामो वि होइ नयरं जत्थ छइल्लो जणो वसइ ॥ १ ॥

271) निवसंति जत्थ छेया ललियक्खरकव्वबंधणे कुसला।
जाणंति वंकभणियं सुंदरि नयरं, न सो गामो ॥ २ ॥

272) जो जंपिऊण जाणइ जंपियमत्तं च जाणए अत्थं।
देसो तेण पवित्तो अच्छउ नयरं वसंतेण ॥ ३ ॥

273) गुरुविहवलंघिया¹ अवि आवइ पत्ता वि आउरमणा वि।
सिविणंतरे वि छेया नियकज्जं नेय सिढिलेंति ॥ ४ ॥

संस्तथा च जटानां मध्ये लुकंतो निलयन्। युक्तोऽयमर्थः। यद्यपि भर्गजटाटवीललाटपट्टे लिनाति तथापि राहुणा द्विरा निजेगिल्यते ॥ २६९॥

270) [ नगरं न भवत्यट्टालकैः प्राकारतुङ्गशिखरैः। ग्रामोऽपि भवति नगरं यत्र विदग्धो जनो वसति ॥ ] नगरं न भवत्यट्टालकैः प्रासादपङ्क्तिभिः, प्राकारतुङ्गशिखरैः। ग्रामोऽपि भवति नगरं यत्र विदग्धो जनो वसति। अट्टालकप्राकारशिखरसंयुक्तं नगरं विदग्धजनवर्जितं ग्रामादप्यतिशेते। विदग्धजनपवित्रितो ग्रामो नगरमधःकुरुत इति भावः ॥२७०॥

271) [ निवसन्ति यत्र च्छेका ललिताक्षरकाव्यबन्धने कुशलाः। जानन्ति वक्रभणितं सुन्दरि नगरं, न स ग्रामः ॥ ] हे सुन्दरि, तन्नगरं, न स ग्रामो यत्र च्छेका निवसन्ति। किंविशिष्टाः। ललिताक्षरकाव्यबन्धने कुशलाः। तथा च वक्रभणितं जानन्ति, अन्योक्तीर्विदन्ति ॥ २७१ ॥

272) [ यो जल्पितुं जानाति जल्पितमात्रं च जानात्यर्थम्। देशस्तेन पवित्र आस्तां नगरं वसता ॥ ] यो विदग्धो जल्पितुं जानाति, अर्थाद् वक्रभणितीः। जल्पितमात्रमप्यभिप्रेतं जानाति। देशो नीवृज्जनपद इति यावत्। वसता तेन पवित्र आस्तां तावन्नगरम्। एकस्मिन्नगरे विदग्धो वसति, सर्वमपि देशं मण्डयतीत्यर्थः ॥ २७२ ॥

273) [ गुरुविभवलङ्घिता अप्यापदं प्राप्ता अप्यातुरमनसोऽपि। स्वप्नान्तरेऽपि च्छेका निजकार्यं नैव शिथिलयन्ति ॥ ] स्वप्नान्तरेऽपि च्छेका

1 C गुरुनेहलंघिया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



274) अन्नं धरंति हियए अन्नं वायाइ कीरए अन्नं।
छेयाण पत्थिवाण य खलाण मग्गो च्चिय अउव्वो ॥ ५ ॥
275) छेयाण जेहि कज्जं न हु होसइ जेहि जम्मलक्खे वि[1]।
दोहिं पि तेहि सरिसंसरिस च्चिय[2] हुंति उल्लावा ॥ ६ ॥
276) सब्भावबाहिरेहिं तह कह वि पियक्खरेहि जंपंति।
जह बंधव त्ति कलिउं लोए सीसेहि वुब्भंति ॥ ७ ॥
277) दिट्ठीतुलाइ भुवणं तुलंति जे चित्तचेलए निहियं।
को ताण छेयवाणिज्जयाण भण खंडणं कुणइ ॥ ८ ॥

---

निजकार्यं नैव शिथिलयन्ति। किंविशिष्टा अपि। गुरुनिभवलङ्घिता अपि, आपदं प्राप्ता अपि आपन्ना अपि, आतुरमनसोऽपि ॥ २७३ ॥

274) [ अन्यद्धरन्ति हृदयेऽन्यद्वाचि क्रियतेऽन्यत्। छेकानां पार्थिवानां च खलानां मार्ग एवापूर्वः ॥ ] अन्यद्धरन्ति हृदये, अन्यद् वाचि, अन्यत् कृत्ये कर्तव्ये। छेकानां पार्थिवानां खलानां मार्ग एवापूर्वः ॥२७४॥

275) [ छेकानां यैः कार्यं न खलु भविष्यति यैर्जन्मलक्षेऽपि। द्वाभ्यामपि ताभ्यां सदृशासदृशा एव भवन्त्युल्लापाः ॥ ] छेकानां यैः कार्यं भवति, यैश्च जन्मलक्षेऽपि कार्यं न स्याद् द्वयोरपि तयोः सदृशासदृशा एवोल्लापा भवन्ति ॥ २७५ ॥

276) [ सद्भावबहिर्भूतैस्तथा कथमपि प्रियाक्षरैर्जल्पन्ति। यथा बान्धवा इति कलयित्वा लोके शीर्षैरुह्यन्ते ॥ ] सद्भावबहिर्भूतैः प्रियाक्षरैस्तथा कथमपि जल्पन्ति, यथा बान्धवा एत इति लोके शिरोभिरुह्यन्ते धार्यन्ते ॥ २७६ ॥

277) [ दृष्टितुलया भुवनं तुलयन्ति ये चित्ततुलापात्रे निहितम्। कस्तेषां छेकवणिजां भण खण्डनं करोति ॥ ] ये छेका विदग्धा एव वणिजो भुवनं तुलंति इयत्तया परिच्छिन्दन्ति। कया। दृष्टितुलया। किंविशिष्टं भुवनम्। निहितं स्थापितम्। क। चित्तचेलए चित्तमेव

1 G जम्मलक्खेहि 2 C दोहिं पि य तेहि समं सरिस च्चिय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



278) तं नत्थि तं न हूयं न हु होसइ तं च तिहुयणे सयले।
तं विहिणा वि न विहियं जं न हु नायं छइल्लेहिं[1] ॥ ९ ॥

279) जह पढमदिणे तह पच्छिमम्मि फरुसाइं नेय जंपंति।
अहो महाणुभावा विरज्जमाणा वि दुल्लक्खा ॥ १० ॥

280) बहुकूडकवडभरियाण पुत्ति छेयाण जो पिडे पडइ।
सो सुन्नो सुन्नमणो सिविणे वि न पावए सुक्खं ॥ ११ ॥

281) जइ कह वि ताण छप्पन्नयाण[2] तणुयंगि गोयरे पडसि।
ता धोरवसणदाहेक्कमंडिया दुक्करं जियसि ॥ १२ ॥

---

तुलापात्रं तस्मिन्। तेषां छेकवणिजां भण को नाम खण्डनं करोति, को नाम तान् प्रतारयति ॥ २७७ ॥

278) [ तन्नास्ति तन्न भूतं न खलु भविष्यति तच्च त्रिभुवने सकले। तद्विधिनापि न विहितं यन्न खलु ज्ञातं विदग्धैः ॥ ] तन्नास्ति तन्न भूतं न खलु भविष्यति त्रिभुवने सकले, तद्विधिनापि न कृतं यन्न खलु ज्ञातं विदग्धैः ॥ २७८ ॥

279) [ यथा प्रथमदिने तथा पश्चिमेपि परुषाणि नैव जल्पन्ति। अहो महानुभावा विरज्यमाना अपि दुर्लक्ष्याः ॥ ] यथा प्रथमदिने तथा पश्चिमेऽपि परुषाणि नैव जल्पन्ति, अहो महानुभावाश्छेका विरज्यमाना अपि दुर्लक्ष्याः ॥ २७९ ॥

280) [ बहुकूटकपटभृतानां पुत्रि छेकानां जो पिटे पतति। स शून्यः शून्यमनाः स्वप्नेऽपि न प्राप्नोति सौख्यम् ॥] हे पुत्रि, बहुकूटकपटभृतानां छेकानां जो पिडे पडइ यस्तद्वशीभवति, स शून्यः शून्यमनाः स्वप्नेऽपि न प्राप्नोति सुखम् ॥ २८० ॥

281) [ यदि कथमपि तेषां षट्प्रज्ञानां तन्वङ्गि गोचरे पतसि। तद् महद्व्यसनदाहैकमण्डिता दुष्करं जीवसि ॥ ] हे तन्वङ्गि, यदि कथमपि तेषां छेकानां गोचरे पतसि, दृग्गोचरीभवसि, तदा उत्सृष्टवृषभदाहैकमण्डिता दुष्करं जीवसि ॥ २८१ ॥

---

1 G, I छयल्लेहिं 2 C छेयइयाण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



282) मा पुत्ति वंकवंकं जंपसु पुरओ छइल्ललोयाणं।
हियए जं च निहित्तं तं पि ह्रयासा मुणंति बुद्धीए ॥ १३ ॥

283) लीलावलोयणेण वि मुणंति जे पुत्ति हिययपरमत्थं।
ते कारिमउवयारेहि कह नु छेया छलिज्जंति ॥ १४ ॥

284) सहस त्ति जं न दिट्ठो सरलसहावेण जं न आलत्तो।
उवयारो जं न कओ तं चिय कलियं छइल्लेहिं ॥ १५ ॥

३१. पंचमवज्जा [ पञ्चमपद्धतिः ]

285) कंठब्भंतरणिग्गयदरघोलिरघुरघुरंतहुंकारं।
खलिरक्खरं पि मारइ पंथिय मा पंचमं सुणसु ॥ १ ॥

---

282) [ मा पुत्रि वक्रवक्रं जल्प पुरतश्छेकलोकानाम्। हृदये यच्च निहितं तदपि हताशा जानन्ति बुद्ध्या ॥ ] मा पुत्रि वक्रवक्रं जल्प पुरतो विदग्धजनानाम्। एते हताशा हृदये निहितं हृद्गतं यद् भवति तदपि स्वबुद्ध्या जानन्ति। अनुक्तमपि ये जानते तेषां पुरतो वक्रभणितयः काः ॥ २८२ ॥

283) [ लीलावलोकनेनापि जानन्ति ये पुत्रि हृदयपरमार्थम्। ते कृत्रिमोपचारैः कथं नु च्छेकाश्छल्यन्ते ॥ ] हे पुत्रि, ये विदुरा लीलाविलोकनेनापि हृदयपरमार्थं विदन्ति जानन्ति, ते छेका धूर्ताः कृत्रिमोपचारैः कथं नु प्रतार्यन्ते ॥ २८३ ॥

284) [ सहसेति यन्न दृष्टः सरलस्वभावेन यन्नालपितः। उपचारो यन्न कृतस्तदेव कलितं छेकैः ॥ ] यत्स प्रियो झटिति न दृष्टः, सरलस्वभावेन यन्नालपितः, उपचारो यन्न कृतस्तदप्याकलितं विदग्धैः ॥२८४॥

285) [ कण्ठाभ्यन्तरनिर्गतदरघूर्णनशीलघुरघुरायमाणहुङ्कारम्। स्खलनशीलाक्षरमपि मारयति पथिक मा पञ्चमं शृणु ॥ ] हे पथिक, पञ्चमरागं मा श्रावीः। यतः स्खलनशीलाक्षरमपि मारयति। तदेव स्खलनमुच्यते। कण्ठाभ्यन्तरान्निर्गतं च नदीवद्घुरघुरायमाणहुङ्कारम्। अत एव स्खलिताक्षरमपि मारयति ॥ २८५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



286) घोलंततारवण्णुज्जलेण वरतरुणिकण्णलग्गेण ।
लोयणजुयलेण व पंचमेण भण को न संतविओ ॥ २ ॥

287) अन्ने वि गामराया गिज्जंता देंति सयलसोक्खाइं ।
एयस्स पुणो हयपंचमस्स अन्नो चमक्कारो ॥ ३ ॥

288) अप्पणकज्जेण वि दीहरच्छि थोरयरदीहरणरणया ।
पंचमसरपसरुग्गारगब्भिणा एंति नीसासा ॥ ४ ॥

289) तं वंचिओ सि पिययम तीए बाहोहसंवलिज्जंता ।
न सुया नीसासखलंतमंथरा पंचमतरंगा ॥ ५ ॥

---

286) [ घूर्णमानतारवर्णोज्ज्वलेन वरतरुणीकर्णलग्नेन । लोचनयुगलेनेव पञ्चमेन भण को न संतापितः ।। ] भण कथय पञ्चमेन पञ्चमरागेण को न सन्तापितः । किंविशिष्टेन । वरतरुणीकर्णलग्नेन । पुनः किंविशिष्टेन । घूर्णमानास्तारा ये वर्णा अक्षराणि तैरुज्ज्वलेन । केनेव सन्तापितः । लोचनयुगलेनेव । यथा लोचनयुगलेन सर्वोऽपि जनः सन्तापितः । तेनापि किंविशिष्टेन । वरतरुणीकर्णलग्नेन कर्णान्तविश्रान्तेन । घूर्णमाना तारा कनीनिका, तस्या वर्णस्तेनोज्ज्वलं भासुरं, तेन तथा ॥ २८६ ॥

287) [ अन्येऽपि ग्रामरागा गीयमाना ददति सकलसौख्यानि । एतस्य पुनर्हतपञ्चमस्यान्यश्चमत्कारः ॥ २८७ ॥ ]

288) [ आत्मकार्येणापि दीर्घाक्षि महत्तरदीर्घरणरणकाः । पञ्चमस्वरप्रसरोद्गारगर्भिता आयन्ति निःश्वासाः ।। ] हे दीर्घाक्षि, आत्मकार्येणापि विस्तीर्णतरदीर्घरणरणकाः, पञ्चमस्वरप्रसरोद्गारगर्भिता आयान्ति निःश्वासाः ॥ २८८ ॥

289) [ त्वं वञ्चितोऽसि प्रियतम तस्या बाष्पौघसंवल्यमानाः । न श्रुता निःश्वासस्खलन्मन्थराः पञ्चमतरङ्गाः ।। ] हे प्रियतम त्वं वञ्चितोऽसि, यतः पञ्चमतरङ्गा न श्रुतास्त्वया । किंविशिष्टाः सन्तः । तस्या बाष्पौघमिश्रीक्रियमाणाः । पुनः कीदृशाः । निःश्वासस्खलन्मन्थराः ॥ २८९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



290) सुम्मइ पंचमगेयं पुज्जिज्जइ वसहवाहणो देवो।
हियइच्छिओ रमिज्जइ संसारे इत्तियं सारं ॥ ६ ॥

## ३२. नयणवज्जा [ नयनपद्धतिः ]

291) नयणाइ समाणियपत्तलाइ परपुरिसजीवहरणाइं।
असियसियाइ य मुद्धे खग्गाइ व कं न मारंति ॥ १ ॥

292) जत्तो नेहस्स भरो तत्तो निवडंति कसणधवलाइं।
चलचलयकोडिमोडणकराइ नयणाइ तरुणीणं ॥ २ ॥

293) सवियारसविब्भमरहसवसविसइंतमणहरुद्दामा।
मयणाउलाण दिट्ठी लक्खिज्जइ लक्खमज्झम्मि ॥ ३ ॥

---

290) [ श्रूयते पञ्चमगेयं पूज्यते वृषभवाहनो देवः। हृदयेप्सितो रम्यते संसार एतावत्सारम् ॥ ] संसार एतावन्मात्रं सारम्। किं तदित्याह। पञ्चमगेयं श्रूयते। वृषभवाहनो देवः पूज्यते। हृदयेप्सितो रम्यते ॥२९०॥

291) [ नयने समानीततीक्ष्णे (°तीक्ष्णौ) परपुरुषजीवहरणे (°हरणौ)। असितसिते (असितशितौ) च मुग्धे खड्गाविव कं न मारयतः ॥ ] हे मुग्धे, तव नयने कं न मारयतः। काविव। खड्गाविव। यथा खड्गौ मारयतः। अधुना श्लेषमाह। समानीते च पत्रले च तीक्ष्णाग्रे, परपुरुषजीवहरणे असितसिते च। खड्गपक्षे पुंस्त्वेन व्याख्येयम् ॥ २९१ ॥

292) [ यतः स्नेहस्य भरस्ततो निपतन्ति कृष्णधवलानि। चञ्चलकोटिमोटनकराणि नयनानि तरुणीनाम् ॥ ] तरुणीनां नयनानि यतः स्नेहस्य भरो भवति तत्र निपतन्ति कृष्णधवलानि। आत्मवल्लभं दृष्ट्वा कटाक्षैः पश्यन्ति तरुण्यः। कटाक्षास्त्वसिताःसिताः। पुनः किंविशिष्टानि। चञ्चलकोटिमोटनकराणि ॥ २९२ ॥

293) [ सविकारसविभ्रमरभसवशविकसन्मनोहरोद्दामा। मदनाकुलानां दृष्टिर्लक्ष्यते लक्षमध्ये ॥ ] मदनाकुलानां दृष्टिर्लक्षजनमध्येऽपि लक्ष्यते। किंविशिष्टा। सविकारसविभ्रमरभसवशविकसन्मनोहरोद्दामा ॥ २९३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



294) जत्तो विलोलपम्हलधवलाइ चलंति¹ नवर नयणाइं।
आयण्णपूरियसरो तत्तो च्चिय धावइ अणंगो ॥ ४ ॥

295) कस्स न भिंदइ हिययं अणंगसरधोरणि व्व निवडंती।
बालाइ वलिय²लोयणफुरंतमयणालसा दिट्ठी ॥ ५ ॥

296) नयणाइ तुज्झ सुंदरि विसेण भरियाइ निरवसेसाइं।
एमइ मारेंति जणं अलज्जि किं कज्जलं देसि³ ॥ ६ ॥

297) ईसिसिदिन्नकज्जलणीलुप्पलसच्छहेहि नयणेहिं।
वम्महमत्ता बाला मइया इव भमइ उत्तट्ठा ॥ ७ ॥

---

294) [यतो विलोलपक्ष्मलधवलानि चलन्ति केवलं नयनानि। आकर्णपूरितशरस्तत एव धावत्यनङ्गः ॥] यतो विलोलपक्ष्मलधवलानि चलन्ति केवलं नयनानि, तत्रैवाकर्णपूरितशरोऽनङ्गो धावति। तीक्ष्ण-प्रान्तानि दीर्घाणि धवलकृष्णानि नयनानि कामिनीनां दृष्ट्वानङ्गः कामिनः सकामान् करोति ॥ २९४ ॥

295) [कस्य न भिनत्ति हृदयमनङ्गशरधोरणीव निपतन्ती। बालाया वलितलोचनस्फुरन्मदनालसा दृष्टिः ॥] कस्य न भिनत्ति हृदयमनङ्गशरराजिरिव निपतन्ती बालाया वलितलोचनस्फुरन्मदनालसा दृष्टिः। यत्र पुंसि बाला कटाक्षनिरीक्षणं करोति तस्य तामलभमानस्य हृदयं द्विधेव भवति ॥ २९५ ॥

296) [नयने तव सुन्दरि विषेण भृते निरवशेषे। एवमेव मारयतो जनमलज्जे किं कज्जलं ददासि ॥] हे सुन्दरि, तव नयने एवमेवानञ्जिते अपि जनं मारयतः। किंविशिष्टे। विषेण भृते निरवशेषे। हे अलज्जे लज्जारहिते किं कज्जलं ददासि। निष्कज्जले अपि त्वदीये लोचने विषभक्षितमिव पुरुषं मारयतः। इति कज्जलदानं पुनर्मुधैव ॥ २९६ ॥

297) [ईषदीषद्दत्तकज्जलनीलोत्पलसच्छायाभ्यां नयनाभ्याम्। मन्मथमत्ता बाला मृगीव भ्रमत्युत्त्रस्ता ॥] ईषदीषद्दत्तकज्जलाभ्यामत एव नीलोत्पलसदृक्षाभ्यां नयनाभ्यामुपलक्षिता बाला मन्मथमत्ता उत्त्रस्ता मृगीव भ्राम्यति ॥ २९७ ॥

---

1 G वलंति 2 G चलिय 3 C, G, I देहि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



298) वंकेहि पिओ सरलेहि सज्जणो उज्जुएहि मज्झत्थो।
आयंबिरेहि रिउणो नयणाइ चउव्विहा हुंति ॥ ८ ॥

299) नयणाण पडउ वज्जं अहवा वज्जाउ वड्डिलं किं पि।
अमुणियजणे वि दिट्ठे अणुरायं जाइ पावंति ॥ ९ ॥

300) धावंति तम्मुहं धारिया वि वलियाइ तम्मि वलमाणे।
जणसंकुले वि नच्चावियाइ तेणम्ह नयणाइं ॥ १० ॥

३२. थणवज्जा [ स्तनपद्धतिः ]

301) ठड्ढा खलो व्व सुयणो व्व संगया नरवइ व्व मंडलिया।
थणया तह दुग्गयचिंतियं व हियए न मायंति ॥ १ ॥

298) [ वक्रैः प्रियः सरलैः सज्जन ऋजुभिर्मध्यस्थः। आताम्रैः रिपवो नयनानि चतुर्विधानि भवन्ति ॥ ] नयनानि चतुर्विधानि भवन्ति। चतुर्विधत्वं कथयति। वक्रैः प्रियोऽवलोक्यते, सरलैः सज्जन ऋजुभिर्मध्यस्थः। आताम्रै रिपवोऽवलोक्यन्ते ॥ २९८ ॥

299) [ नयनयोः पततु वज्रमथवा वज्रादधिकं किमपि। अज्ञातजनेऽपि दृष्टेऽनुरागं ये प्राप्नुतः ॥ ] नयनयोः पततु वज्रमथवा वज्रादधिकं किमपि पततु। किमिति। यतोऽज्ञातजनेऽपि दृष्टेऽनुरागं स्नेहं प्राप्नुतः। अयं भावः। काचन नारी दृष्टमात्रमपि मोहदायकं युवानं दृष्ट्वा तमलभमाना स्वनयने निन्दन्तीदमाहेति ॥ २९९ ॥

300) [ धावतस्तन्मुखं धारिते अपि, वलिते तस्मिन्वलति। जनसङ्कुलेऽपि नर्तिते तेन मम नयने ॥ ] तेन यूना, हे सखि, अस्मन्नयने नर्तिते। क। जनसंकुले स्थाने। यतो धारिते अपि तन्मुखं धावतः। तस्मिन्वलति व्याघुटति, वलिते। सर्वाङ्गसुन्दरो युवासौ भाग्यपर्वतारूढो[1] यत्र यत्र जगाम तत्र तत्रैवास्मन्नयने जनसमक्षमेव लज्जां विहाय मन्त्रवशीकृते इव जग्मतुरित्यर्थः ॥ ३०० ॥

301) [ स्तब्धौ खल इव सुजन इव संगतौ नरपतिरिव मण्डलितौ। स्तनौ तथा दुर्गतचिन्तेव हृदये न मातः ॥ ] स्तनौ हृदये न मातः।

1 G, I युवा सौभाग्यपर्वतारूढो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



302) अमुहा खलो व्व कुडिला मज्झं से किविणदाणसारिच्छा।
धणया सप्पुरिसमणोरह व्व हियए न मायंति ॥ २ ॥

303) तुलओ व्व समा मित्तो व्व संगया उन्नओ व्व अक्खलिया।
सुयणो व्व सत्थहावा सुहडो व्व समुट्ठिया थणया ॥ ३ ॥

304) समउत्तुंगविसाला उम्मंथियकणयकलससंकासा।
कामणिहाणो व्व थणा पुण्णविहूणाण दुप्पेच्छा ॥ ४ ॥

---

अतिविस्तीर्णत्वात्। किंविशिष्टौ। स्तनौ खल इव, सुजन इव संगतौ, एकत्र मिलितौ। नरपतिरिव मण्डलितौ पारिमाण्डल्ययुक्तौ, यथा नरपतिर्मण्डलसंयुक्तो भवति। केव हृदये न मातः। दुर्गतचिन्तेव, यथा दरिद्रचिन्ता हृदये न माति। दुर्गतमनोरथा बहवोऽपि निष्फला भवन्तीत्यर्थः ॥ ३०१ ॥

302) [ अमुखौ खल इव कुटिलौ मध्येऽस्याः कृपणदानसदृक्षौ। स्तनौ सत्पुरुषमनोरथा इव हृदये न मातः ॥ ] खल इव कुटिलौ निर्मुखौ से तस्याः स्तनौ हृदये न मातः। क इव। सत्पुरुषमनोरथा इव। यतस्तेऽतिदीर्घा भवेयुः। पुनः किंविशिष्टौ। मध्ये कृपणदानसदृक्षौ ॥ ३०२ ॥

303) [ तुलेव समौ मित्रमिव सङ्गतौ उन्नत इवास्खलितौ। सुजन इव स्वस्थभावौ ( सत्स्वभावौ ) सुभट इव समुत्थितौ स्तनौ ॥ ] सुभटाविव स्तनावुत्थितौ। कीदृशौ। तुलापात्रमिव समौ। मित्रमिव संगतौ। उन्नत इव उच्चप्रदेश इव अस्खलितौ। सुजन इव स्वस्थभावौ ॥ ३०३ ॥

304) [ समोत्तुङ्गविशालौ उन्मथकनककलशसङ्काशौ। कामनिधानमिव स्तनौ पुण्यविहीनानां दुष्प्रेक्ष्यौ। ] स्तनौ कामनिधानमिव पुण्यविहीनानां दुष्प्रेक्षौ, यथा निधानं पुण्यविहीनानां न संपद्यते। कीदृशौ स्तनौ। समोत्तुंगविशालौ, उन्मथितकनककलशसंकाशौ। उन्मथितं दुग्धन् ॥ ३०४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



305) उत्तुंगघणणिरंतरपक्काइयमाउलिंगसारिच्छा।
मारंति वासभूसियणहो व्व विज्जुज्जला थणया ॥ ५ ॥
306) उव्विंबे थणहारे रेहइ बालाइ घोलिरो हारो।
हिमगिरिवरसिहराओ खलिओ गंगापवाहो व्व ॥ ६ ॥
307) मग्गं चिय अलहंतो हारो पीणुन्नयाणं थणयाणं।
उव्विंबो भमइ उरे जँउणाणइफेणपुंजो व्व ॥ ७ ॥
308) अज्झाइ[1] नीलकंचुयभरिउव्वरियं विहाइ थणवट्टं।
जलभरियजलहरंतरदरुग्गओ चंदबिंबो व्व ॥ ८ ॥

305) [ उत्तुंगघननिरन्तरौ पक्वीभूतमातुलिंगसदृक्षौ। मारयतो वर्षाभूषितनभ इव विद्युदुज्ज्वलौ स्तनौ ॥ ] स्तनौ मारयतः। किंविशिष्टौ। उत्तुंगघननिरन्तरौ, पक्वीकृतमातुलिंगसदृक्षौ, विद्युदुज्ज्वलौ। किमिव। वर्षाभूषितं यन्नभस्तदिव। तदपि किंविशिष्टम्। विद्युदुज्ज्वलं विद्युतोज्ज्वलमाकाशम् ॥ ३०५ ॥

306) [ उद्भटे स्तनभारे राजते बालाया घूर्णनशीलो हारः। हिमगिरिवरशिखरात् स्खलितो गङ्गाप्रवाह इव ॥ ] उद्बिम्बे स्तनभारे राजते बालाया घूर्णनशीलो हारो मौक्तिकमयः। उत्प्रेक्षते। गङ्गाप्रवाह इव। किंविशिष्टः। स्खलितः। कस्मात्। हिमगिरिवरशिखरात् ॥३०६॥

307) [ मार्गमेवाऽलभमानो हारः पीनोन्नतयोः स्तनयोः। उद्बिम्बो भ्रमत्युरसि यमुनानदीफेनपुञ्ज इव ॥ ] उद्बिम्बो[2] भ्रमत्युरसि यमुनानदीफेनपुञ्ज इव हारः पीनोन्नतयोः स्तनयोरुपरि मार्गमलभमानः शोभते ॥ ३०७ ॥

308) [ प्रौढयुवत्या नीलकञ्चुकभृतावशिष्टं विभाति स्तनपट्टम्। जलभृतजलधरान्तरदरोद्गतं चन्द्रबिम्बमिव ॥ ] प्रौढयुवत्याः स्तनपट्टं विभाति। किंविशिष्टम्। नीलकञ्चुकभृतोद्धृतम्। उत्प्रेक्षते। जलभृतजलधरान्तरदरोद्गतं चन्द्रबिम्बमिव ॥ ३०८ ॥

1 G, I here and elsewhere अज्झाए 2 G उद्बिम्बो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



309) अमया मओ व्व समया ससि व्व हरिकरिसिरो व्व चक्कलया।
किविणब्भत्थणविमुहा पसयच्छि पओहरा तुज्झ ॥ ९ ॥

310) अव्वो न हुंति थणया मज्झ सरीरे सवत्तिणा जाया।
आलिंगणे वि पत्ते दूरे वि पियं निवारेंति ॥ १० ॥

311) थणजुयलं तीइ निरंतरं पि दट्ठूण तारिसं पडियं।
मा करउ को वि गव्वं एत्थ असारम्मि संसारे ॥ ११ ॥

312) कह नाम तीइ तं तह सहावगरुओ वि थणहरो पडिओ।
अहवा महिलाण चिरं हियए को नाम संठाइ ॥ १२ ॥

309) [ अमृतमयाविव, समदौ ( समृगौ ) शशीव, हरिकरिशिर इव वर्तुलौ। कृपणाभ्यर्थनविमुखौ प्रसृत्यक्षि पयोधरौ तव ॥ ] हे प्रसृतिवदक्षिणी यस्याः सा प्रसृत्यक्षी, तस्याः संबोधनं, हे प्रसृत्यक्षि, तव स्तनौ शीतलत्वादमृतमयाविव। समदौ समृगौ शशिवत्। हरिकरिसिर व्व इन्द्रहस्तिकुम्भाविव चक्कलया विस्तीर्णौ। कृपणाभ्यर्थनविमुखौ ॥ ३०९ ॥

310) [ अहो न भवतः स्तनौ मम शरीरे सपत्नौ जातौ। आलिङ्गनेऽपि प्राप्ते दूरेऽपि प्रियं निवारयतः ॥ ] अव्वो दुःखसूचनायां निपातः। अहो स्तनावेतौ न भवतः। किन्तु एतौ सपत्नीवज्जातौ। किमिति। आलिङ्गनेऽपि प्राप्ते दूरेऽपि प्रियं निवारयतः। अयमभिप्रायः। कठिनोच्चविस्तीर्णकुचत्वाद्गाढालिङ्गनं तस्या न संभवतीति ॥ ३१० ॥

311) [ स्तनयुगलं तस्या निरन्तरमपि दृष्ट्वा तादृशं पतितम्। मा करोतु कोऽपि गर्वमत्रासारे संसारे ॥ ] तस्याः स्तनयुगलं तादृशं लोकोत्तरं निरन्तरमतिघनमपि पतितमवलोक्य मा करोतु कोऽपि गर्वमस्मिन्नसारे संसारे ॥ ३११ ॥

312) [ कथं नाम तस्यास्तत् तथा स्वभावगुरुरपि स्तनभरः पतितः। अथवा महिलानां चिरं हृदये को नाम संतिष्ठति ॥ ] कथं नाम तत्, तथा स्वभावगुरुरपि तस्याः स्तनभरः पतितः। अथवा महिलानां हृदये चिरं को नाम तिष्ठति। यत्र निजाङ्गादप्युत्पन्नौ कुचौ न तिष्ठतस्तत्रान्यस्य का कथा। बहुतरं कालं हृदये प्रेम्णा कमपि न धारयन्ति मृगाक्ष्यः ॥ ३१२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ३४. लावण्णवज्जा [ लावण्यपद्धतिः ]

313) पल्लवियं करयलपल्लवेहि पप्फुल्लियं व नयणेहिं।
फलियं मिव पीणपओहरेहि अज्झाइ लावण्णं ॥ १ ॥

314) तह चंपिऊण भरिया विहिणा लावण्णएण तणुयंगी।
जह से चिहुरतरंगा अंगुलिमग्ग व्व दीसंति ॥ २ ॥

315) अन्नं लडहत्तणयं अन्न च्चिय का वि बाहुलयछाया।
सामा सामन्नपयावइणो रेह च्चिय न होइ ॥ ३ ॥

316) करचरणगंडलोयणबाहुलयाजहणमंडलुद्धरियं[1]।
अंगेसु अमायंतं रंखोलइ[2] तीइ लावण्णं ॥ ४ ॥

313) [ पल्लवितं करतलपल्लवैः प्रपुष्पितमिव नयनाभ्याम्। फलितमिव पीनपयोधराभ्यां प्रौढयुवत्या लावण्यम् ॥ ] अज्झाए तरुण्या लावण्यं पल्लवितं संजातपल्लवमिव। कैः। करतलपल्लवैः। प्रफुल्लितं प्रोत्फुल्लितमिव नयनाभ्याम्। फलितमिव संजातफलमिव पीनपयोधराभ्याम्। पल्लवपुष्पफलानुकारं करतलनयनपयोधरं लावण्यवृक्षस्येति ॥ ३१३ ॥

314) [ तथा निपीड्य भृता विधिना लावण्येन तन्वङ्गी। यथास्याश्चिकुरतरङ्गा अङ्गुलिमार्गा इव दृश्यन्ते ॥ ] तथा न्यक्षीकृत्य ( ? न्यक्कृत्य ) भृता विधिना लावण्येन तन्वङ्गी, यथा से अस्याश्चिकुरतरङ्गा अङ्गुलिमार्गा इव दृश्यन्ते। मस्तकं हस्ते धृत्वा लावण्यभरणेऽतिप्रयत्नवतो विधेरङ्गुलिमार्गा इवास्याश्चिकुरतरङ्गाः शुशुभिरे ॥ ३१४ ॥

315) [ अन्यल्लटभत्वमन्यैव कापि बाहुलताछाया। श्यामा सामान्यप्रजापते रेखैव न भवति ॥ ] अन्यल्लटभत्वमन्यैव कापि बाहुलताछाया, अत एवेयं श्यामाप्रसूता स्त्री सामान्यप्रजापते रेखैव न भवति। सामान्यप्रजापतिरिमां न ससर्ज ॥ ३१५ ॥

316) [ करचरणगण्डलोचनबाहुलताजघनमण्डलोद्धृतम्। अङ्गेष्वमादितस्ततश्चलति तस्या लावण्यम् ॥ ] तस्या अङ्गेष्वमाल्लावण्यं रिंखोलइ

1 G उव्वरियं, I उच्चरियं 2 G, I रिंखोलइ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



317) सामा नियंबगरुया थणजहणुव्वहणमंदसंचारा।
लक्खिज्जइ मयणणराहिवस्स संचारिणि कुडि व्व ॥ ५ ॥
318) सेयच्छलेण पेच्छह तणुए अंगम्मि से अमायंतं।
लावण्णं ओसरइ व्व तिवलिसोवाणपंतीहिं ॥ ६ ॥

## ३५. सुरयवज्जा [ सुरतपद्धतिः ]

319) दट्ठूण तरुणसुरयं विविहपलोट्टंतकरणसोहिल्लं।
दीवो वि तग्गयमणो गयं पि तेल्लं न लक्खेइ ॥ १ ॥

---

इतस्ततश्चलति। चकचकायते शरीरमिति भावः। किंविशिष्टं लावण्यम्। करचरणगण्डलोचनबाहुलताजघनमण्डलानि भृत्वोद्धृतम्। अन्यदपि पानीयादि निम्नानि स्थानानि संपूर्णीकृत्योद्धृतं सद् इतस्ततः प्रसरतीति ॥ ३१६ ॥

317) [ श्यामा नितम्बगुरुका स्तनजघनोद्वहनमन्दसंचारा। लक्ष्यते मदननराधिपस्य संचारिणी कुटीव ॥ ] श्यामा मदननराधिपस्य संचारिणी जङ्गमा कुटीव ( लक्ष्यते )। किंविशिष्टा। कटीप्रदेशगुरुका, स्तनजघनोद्वहनमन्दसंचारा ॥ ३१७ ॥

318) [ स्वेदच्छलेन प्रेक्षध्वं तनुकेऽङ्गे तस्या अमात्। लावण्यमपसरतीव त्रिवलिसोपानपङ्क्तिभिः ॥ ] लावण्यमपसरतीव पश्यत, तस्या अङ्गेऽमात्। काभिः। त्रिवलीसोपानपङ्क्तिभिः। केन। स्वेदच्छलेन। किंविशिष्टेऽङ्गे। तनुके। कृशाङ्गयष्टेः श्रमवशान्निःसरत्स्वेदपूरेण, अमाल्लावण्यमुपमीयते स्म ॥ ३१८ ॥

319) [ दृष्ट्वा तरुणसुरतं विविधप्रवर्तमानकरणशोभायुक्तम्। दीपोऽपि तद्गतमना गतमपि तैलं न लक्षयति ॥ ] दीपोऽपि तद्गतमना गतमपि तैलं न लक्षयति। किं कृत्वा। दृष्ट्वा। किम्। तरुणसुरतम्। तरुणश्च तरुणी च तरुणौ। सरूपाणामेकशेष एकविभक्तौ ( पाणिनि, १.२.६४ )। तरुणयोः सुरतम्। विविधप्रवर्तमानकरणशोभासंयुक्तम्। ॥ ३१९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



320) मरुमरुमार त्ति भणंतियाइ सुरयम्मि केलिसंगामे।
पासट्ठिओ वि दीवो सहसा हल्लप्फलो जाओ॥ २॥
321) सुम्मइ वलयाण रवो नेउरसद्दो वि निब्भरो जाओ।
कस्स वि धन्नस्स घरे महिला पुरिसत्तणं कुणइ॥ ३॥
322) दट्ठूण रयणिमज्झे बहुविहकरणेहि निब्भरं सुरयं।
अो धुणइ दीवओ विंभिओ व्व पवणाहओ सीसं॥ ४॥
323) दंतणहक्खयमहियं[1] निग्घायपडंतवलयणिग्घोसं।
वणसीहाण व जुज्झं वुत्तं तं तारिसं सुरयं॥ ५॥

320) [ मरुमरुमार इति भणन्त्याः सुरते केलिसंग्रामे। पार्श्वस्थितोऽपि दीपः सहसा कम्पनशीलो जातः॥ ] मरुमरुमार त्ति भणन्त्याः सुरते केलिसंग्रामे, पार्श्वस्थितोऽपि दीपः सहसा हल्लप्फलो कम्पनशीलो जातः॥ ३२०॥

321) [ श्रूयते वलयानां रवो नूपुरशब्दोऽपि निर्भरो जातः। कस्यापि धन्यस्य गृहे महिला पुरुषकर्म करोति॥ ] कस्यापि धन्यस्य गृहे महिला पुरुषत्वं करोति विपरीतरतं विदधाति। कथं ज्ञायत इत्याह। वलयानां रवः श्रूयते, नूपुरशब्दश्च निर्भरो जातोऽस्ति। अयं भावः। स्वभावसुरते वलयनूपुरयो रवौ न संगच्छेते। अतः कारणाद् द्वावपि श्रुत्वा कस्यापि धन्यस्य ( गृहे ) पुरुषायितं क्रियमाणं वर्तत इत्यनुमीयते॥३२१॥

322) [ दृष्ट्वा रजनीमध्ये बहुविधकरणैर्निर्भरं सुरतम्। अहो धुनोति दीपो विस्मित इव पवनाहतः शीर्षम्॥ ] दीपकः पवनाहतः सन् सीसं शिखां धुनोति। उत्प्रेक्षते। विस्मित इव। किं कृत्वा। रजनीमध्ये बहुविधकरणैः सुरतैर्नानासुरतैर्निर्भरं सुरतं दृष्ट्वा। अयं भावः। तरुणयोः करणपवित्रितं सुरतं दृष्ट्वा अहो अनयोः सुरतक्षमत्वाच्चातुर्यमतीवेति पवनाहतो दीपो निजं शिरो धूनयति स्मेति॥ ३२२॥

323) [ दन्तनखक्षतमहितं निर्घातपतद्वलयनिर्घोषम्। वनसिंहयोरिव युद्धं वृत्तं तत् तादृशं सुरतम्॥ ] तत्तादृशं सुरतं वृत्तं वनसिंहयो-

1 G महियं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



324) ओ सुम्मइ वासहरे विवरीयरयाइ पोढमहिलाए।
चलवलयकरप्फालणकणंतमणिमेहलासद्दो ॥ ६ ॥

325) न वि तह पढमसमागमसुरयसुहे पाविए वि परिओसो।
जह बीयदियह सविलक्खलक्खिए वयणकमलम्मि ॥ ७ ॥

326) सरहसरमणसमप्पणकलयलिरकणंतणिहुयसिक्कारं।
लब्भइ कुलवहुसुरए थवक्कओ सयलसोक्खाणं ॥ ८ ॥

327) झणझणइ[1] कणयडोरो तुट्टइ हारो गलंति रयणाइं।
पंडवभडसंगामो आढत्तो पोढमहिलाए ॥ ९ ॥

युद्धमिव। कीदृशं सुरतम्। दन्तनखयोः क्षतं खण्डनं, तेन[2] महितम्। दन्तनखक्षतयुक्तम्। निर्घातपतद्वलयनिर्घोषम् ॥ ३२३ ॥

324) [ अहो श्रूयते वासगृहे विपरीतरतायाः प्रौढमहिलायाः। चलवलयकरास्फालनक्वणन्मणिमेखलाशब्दः ॥ ] 'ओ' इति अहो। विपरीतरतायाः प्रौढमहिलाया वासगृहे चलवलयकरास्फालनक्वणन्मणिमेखलाशब्दः श्रूयत इति ॥ ३२४ ॥

325) [ नापि तथा प्रथमसमागमसुरतसुखे प्राप्तेऽपि परितोषः। यथा द्वितीयदिवसे सविलक्षलक्षिते वदनकमले ॥ ] नापि तथा प्रथमसमागमसुरतसुखे प्राप्तेऽपि परितोषो भवति, यादृग् द्वितीयदिवसे सविलक्षलक्षिते वदनकमले परस्परमिति ॥ ३२५ ॥

326) [ सरभसरमणसमर्पणकलकलशीलक्वणन्निभृतसीत्कारम्। लभ्यते कुलवधूसुरते स्तबकः सकलसौख्यानाम् ॥ ] सरभसजघनसमर्पणकलकलशीलक्वणन्निभृतसीत्कारं लभ्यते कुलवधूसुरते थवक्कओ सयलसोक्खाणं समूहः सकलसौख्यानाम् ॥ ३२६ ॥

327) [ झणझणायते कनककाञ्ची त्रुट्यति हारो गलन्ति रत्नानि। पाण्डवभटसंग्राम आरब्धः प्रौढमहिलया ॥ ] रणझणायते कनकदवरकः कनककाञ्ची, त्रुट्यति हारो, गलन्ति रत्नानि। पाण्डवभटसंग्राम आरब्धः

1 G रणझणइ 2 G तेन सहितम्। दन्तनखक्षतयुक्तम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



328) रेहइ सुरयवसाणे अद्धुक्खित्तो सणेउरो चलणो।
जिणिऊण कामदेवं समुब्भिया धयवडाय व्व ॥ १० ॥

३६. पेम्मवज्जा [ प्रेमपद्धतिः ]

329) पेम्मं अणाइपरमत्थपयडणं महुमहो व्व बहुभेयं।
मोहाणुरायजणयं अव्वो किं वंदिमो निच्चं ॥ १ ॥

330) आलावणेण उल्लावणेण संगेण कोउहल्लेण।
सोवाणपएहि व पियगुणेहि पेम्मं समारुहइ ॥ २ ॥

331) आरंभो जस्स इमो आसन्नासाससोसियसरीरो।
परिणामो कह होसइ न याणिमो तस्स पेम्मस्स ॥ ३ ॥

---

प्रौढमहिल्या। यथा पाण्डवकौरवौ युद्धोद्यतौ किमपि न गणयतस्तथा सुरतसंमर्दे तौ दम्पती ॥ ३२७ ॥

328) [ राजते सुरतावसानेऽर्धोत्क्षिप्तःसनूपुरश्चरणः। जित्वा कामदेवं समुच्छ्रिता ध्वजपताकेव ॥ ] राजते सुरतावसाने सनूपुरश्चरणोऽर्धोत्क्षिप्तो जित्वा कामदेवम् ऊर्ध्वीकृता ध्वजपताकेव ॥ ३२८ ॥

329) [ प्रेमानादिपरमार्थप्रकटनं मधुमथन इव बहुभेदम्। मोहानुरागजनकमहो किं वन्दामहे नित्यम् ॥ ] प्रेम अनादिपरमार्थप्रकटनं, बहुभेदं मधुमथनमिव वन्दे नित्यम्। पुनः किंविशिष्टम्। मोहानुरागजनकम्। विष्णुपक्षे[1] सर्वाण्यपि विशेषणानि योक्तव्यानि ॥ ३२९ ॥

330) [ आलापनेनोल्लापनेन सङ्गेन कौतूहलेन। सोपानपदैरिव प्रियगुणैः प्रेम समारोहति ॥ ] प्रेम स्नेहः सोपानपङ्क्तिभिरिव प्रियगुणैः समारोहति। कैस्तैरित्याह। आलापनेनोल्लापनेन सङ्गेन कौतूहलेन॥३३०॥

331) [ आरम्भो यस्यायमासन्नाश्वासशोषितशरीरः। परिणामः कथं भविष्यति न जानीमस्तस्य प्रेम्णः ॥ ] यस्यारम्भ ईदृश आसन्नाश्वासशोषितशरीरः, तस्य प्रेम्णः परिणामः कथं भविष्यति इति वयं न जानीमः। प्रेम्णा श्वासतनूकरणादयः[2] प्रथमं भवन्ति। तच्च पश्चाद्भवति वा न वा। मयि परिचिताः कस्य पुरुषाश्चञ्चलप्रेमाणो भवन्तीति बिभेमि ॥ ३३१ ॥

---

1 G, I विष्णुपक्षे: 2 G, श्वासतनूतनूकरणादयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



332) दाणं न देइ न करेइ चाडुयं कहइ नेय सब्भावं।
दंसणमेत्तेण वि किं पि माणुसं[1] अमयसारिच्छं॥ ४॥

333) जत्थ न उज्जग्गरओ जत्थ न ईसा विसूरणं माणं।
सब्भावचाडुयं जत्थ नत्थि नेहो तहिं नत्थि॥ ५॥

334) दाडिमफलं व पेम्मं एक्के पक्खे य होइ[2] सकसायं।
जाव न बीओ रज्जइ[3] ता किं महुरत्तणं कुणइ॥ ६॥

335) न तहा मारेइ विसं खज्जंतं पलसयं पि कवलेहिं।
जह चक्खुरायरत्तं मारेइ सविब्भमं पेम्मं॥ ७॥

---

332) [ दानं न ददाति न करोति चाटुकं कथयति नैव सद्भावम्। दर्शनमात्रेणापि किमपि मानुषममृतसदृशम्॥ ] दानं न ददाति न करोति चाटुकं, कथयति नैव सद्भावं, दर्शनमात्रेणैव भवति किमपि मानुषममृतसदृशम्। मनोऽभीष्ट एवमकुर्वन्नपि दर्शनमात्रेणैवामृतायते। प्रेम्णो विलसितमिदमिति॥ ३३२॥

333) [ यत्र नोज्जागरको यत्र नेर्ष्या खेदो मानः। सद्भावचाटुकं यत्र नास्ति स्नेहस्तत्र नास्ति॥ ] यत्र नोज्जागरको यत्र नेर्ष्या खेदो मानश्च, सद्भावचाटुवाक्यं यत्र नास्ति, स्नेहोऽपि तत्र नास्तीति॥३३३॥

334) [ दाडिमफलमिव प्रेमैकस्मिन्पक्षे भवति सकषायम्। यावन्न द्वितीयो रज्यते ( बीजं न रज्यते ) तावत्किं मधुरत्वं करोति॥ ] प्रेम दाडिमफलमिव। एकस्मिन्पक्षे सकषायं सकोपम्[4]। यावद् द्वितीयो न रज्यते तावत्किं मधुरत्वं करोति। उभयोरपि क्षीरनीरयोरिव मिलितत्वात् प्रेमातिमधुरं भवति। दाडिमीफलमपि एकस्मिन पक्षे सकषायं कषायरस-युक्तं भवति। यावद् बीजो न रज्यते तावत् कुतो माधुर्यं भवति। मधुरो रसो न भवतीति॥ ३३४॥

335) [ न तथा मारयति विषं खाद्यमानं पलशतमपि कवलैः। यथा चक्षूरागरक्तं मारयति सविभ्रमं प्रेम॥ ३३५॥ ]

---

1 I adds होइ after माणुसं 2 G, I एक्कपक्खेण होइ
3 G जाव ण बीजउ रज्जइ 4 I एकस्मिन् पक्षे भवति सकषायम्। एकेन पूर्वं सकषायं सकोपम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



336) अव्वो जाणामि अहं अत्तणहियएण मवहियाइं।
मा को वि कह वि रज्जउ[1], दुक्खुव्वहणाइ पेम्माइं ॥ ८ ॥

337) अदिट्ठे रणरणओ दिट्ठे ईसा विडंबणा नाह।
होइ न उज्जु व वंकं पेम्मं जह चंचु कीरस्स[2] ॥ ९ ॥

338) अदिट्ठे रणरणओ दिट्ठे ईसा सुहट्ठिए माणं।
दूरट्ठिए वि दुक्खं पिए जणे भण सुहं कत्तो ॥ १० ॥

339) ताव च्चिय होइ सुहं जाव न कीरइ पिओ जणो को वि।
पियसंगो जेहि कओ दुक्खाण समप्पिओ अप्पा ॥ ११ ॥

---

336) [ अहो जानाम्यहमात्महृदयेनान्यहृदयानि। मा कोऽपि कथमपि रज्यतु, दुःखोद्वहनानि प्रेमाणि ॥ ] अव्वो दुःखे। जानाम्यहमात्मनो हृदयेनान्यहृदयानि, मा कोऽपि कापि रज्यतु, दुःखोद्वहनानि प्रेमाणि ॥ ३३६ ॥

337) [ अदृष्टे रणरणको दृष्ट ईर्ष्या विडम्बना नाथ। भवति न ऋज्विव वक्रं प्रेम यथा चञ्चूः कीरस्य ॥ ] अदृष्टे प्रिये रणरणको दृष्ट ईर्ष्या विडम्बना नाथ भवति। वक्रं प्रेम न ऋजु भवति यथा शुकचञ्चुः ॥ ३३७ ॥

338) [ अदृष्टे रणरणको दृष्ट ईर्ष्या सुखस्थिते मानः। दूरस्थितेऽपि दुःखं प्रिये जने भण सुखं कुतः ॥ ] प्रिये जने भण कुतः सुखम्। कथम्। तदेव दर्शयति। अदृष्टे रणरणको, दृष्ट ईर्ष्या, सुखस्थिते मानो, दूरस्थिते तस्मिन् दुःखम् ॥ ३३८ ॥

339) [ तावदेव भवति सुखं यावन्न क्रियते प्रियो जनः कोऽपि। प्रियसङ्गो यैः कृतो दुःखेभ्यः समर्पित आत्मा ॥ ] तावदेव सुखं भवति यावन्न क्रियते प्रियो जनः कोऽपि। प्रियसङ्गो यैः कृतः (तैः) दुखेभ्यः समर्पित आत्मा ॥ ३३९ ॥

---

1 G, I, Laber रुच्चउ    2 G, I वह कीरचंचु व

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



340) दूरं गए वि कयविप्पिए वि अन्नत्थ बद्धराए वि।
जत्थ मणं न नियत्तइ तं पेम्मं परिचओ सेसो ॥ १२ ॥

341) सो सुवइ सुहं सो दुक्खवज्जिओ सो सुहाण सयखाणी।
वाए मणेण काएण जस्स न हु वल्लहो को वि ॥ १३ ॥

342) उल्लवउ को वि महिमंडलम्मि जो तेण नत्थि संघडिओ।
खरपवणचाडुचालिरदवग्गिसरिसेण पेम्मेण ॥ १४ ॥

343) सो को वि न दीसइ सामलंगि एयम्मि दड्ढहयलोए।
जस्स समप्पिवि हिययं सुहेण दियहा गमिज्जंति[1] ॥ १५ ॥

344) अव्वो तहिं तहिं चिय गयणं भमिऊण[2] वीसमंतेण।
बोहित्थवायसेण व हसाविया दड्ढपेम्मेण ॥ १६ ॥

340) [ दूरं गतेऽपि कृतविप्रियेऽप्यन्यत्र बद्धरागेऽपि। यत्र मनो न निवर्तते तत्प्रेम परिचयः शेषः ॥ ३४० ॥ ]

341) [ स स्वपिति सुखं स दुःखवर्जितः स सुखानां शतखनिः। वाचि मनसा कायेन यस्य न खलु वल्लभः कोऽपि ॥ ] स स्वपिति सुखं स दुःखवर्जितः स सुखानां शतस्य खनिर्वाचि मनसा कायेन यस्य न खलु वल्लभः कोऽपि ॥ ३४१ ॥

342) [ उल्लपतु कोऽपि महीमण्डले यस्तेन नास्ति संघटितः। खरपवनचाटुचलनशीलदवाग्निसदृशेन प्रेम्णा ॥ ३४२ ॥ ]

343) [ स कोऽपि न दृश्यते श्यामलाङ्ग्येतस्मिन् दग्धहतलोके। यस्य समर्प्य हृदयं सुखेन दिवसा गम्यन्ते ॥ ३४३ ॥ ]

344) [ अहो तत्र तत्रैव गगनं भ्रान्त्वा विश्राम्यता। यानपात्रवायसेनेव हासिता दग्धप्रेम्णा ॥ ] बोहित्थं यानपात्रम्। अव्वो दुःखसूचनायाम्। तहिं तहिं चिय तत्र तत्रैव दुर्लभपुरुषे, विश्राम्यता दग्धप्रेम्णा हासितास्मि। किं कृत्वा विश्राम्यता। गगनं शून्यं भ्रान्त्वा। केनेव। बोहित्थवायसेणेव। यथा यानपात्रे स्थितो वायसो गगनमाकाशं

1 G गमिज्जंति 2 G भमिऊण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



345) जाए माणप्पसरे फिट्टे नेहे गयम्मि सब्भावे।
अब्भत्थणाइ[1] पेम्मं कीरंतं केरिसं होइ ॥ १७ ॥
346) अद्दंसणेण अइदंसणेण दिट्ठे अणालवंतेण।
माणेण पवसणेण य पंचविहं झिज्जए पेम्मं ॥ १८ ॥
347) अद्दंसणेण बालय सुट्ठु वि नेहाणुबद्धमणसाणं।
हत्थउडपाणियाइं व कालेण गलंति पेम्माणि ॥ १९ ॥
348) पेम्मस्स विरोहियसंधियस्स पच्चक्खदिट्ठविलियस्स।
उययस्स व तावियसीयलस्स विरसो रसो होइ ॥ २० ॥

भ्रान्त्वा तत्रैव स्तम्भादौ विश्रमता जनो हास्यते (? विश्राम्यन् जनं हासयति)। इदमत्र तात्पर्यम्। काचिन्नारी कस्मिंश्चिद्दुर्लभेऽनुरक्ता तमलभमाना मानमवलम्ब्य पुनरन्यं वाञ्छन्ती पुनस्तत्रैवानुरक्ता सती जनान् हासयति ॥ ३४४ ॥

345) [ याते मानप्रसरे भ्रष्टे स्नेहे गते सद्भावे। अभ्यर्थनया प्रेम क्रियमाणं कीदृशं भवति ॥ ] जाते मानप्रसरे गते स्नेहे गते सद्भावे, अभ्यर्थनया क्रियमाणं प्रेम कीदृग् भवति ॥ ३४५ ॥

346) [ अदर्शनेनातिदर्शनेन दृष्टेऽनालपता। मानेन प्रवसनेन च पञ्चविधं क्षीयते प्रेम ॥ ] पञ्चविधं पञ्चप्रकारं क्षीयते प्रेम। तदेव दर्शयति। अदर्शनेनातिदर्शनेन दृष्टेऽनालपता, मानेन प्रवसनेन च ॥ ३४६ ॥

347) [ अदर्शनेन बालक सुष्ठ्वपि स्नेहानुबद्धमनसोः। हस्तपुटपानीयानीव कालेन गलन्ति प्रेमाणि ॥ ] हे बालक, अदर्शनेन सुष्ठ्वपि स्नेहानुबद्धमनसोर्दम्पत्योः कालेन प्रेमाणि गलन्ति, यान्तीत्यर्थः। वानीव। हस्तपुटस्थपानीयानीव। यथा सुदृढं धृतान्यपि हस्तपुटस्थपानीयानि बिन्दुना बिन्दुना चिरेण गलन्त्येव ॥ ३४७ ॥

348) [ प्रेम्णो विरोधितसंधितस्य प्रत्यक्षदृष्टव्यलीकस्य। उदकस्येव तापितशीतलस्य विरसो रसो भवति ॥ ] प्रेम्ण एवंविधस्य रसोऽत्यासक्ति-

1 I अब्भत्थणेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



349) ताव य पुत्ति छइल्लो¹ जाव न पेम्मस्स गोयरे पडइ।
नेहेण नवरि छेयत्तणस्स मूला खणिज्जंति ॥ २१ ॥

३७. माणवज्जा [ मानपद्धतिः ]

350) अलियपयंपिरि अणिमित्तकोवणे असुणि सुणसु मह वयणं।
एक्कग्गाहिणि सोक्खेक्कबंधवं गलइ तारुण्णं ॥ १ ॥

351) अग्घाहि महुं दे गेण्ह चंदणं असुणि सुणसु मह वयणं।
माणेण मा नडिज्जसु माणंसिणि गलइ छणराई ॥ २ ॥

विरसो भवति। कीदृशस्य। विरोधितसंधितस्य। पूर्वं विरोधितं पश्चात्संधितं, तस्य। पुनः कीदृशस्य। प्रत्यक्षदृष्टव्यलीकस्य। प्रत्यक्षं दृष्टं व्यलीकमप्रियं यत्र तस्य साक्षात्कृताप्रियस्य। कस्येव। उदकस्येव तापितशीतलस्य। यथा तापितशीतलस्योदकस्य रसो विरसो भवति। पूर्वं तापितं पश्चाच्छीतलं, पश्चात्कर्मधारयः ॥ ३४८ ॥

349) [ तावच्च पुत्रि विदग्धो यावन्न प्रेम्णो गोचरे पतति। स्नेहेन केवलं छेकत्वस्य मूलानि खन्यन्ते ॥ ] तावदेव हे पुत्रि विदग्धः कथ्यते यावत् स्नेहगोचरो न भवति। यतः नवरि केवलं प्रेम्णा छेकत्वस्य मूलान्युत्खन्यन्ते ॥ ३४९ ॥

350) [ अलीकप्रजल्पिन्यनिमित्तकोपनेऽनाश्रव आकर्णय मम वचनम्। एकग्राहिणि सौख्यैकबान्धवो गलति तारुण्यम् ॥ ] हे अनाकर्णनशीले, आकर्णय मम वचनम्। हे अलीकप्रजल्पनशीले, हे अनिमित्तकोपने, हे एकग्राहिणि, सौख्यैकबान्धवं गलति तारुण्यम्। सखीशिक्षोक्तिरियम्। अथवा भर्तुः कृतापराधस्य ॥ ३५० ॥

351) [ आजिघ्र मधु हे गृहाण चन्दनमनाश्रवे शृणु मम वचनम्। मानेन मा नटयस्व मनस्विनि गलति क्षणरात्रिः ॥ ] 'दे' इति प्रार्थनायां निपातः। हे असुणि (अनाश्रवे), मद्वचनं शृणु। किं तदित्याह। मधु मद्यमाजिघ्र पिबेति यावत्। तथा गृहाण चन्दनम्। मानेन मा नट्येः (? नट्यस्व)। हे मनस्विनि, गलत्यतिक्रामत्युत्सवरात्रिः। अयं भावः।

1 G, I छयल्लो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



352) ए दइइ मह पसिज्जसु माणं मोत्तूण कुणसु परिओसं ।
कयसेहराण सुम्मइ आलावो झत्ति गोसम्मि ॥ ३ ॥

353) निद्दाभंगो आवंडुरत्तणं दीहरा य नीसासा ।
जायंति जस्स विरहे तेण समं केरिसो माणो ॥ ४ ॥

354) नइपूरसच्छहे जोव्वणम्मि दियहेसु निच्चपहिएसु ।
अणियत्तासु वि राईसु पुत्ति किं दड्ढमाणेण ॥ ५ ॥

कश्चन युवा कांचनाख्यां स्त्रियं गते दिवसे उपभुज्य द्वितीयदिनरात्रौ कौमुद्यायुत्सवे मानमवलम्ब्य स्थितां वामाक्षीं मद्यपात्रपुष्पाद्युपभोगवस्त्वानीय तामनुनयन्निदमाह ।। ३५१ ।।

352) [ हे दयिते, मम प्रसीद मानं मुक्त्वा कुरु परितोषम् । कुक्कुटानां श्रूयत आलापो झटिति प्रभाते ।। ] 'ए' इति प्रार्थनायाम् । हे दयिते मह्यं प्रसीद, प्रसन्ना भव। मानं मुक्त्वा परितोषं कुरु। किमित्येवं याचसे, किं तव याति, एतावता किं भवदस्ति—इत्याह । कयसेहराणं कुक्कुटानाम् आलापः शब्दः, गोसे प्रभाते झटिति श्रूयते । प्रभातं भवतीत्यर्थः । अत एव मानं मुक्त्वास्मदीयं कार्यं विधेहीति भर्तुरुक्तिः । गोसे प्रभाते इति देशीयं पदम् ।। ३५२ ।।

353) [ निद्राभङ्ग आपाण्डुरत्वं दीर्घाश्च निःश्वासाः । जायन्ते यस्य विरहे तेन समं कीदृशो मानः ।। ] तेन समं कीदृशो मानो यस्य विरह एतावद्भवति । निद्राभङ्ग आपाण्डुरत्वं दीर्घाश्च निःश्वासा इति सखीशिक्षोक्तिर्नायिकां प्रति ।। ३५३ ।।

354) [ नदीपूरसदृशे यौवने दिवसेषु नित्यपथिकेषु । अनिवृत्तास्वपि रात्रिषु पुत्रि किं दग्धमानेन ।। ] हे पुत्रि, किम् अमुना दग्धमानेन । यतः । नदीपूरसदृक्षे यौवने, दिवसेषु नित्यपथिकेषु नित्यगत्वरेषु, अनिवृत्तासु रात्रिषु । ता एव रात्रयो न ह्यावर्तन्ते । यौवनं च नदीपूरवत् । यथा नदीपूरः समायाति, पुनर्मुहूर्तेन विनिवर्तते तद्वद्यौवनम् । दिवसाश्च त एव नायान्ति पूर्ववत ।। ३५४ ।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



355) जइ माणो कीस पिओ अहव पिओ कीस कीरए माणो ।
माणिणि दो वि गइंदा एक्कक्खंभे न बज्झंति ॥ ६ ॥

356) माणिणि मुयसु माणं जइ वि पिओ सुट्ठु वल्लहो तुज्झ ।
कारणवसेण कूवो न नमइ मुद्धे तुला नमइ ॥ ७ ॥

357) माणं अवलंबंती मरिहिसि मुद्धे वसंतमासम्मि ।
माणो पुणो वि किज्जइ छणदियहा दुल्लहा हुंति ॥ ८ ॥

358) मा पुत्ति कुणसु माणं दइओ हिययम्मि निट्ठुरसहावो ।
कंदलिसरिसं पेम्मं झसत्ति तुट्टं न संघडइ ॥ ९ ॥

355) [ यदि मानः कस्मात् प्रियोऽथवा प्रियः, कस्मात् क्रियते मानः । मानिनि द्वावपि गजेन्द्रावेकस्तम्भे न बध्येते ॥ ] यदि मानः किमिति प्रियोऽथवा प्रियस्तर्हि किमिति क्रियते मानः । हे मानिनि, द्वौ गजेन्द्रावेकस्तम्भे न बध्येते । गजेन्द्रतुल्यौ मानभर्तारौ प्रतीहि, इति सखीशिक्षोक्तिः ॥ ३५५ ॥

356) [ मानिनि, मुञ्च मानं यद्यपि प्रियः सुष्ठु वल्लभस्तव । कारणवशेन कूपो न नमति मुग्धे तुला नमति ॥ ] हे मानिनि, मुञ्च मानं यद्यपि प्रियः सुष्ठु वल्लभस्तव । यतो हे मुग्धे कारणवशेनात्मकार्येण कूपो न नमति, तुला नमति । तुला जलोदञ्चनघटीकाष्ठदत्वरकं यस्याग्रे ' ढेंकुली ' इति कथ्यते ॥ ३५६ ॥

357) [ मानमवलम्बमाना मरिष्यसि मुग्धे वसन्तमासे । मानः पुनरपि क्रियते क्षणदिवसा दुर्लभा भवन्ति ॥ ] हे मुग्धे, मानमवलम्बमाना वसन्तमासे मरिष्यसि । मानः पुनरपि क्रियते, उत्सवदिवसा दुर्लभा भवन्ति ॥ ३५७ ॥

358) [ मा पुत्रि, कुरु मानं दयितो हृदये निष्ठुरस्वभावः । कन्दली-सदृशं प्रेम झटिति त्रुटितं न संघटते ॥ ] हे पुत्रि, मानं मा कार्षीः । किमिति । यतो दयितो हृदये निष्ठुरस्वभावः । तस्मिंश्च तादृग्विधे प्रेम कन्दलसदृशं झटिति त्रुटितं न संघटते ॥ ३५८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



359) दढणेहणालपरिसंठियस्स सब्भावदलसुयंधस्स ।
पेम्मुप्पलस्स माए माणतुसारो च्चिय विणासो ॥ १० ॥

360) मुय माणं माण पियं पियसरयं जाव वच्चए सरयं ।
सरए सरयं सुरयं च पुत्ति को पावइ अउण्णो ॥ ११ ॥

361) तुंगो थिरो विसालो जो रइओ माणपव्वओ तीए ।
सो दइयदिट्ठिवज्जासणिस्स घायं च्चिय न पत्तो ॥ १२ ॥

362) पायवडिओ न गणिओ पियं भणंतो वि विप्पियं भणिओ ।
वच्चंतो न निरुद्धो भण कस्स कए कओ माणो ॥ १३ ॥

359) [ दृढस्नेहनालपरिसंस्थितस्य सद्भावदलसुगन्धस्य । प्रेमोत्पलस्य मातर्मानतुषार एव विनाशः ॥ ] प्रेमैवोत्पलं कमलं तत्क्षणादेव त्रुटनशीलत्वादतिकोमलत्वाच्च तस्य । हे मातः, मान एव तुषारो हिमं विनाशः विनाशकारी, दाहकत्वात् । अन्यदपि कमलं तुषारेण दह्यते । रूपकालंकारेण प्रेम्ण उत्पलसादृश्यं विशिनष्टि । किंविशिष्टस्य । दृढस्नेहनालपरिसंस्थितस्य, सद्भावदलसुगन्धस्य । अत्र गाथायां स्नेहप्रेम्णोर्ऐक्यार्थत्वात् ( ? एकार्थत्वात् ) चिन्त्यम् । अथवोभयोर्दम्पत्योर्मरणावसानः परस्परानुरागः प्रेम । स्नेहश्च दानमानाद्यादिना भवति ॥ ३५९. ॥

360) [ मुञ्च मानं मानय प्रियं प्रियसरका यावद्व्रजति शरद् । शरदि सरकं सुरतं च पुत्रि कः प्राप्नोत्यपुण्यः ॥ ] हे पुत्रि, मानं मुञ्च, प्रियं मानय, यावच्छरद्व्रजति । किमिति । यतः शरत्काले सुरतं सुरां च कोऽपुण्यः प्राप्नोति ॥ ३६० ॥

361) [ तुङ्गः स्थिरो विशालो यो रचितो मानपर्वतस्तया । स दयितदृष्टिवज्राशनेर्घातमेव न प्राप्तः ॥ ] तया यो मानपर्वतो रचितः । किंविशिष्टः । तुङ्गोऽत्युच्चैः । स्थिरो दृढः । विशालो विस्तीर्णः । स मानपर्वतो दयितदृष्टिवज्राशनेर्घातं न प्राप्तः । दयितस्य दृष्टिर्दर्शनं स एव स्फोटकत्वाद्वज्राशनिस्तस्य घातं न प्राप्तवान् । कोऽर्थः । यन्नायिका मानं रचितवती ( तत् ) तावत्, यावद्वल्लभो दृष्टिगोचरं नेयाय । आगते तस्मिन्काकनाशं नष्टः ॥ ३६१ ॥

362) [ पादपतितो न गणितः प्रियं भणन्नपि विप्रियं भणितः । व्रजन्न निरुद्धो भण कस्य कृते कृतो मानः ॥ ] हे सखि, भण कथय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



363) माणं हु तम्मि किज्जइ जो जाणइ विरहवेयणादुक्खं।
अणरसियणिव्विसेसे किं कीरइ पत्थरे माणो ॥ १४ ॥

364) उज्जग्गिरस्स तणुयत्तणस्स सुसियस्स दीहरुण्णस्स।
एयाण उरं दाऊण पुत्ति माणं कुणिज्जासु ॥ १५ ॥

## ३८. पवसियवज्जा [ प्रोषितपद्धतिः ]

365) कल्लं किर खरहियओ पवसिहिइ पिओ त्ति सुव्वइ जणम्मि
तह वड्ढ भयवइ निसे जह से कल्लं चिय न होइ ॥ १ ॥

कस्य कृते कृतो मानः। यतः पादपतितो न गणितः, प्रियं भणन्नपि विप्रियं भणितो व्रजन्नपि न निरुद्ध इति। काचित्खण्डिता प्रातरागतं प्रियं दृष्ट्वा मानमवलम्बे। तां च मानवतीमवलोक्य "प्रिये प्रसीद, नाहं भूयोऽप्येवं करिष्यामि" इति चरणयोः पतन् वाचा निर्धाटितः (निस्सारितः)। ततः सोऽपि मानं स्वीकृत्य निर्गच्छंस्तया दीर्घमानवत्या न निषिद्धः। पश्चाद् दुःसहविरहवेदनादूनमानसा सख्याग्रेऽयैवमूचे ॥ ३६२ ॥

363) [ मानः खलु तस्मिन् क्रियते यो जानाति विरहवेदना-दुःखम्। अरसिकनिर्विशेषे किं क्रियते प्रस्तरे मानः ॥ ३६३ ॥ ]

364) [ उज्जागरस्य तनुत्वस्य शोषितस्य दीर्घरुदितस्य। एतेषा-मुरो दत्त्वा पुत्रि मानं कुर्याः ॥ ] हे पुत्रि, एतेषामुरो हृदयं दत्त्वा, एता-न्स्वीकृत्येत्यर्थः। मानं कुर्याः। केषामित्याह, उज्जागरस्य, तनुत्वस्य, शोषितत्वस्य, दीर्घरुदितस्य ॥ ३६४ ॥

365) [ कल्यं किल खरहृदयः प्रवत्स्यति प्रिय इति श्रूयते जने। तथा वर्धस्व भगवति निशे यथा तस्य कल्यमेव न भवति ॥ ] किर किल श्रूयते खरहृदयो निरनुकम्पः कल्लं प्रातरेव प्रवत्स्यति प्रिय इति श्रूयते जने। अतः कारणाद् हे निशे रात्रि तथा वर्धस्व भगवति, यथा 'से' इति तस्य प्रातरेव न भवति। प्रियं प्रवत्स्यमानं श्रुत्वा दुःसह-विरहवेदनापीडिता रात्रिमेवं प्रार्थयते ॥ ३६५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



366) जइ वच्चसि वच्च तुमं को वारइ तुज्झ सुहव[1] जंतस्स ।
तुह गमणं मह मरणं लिहिय पसत्थी कयंतेण ॥ २ ॥

367) जइ वच्चसि वच्च तुमं एण्हिं अवऊहणेण न हु कज्जं ।
पावासियाण मडयं छिविऊण अमंगलं होइ ॥ ३ ॥

368) वसिऊण मज्झ हियए जीवं गहिऊण अज्ज चलिओ सि ।
सहवासहरविडंबण गंगम्मि गओ न सुज्झिहिसि ॥ ४ ॥

---

366) [ यदि व्रजसि व्रज त्वं को वारयति तव सुभग यातः । तव गमनं मम मरणं लिखिता प्रशस्तिः कृतान्तेन ॥ ] हे ( प्रिय ), यदि व्रजसि व्रज त्वम् । को नाम वारयति सुभग गच्छतस्तव । अतः कारणात् त्वद्गमनं मम मरणम् इति प्रशस्तिर्लिखिता कृतान्तेन । त्वयि गते क्षणमपि न जीविष्यामीति भावः ॥ ३६६ ॥

367) [ यदि व्रजसि व्रज त्वम् इदानीमवगूहनेन न खलु कार्यम् । प्रवासिनां मृतकं स्पृष्ट्वामङ्गलं भवति ॥ ] हे प्रिय यदि व्रजसि तदा व्रज त्वम् । इदानीमवगूहनेन न खलु कार्यम् । किमिति । प्रवसतां मृतकं स्पृष्ट्वामङ्गलं भवति । मृतकस्पर्शो ह्यनिष्टाय, विशेषतः प्रवसतः । अयं भावः । तव गमने मम प्राणा गता इव वर्तन्ते । अतो मृतामिव मां मा स्प्राक्षीः । किमुक्तं भवति । यदि मदिष्टमिच्छसि तर्हि मा यासीरिति ॥ ३६७ ॥

368) [ उषित्वा मम हृदये जीवं गृहीत्वाद्य चलितोसि । सहवासगृहविडम्बन गङ्गायां गतो न शोत्स्यसि ॥ ] हे प्रिय, मम हृदय उषित्वा जीवं गृहीत्वाद्य चलितोऽसि । रे सहवासगृहविडम्बन गङ्गायामपि गतो न शुद्धिष्यसे ( ? शोत्स्यसि ) । अन्योऽपि यः क्वापि वृक्षादौ तिष्ठति तत्र च कंचित्कालमुषित्वा पश्चात्तस्योपद्रवादिकं विधाय यदि याति, तदा सहवासगृहस्य विडम्बनं त्रोटनादिकं कुर्वन् पापी भवति । स च गङ्गायामपि गतः कृतप्रायश्चित्तोऽपि न शुध्यति । तथा त्वमपि मद्धृदयवासमासाद्येदानीं जीवं गृहीत्वाद्य चलितः कुतः कृतस्नानोऽपि शुद्धिं प्राप्स्यसि । तस्मान्मां मा त्याक्षीरिति ॥ ३६८ ॥

---

1 G सुहय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



369) जइ वच्चसि वच्च तुमं अंचल गहिओ य कुप्पसे कीस।
पढमं चिय सो मुच्चइ जो जीवइ तुह विओएण ॥ ५ ॥

370) न मए रुण्णं न कयं अमंगलं होंतु सयलसिद्धीओ।
विरहग्गिधूमकडुयाइयाइ[1] पयलंति नयणाइं ॥ ६ ॥

371) रे ससिवाहणवाहण मा पवससु एरिसम्मि कालम्मि।
सेलसुयासुयवाहणघणसद्दो जत्थ उच्छलइ ॥ ७ ॥

372) रे ससिवाहणवाहण वारिज्जंतो न ठासि जइ सुहय।
ता लच्छिवासवासं अम्हाणं वच्च दाऊण ॥ ८ ॥

369) [ यदि व्रजसि व्रज त्वमञ्चले गृहीतश्च कुप्यसि कस्मात्। प्रथममेव स मुच्यते यो जीवति त्वद्वियोगेन ॥ ] यदि व्रजसि व्रज त्वम्, अञ्चले गृहीतः किमिति कुप्यसि। प्रथममेव स मुच्यते यस्तव वियोगे जीवति। अहं तु न तथेति ॥ ३६९ ॥

370) [ न मया रुदितं न कृतममङ्गलं भवन्तु सकलसिद्धयः। विरहाग्निधूमकटुकीकृते प्रगलतो नयने ॥ ] न मया रुदितं न कृतममङ्गलं भवन्तु अत एव तव सकलसिद्धयः। तर्हि अक्षिण पानीयं कुतो दृश्यत इत्याह। विरहाग्निधूमकटुकीकृते नयने प्रगलतः, किं करोमि ॥ ३७० ॥

371) [ रे शशिवाहनवाहन मा प्रवसेदृशे काले। शैलसुतासुतवाहनघनशब्दो यत्रोच्छलति ॥ ] रे शशिवाहनवाहन। शशिनो वाहनम् ईश्वरस्तद्वाहनं वृषभः। अतो, रे मूर्ख। मा प्रवसेदृशे काले। यत्र काले शैलसुतायाः पार्वत्याः सुतः षण्मुखः, तस्य वाहनं मयूरः, तस्य घनः शब्द उच्छलति। प्रावृट्काल इत्यर्थः। वर्षासु सर्वोऽपि प्रवासी निजगृहे वनितया सह ता अतिवाहयति। त्वं तु प्रत्युत तास्वेव व्रजसि। अत एव वृषभोऽज्ञ इति सम्बोधनम् ॥ ३७१ ॥

372) [ रे शशिवाहनवाहन वार्यमाणो न तिष्ठसि यदि सुभग। तदा लक्ष्मीवासवासमस्मभ्यं व्रज दत्त्वा ॥ ] हे शशिवाहनवाहन, अशृङ्ग-

1 G कडुइयाइ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



373) इह पंथे मा वच्चसु गयवइ भणियं भुयं पसारेवि ।
पंथिय पियपयमुद्दा मइलिज्जइ तुज्झ गमणेण ॥ ९ ॥

३९. विरहवज्जा [ विरहपद्धतिः ]

374) अज्जं चेय पउत्थो उज्जागरओ जणस्स अज्जेय ।
अज्जेय हलद्दीपिंजराइ गोलाइ तूहाइं ॥ १ ॥

375) अज्जं चेय पउत्थो अज्जं चिय सुन्नयाइ जायाइं ।
रच्छामुहदेउलचच्चराइ अम्हं च हिययाइं ॥ २ ॥

---

वृषभ, सुभग, वार्यमाणोऽपि यदि न तिष्ठसि, तदाऽभ्यर्थ्यं लक्ष्या वासः कमठं तस्य वासः पानीयं तद् दत्त्वा व्रजेति ॥ ३७२ ॥

373) [ अस्मिन्पथि मा व्रज गतपतिकया भणितं भुजं प्रसार्य । पथिक प्रियपदमुद्रा मलिनीक्रियते तव गमनेन ॥] हे पथिक अस्मिन् पथि मा व्रजेति गतपतिकया भुजं प्रसार्य भणितम । प्रियपदमुद्रा, गतस्य प्रियस्य चरणलाञ्छनं, तव गमनेन मलिनीक्रियते, प्रोञ्छ्यत इत्यर्थः । अयं भावः । गतस्य प्रेयसश्चरणमुद्रां पश्यन्ती जीवामीति वियोगिनीवाक्यम् ॥ ३७३॥

374) [ अद्यैव प्रोषित उज्जागरो जनस्याद्यैव । अद्यैव हरिद्रा-पिञ्जराणि गोदावर्यास्तटानि ॥ ] अद्यैव प्रोषितोऽद्यैव जनस्योज्जागरोऽद्यैव हरिद्रापिञ्जराणि गोदावर्यास्तटानि । अयं भावः । काचन नारी तत्क्षणा-देव प्रोषितं प्रियं दृष्ट्वा विरहासहत्वात् प्रलपितुमिदमारब्धवती । तस्मिन् मत्प्रिये प्रोषिते जनस्याद्योज्जागरो चौरभयत्वात् । तेन सुभटेन विना को नाम रक्षां करोति । अद्यैव हरिद्रापिञ्जराणि गोदावर्यास्तटानि । तस्मिन् सति सर्वा अपि नार्य आत्मवपूंषि हरिद्रापिञ्जराणि प्रत्यहं चक्रुस्तं कामुकाः । इदानीं च तस्मिन्प्रोषिते किमनेन हरिद्रारागेणास्माकमिति गोदावर्यां तत्क्षणादेव गत्वाक्षालयन्निति नदीतटपीतत्वम् । तूहं तटम् ॥ ३७४ ॥

375) [ अद्यैव प्रोषितोऽद्यैव शून्यानि जातानि । रथ्यामुखदेवकुल-चत्वराण्यस्माकं च हृदयानि ॥ ] अद्यैव प्रोषितोऽद्यैव शून्यानि जातान्य-स्मद्धृदयानि । न केवलं तानि रथ्यामुखदेवकुलचत्वराणि । अयं भावः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



376) अज्जं च्चिय तेण विणा इमीइ आयंबधवलकसणाइं ।
जच्चंधमोत्तियाइ व दिसासु घोलंति नयणाइं ॥ ३ ॥
377) अज्जं गओ त्ति अज्जं गओ त्ति अज्जं गओत्ति लिहिरीए ।
पढम च्चिय दियहद्धे कुड्डो रेहाहि चित्तलिओ ॥ ४ ॥
378) अवहिदियहागमासंकिरीहि सहियाहि तीइ लिहिरीए ।
दो तिन्नि तह च्चिय चोरियाइ रेहा फुसिज्जंति ॥ ५ ॥

पूर्वं नगरनार्यस्तद्रूपदिदृक्षया लालसाः सत्यो यत्र यत्र गमनागमनं स मत्प्रियो विधत्ते स्म तत्र तत्रैव रथ्यामुखदेशे देवकुलचत्वरेष्वादावेवागत्यास्थुः । इदानीं तु तस्मिन् प्रोषिते मद्हृदयेन साकं शून्यान्यभूवन्निति निजपुरुषरूपसौभाग्यप्रकटनोक्तिः ॥ ३७५ ॥

376) [ अद्यैव तेन विनैतस्या आताम्रधवलकृष्णे । जात्यन्धमौक्तिके इव दिक्षु घूर्णतो नयने ॥ ] अद्यैव तेन विना दिक्षु घूर्णतो नयने । के इव । जात्यन्धमौक्तिके इव । कस्याः । एतस्याः । किंविशिष्टे नयने । आताम्रधवलकृष्णे । इति नयनसामीप्यम्[1] । मौक्तिकयोश्चेदमेव विशेषणं दोषप्रकटनाय । कोऽर्थः । तस्यास्तेन पत्या विना आरक्तसितासितप्रान्तमध्ये नयने सर्वत्र परिभ्रमतः, परं कापि न पश्यतः । मौक्तिकमपि फूटं त्यक्तं सत् सर्वत्र पतितं न कोऽपि गृह्णाति ॥ ३७६ ॥

377) [ अद्य गत इत्यद्य गत इत्यद्य गत इति लिखनशीलया । प्रथम एव दिवसार्धे कुड्यं रेखाभिश्चित्रितम् ॥ ] अद्यैव गतः, अद्यैव गतः, अद्यैव गत इति रेखालिखनशीलया प्रथम एव दिवसार्धे मध्याह्न एव कुड्यं रेखाभिश्चित्रितम् । अयं भावः । कस्याश्चिद्विरहासहनशीलाया नायक एतावत्सु दिवसेष्वागमिष्यामि लग्न[2] इति कृत्यागमत् । तस्मिन् गतवति तत्क्षणादेव एकैकस्य दिवसस्य भ्रान्त्या खटिकयाद्यैव गत इति परःसहस्रा रेखा मुहूर्त एव चकार । इत्यात्मनो विरहमौग्ध्यप्रकटनम ॥ ३७७ ॥

378) [ अवधिदिवसागमाशङ्कनशीलाभिः सखीभिस्तस्यां लिखनशीलायाम् । द्वे तिस्रस्तथैव चौरिकया रेखाः प्रोञ्छ्यन्ते ॥ ] तस्यां

1 G, I नयनसामीप्यम् 2 G, I लग्नम्

For Private And Personal Use Only

379) 'कइया गओ पिओ', 'पुत्ति अज्ज', 'अज्जेव' कइ दिणा होंति'।
'एक्को', 'एद्दहमेत्तो' भणिउं मोहं गया बाला ॥ ६ ॥

380) तह कह वि कुम्मुहुत्ते नियट्टई वल्लहो जियंताणं।
जह फुडियसिप्पिसंपुडदलं व बीयं न संघडइ ॥ ७ ॥

381) विरहेण मंदरेण व हिययं दुद्धोदहिं व महिऊण।
उम्मूलियाइ अव्वो अम्हं रयणाइं व सुहाइं ॥ ८ ॥

---

लिखनशीलायामवधिदिवसागमशङ्कनशीलाभिः सखीभिर्द्वे तिस्रो रेखास्त-थैव चौरिकया प्रोञ्छ्यन्ते। अयं भावः। अवधिदिवसावसानशङ्किताम् (? शङ्किनीभिः) एतस्यामनिष्टं भावीति रेखाश्चौर्येणोन्मृज्यन्ते। सखी-कर्मेदम् ॥ ३७८ ॥

379) [ 'कदा गतः प्रियः', 'पुत्रि अद्य', 'अद्यैव कति दिनानि भवन्ति'। 'एकम्', 'एतावन्मात्रम्' भणित्वा मोहं गता बाला ॥ ] कदा गतः प्रियः। पुत्रि अद्य। अद्य इत्यनेन कति दिनानि भवन्ति। एकम्। एकमेतावन्मात्रं भवेदिति भणित्वा मोहं गता बाला। काचिद्विरहवेदनया दूना मातरमालापयन्तीति मुमोह। कदा गतः प्रियो मम हे मातः। तदाम्बा भणति, अद्येति। पुनः सा–अद्य इति कति दिनानि भवन्ति। पुनरम्बा–एकम्। पुनः पुत्री–एकमेतावदिति। अहो एकस्य दैर्घ्यमिति भणित्वा मुमोह ॥ ३७९ ॥

380) [ तथा कथमपि कुमुहूर्ते निवर्तते वल्लभो जीवताम्। यथा स्फुटितशुक्तिसंपुटदलमिव द्वितीयं न संघटते ॥ ] तथा कथमपि कुमुहूर्ते जीवतां वल्लभो निवर्तते। तथा कथम्। यथा स्फुटितशुक्तिसंपुटदलमिव द्वितीयं न संघटते ॥ ३८० ॥

381) [ विरहेण मन्दरेणेव हृदयं दुग्धोदधिमिव मथित्वा। उन्मू-लितान्यहो अस्माकं रत्नानीव सुखानि ॥ ] अव्वो इति दुःखसूचनायाम्। अस्माकं सुखान्युन्मूलितानि। केन। विरहेण। किं कृत्वा। हृदयं मथित्वा।

---

1 G, I कालेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



382) अज्जं पुण्णा अवही करेसु मुहमंडणं पयत्तेण।
अज्ज समप्पइ विरहो इंते वि पिए अइंते' वि ॥ ९ ॥

383) खणमेत्तं संतावो सेयो सीयं तहेय रोमंचो।
अम्हो दूसहणिज्जो पियविरहो संणिवाओ व्व ॥ १० ॥

384) उण्हुण्हा रणरणया दुप्पेच्छा दूसहा दुरालोया।
संवच्छरसयसरिसा पियविरहे दुग्गमा दियहा ॥ ११ ॥

---

किमिव मथित्वा कान्युन्मूलितानि केन। दुग्धोदधिं मथित्वा मन्दरेण रत्नान्युन्मूलितान्युत्थापितानि ॥ ३८१ ॥

382) [ अद्य पूर्णोऽवधिः कुरुष्व मुखमण्डनं प्रयत्नेन। अद्य समाप्यते विरह आयत्यपि प्रियेऽनायत्यपि ॥ ] हे सखि, अद्य पूर्णोऽवधिः। प्राकृतेऽपि क्वापि पुंलिंगे स्त्रीलिंगम्। कुरुष्व मुखमण्डनम् प्रयत्नेन। अद्य समाप्यते विरह आगच्छत्यनागच्छति वा प्रिये। कोऽर्थः। काचन विरहा-सहा कथितावधिदिवसेऽपि प्रियमनागतं मत्वा मरणेच्छुरित्थवादीत्। मण्डनादिकं कुरुष्व तावत्। अद्य विरह उभयथापि समाप्तिं यास्यति। यदि प्रियोऽयागात् तर्हि दिष्ट्या मण्डनम्। उत नायासीत् तदान्त्यमण्डनं भावीति ॥ ३८२ ॥

383) [ क्षणमात्रं संतापः स्वेदः शीतं तथैव रोमाञ्चः। अहो दुःसहनीयः प्रियविरहः संनिपात इव ॥ ] अहो दुःसहनीयः प्रियविरहः संनिपात इव। तदेव दर्शयति। क्षणमात्रं सन्तापस्तथा स्वेदः शीतं च तथैव रोमाञ्चः। एते विरहोत्थाः सात्त्विका भावा भवन्ति। संनिपाते तु विकृताः[2] ॥ ३८३ ॥

384) [ उष्णोष्णा रणरणककारिणो दुष्प्रेक्ष्या दुःसहा दुरालोकाः। संवत्सरशतसदृशाः प्रियविरहे दुर्गमा दिवसाः ॥ ] प्रियविरहे दिवसा दुःसहा ( ? दुर्गमा ) भवन्ति। कीदृशाः। उष्णोष्णाः। रणरणका रणरणककारिणः। दुष्प्रेक्षा, दुःसहा, दुरालोकाः, संवत्सरशतसदृशाः ॥ ३८४ ॥

---

1 G अंते वि पिए अयंते वि 2 I वैकृताः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



385) मयणाणिलसंधुक्खियणेहिंधणदुसहदूरपज्जलिओ ।
डहइ सहि पियविरहो जलणो जलणो च्चिय वराओ ॥१२॥

386) थोरंसुसलिलसित्तो हियए पज्जलइ पियविओयम्मि ।
विरहो हले हयासो अउव्वजलणो कओ विहिणा ॥ १३ ॥

387) विसहरविसग्गिसंसग्गदूसिओ डहइ चंदणो डहउ ।
पियविरहे महच्चोज्जं अमयमओ जं ससी डहइ ॥ १४ ॥

385) [ मदनानिलसंधुक्षितस्नेहेन्धनदुःसहदूरप्रज्वलितः । दहति सखि प्रियविरहो ज्वलनो ज्वलन एव वराकः ॥ ] हे सखि प्रियविरहो दहति । किंविशिष्टः । मदनानिलसंधुक्षित[1]स्नेहेन्धनदुःसहो दूरमत्यर्थं प्रज्वलितः । अत एव ज्वलनो ज्वलन एव वराकः ॥ ३८५ ॥

386) [ स्थूलाश्रुसलिलसिक्तो हृदये प्रज्वलति प्रियवियोगे । विरहो हले हताशोऽपूर्वज्वलनः कृतो विधिना ॥ ] हे हले सखि, विरहो हृदये प्रज्वलति । कदा । प्रियवियोगे । किंविशिष्टो विरहः । थोरंसुसलिलसित्तो दीर्घाक्षिजल( ? स्थूलाश्रुजल )सिक्तः । अत एवापूर्वो विधात्रा ज्वलनो विरचितः । यः किल ज्वलनः स जलसिक्तो विध्याति, अयं तु प्रत्युत जाज्वल्यते हृदये ॥ ३८६ ॥

387) [ विषधरविषाग्निसंसर्गदूषितो दहति चन्दनो दहतु । प्रियविरहे महाश्चर्यममृतमयो यच्छशी दहति ॥ ] हे सखि, विषधरविषाग्निसंसर्गदूषितश्चन्दनो दहति । दहतु । योऽग्नेरुत्पन्नः स दाहकत्वाद् दहत्येव । तत्स्वभाववासितत्वात्तस्य । प्रियविरहे महच्चोज्जं महदाश्चर्यम् । चोज्जं आश्चर्यम् इति देशीयपदम् । 'चुज्जमच्छरिए' इति हैमदेशीयनाममालायां तृतीयकाण्डे ( ३. १४ ) । [2]यदसावमृतमयश्चन्द्रो दहति । चन्द्रः सर्वदा शीतलो दुग्धाब्धेरुत्पन्नश्च । असावेव यद्दहति एतदाश्चर्यम् ॥ ३८७ ॥

1 G, I मदनानलसंधुक्षितः
2 G मम यदसावमृतमयश्चन्द्रो दहति ( मम दहति = मां दहति )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



388) ओसरसु मयण घेत्तूण जीवियं हरहुयासणुच्चरियं[1] ।
पियविरहजलणजालावलीहि सहस त्ति डज्झिहिसि ॥ १५ ॥
389) जेहिं सोहग्गणिही दिट्ठो नयणेहि ते च्चिय रुयंतु ।
अंगाइ अपावियसंगमाइ ता कीस झिज्जंति ॥ १६ ॥

४०. अणंगवज्जा [ अनङ्गपद्धतिः ]

390) अन्नो[3] को वि सहावो वम्महसिहिणो हला हयासस्स ।
विज्झाइ नीरसाणं हियए सरसाण पज्जलइ ॥ १ ॥

388) [ अपसर मदन गृहीत्वा जीवितं हरहुताशनोच्चरितम् । प्रियविरहज्वलनज्वालावलीभिः सहसा धक्ष्यसे ॥ ] हे मदन, अपसर मम शरीरादिति योऽयम् । जीवितं गृहीत्वा । किंविशिष्टं जीवितम् । हरहुताशनोद्भूतम् । प्रियविरहज्वलनज्वालावलीभिः सहसा धक्ष्यसे । अयं भावः । विरहकरालितान्मच्छरीरान्मदनो दूरीभवतु । अन्यथा हरनयनहुताशनप्लुष्टो जीवितशेषः समुद्भूतः[2] ( ? समुद्धृतः ) इदानीं तु विरहज्वालामालाज्वलितो मा वराकोऽनङ्गो म्रियतामिति विरहाग्निप्राचुर्यवर्णनम् ॥ ३८८ ॥

389) [ याभ्यां सौभाग्यनिधिर्दृष्टो नयनाभ्यां ते एव रुदताम् । अङ्गान्यप्राप्तसंगमानि तत् कस्मात् क्षीयन्ते ॥ ] हे सखि, यकाभ्यां नयनाभ्यां स सौभाग्यनिधिर्दृष्टस्ते एव रुदतान् । अङ्गानि त्वप्राप्तसंगमानि किमिति क्षीयन्ते । अयं भावः । तं सुभगयुवानमालोकयन्त्याः सर्वेऽप्यवयवा दुःखिता भवन्ति । तत् कुतः कारणात् । येन यद्वस्तु लब्धं तद्विरहे स एव रोदिति । अन्ये किमिति दुःखायन्ते । इत्यात्माङ्गपीडाप्रकटनम् ॥ ३८९ ॥

390 ) [ अन्यः कोऽपि स्वभावो मन्मथशिखिनः सखि हताशस्य । वीध्यते नीरसानां हृदये सरसानां प्रज्वलति ॥ ] अहो कोऽपि स्वभावो मन्मथशिखिनः सखि हताशस्य । कथं, तदेव दर्शयति । नीरसानां

1 G हरहुयासणुच्च रयं, I हरहुयासणुद्धरियं 2 G समुद्गत
3 B, C, G, I अन्नो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



391) दिट्ठी दिट्ठिप्पसरो पसरेण रई रईइ सब्भावो ।
सब्भावेण य नेहो पंच वि बाणा अणंगस्स ॥ २ ॥

392) उवरि महं चिय वम्मह पंच वि बाणा निसंस रे मुक्का ।
अन्नं उण तरुणिजणं किं हणिहिसि चावलट्ठीए ॥ ३ ॥

393) इच्छाणियत्तपसरो कामो कुलबालियाण किं कुणइ ।
सीहो व्व पंजरगओ अंग च्चिय झिज्जइ वराओ ॥ ४ ॥

394) य कुसुमसरा तुह डज्झिहिंति मा भणसु मयण न हु भणियं ।
पियविरहतावतविए मह हियए पक्खिवंतस्स ॥ ५ ॥

---

हृदये विध्याति, सरसानां प्रज्वलति । अग्नेस्तु स्वभावो, नीरसेषु काष्ठादिषु प्रज्वलति । सरसेषु च विध्याति । अस्य पुनः प्रतीपत्वम् । अत एवापूर्वो मन्मथाग्निः ॥ ३९० ॥

391 ) [ दृष्टिर्दृष्टिप्रसरः प्रसरेण रती रत्या सद्भावः । सद्भावेन च स्नेहः पञ्चापि बाणा अनङ्गस्य ] दृष्टिस्तदनु दृष्टिप्रसरः प्रसरेण रतिः, रत्या सद्भावः, सद्भावेन च स्नेहः, पञ्चापि बाणा अनङ्गस्य ॥ ३९१ ॥

392 ) [ उपरि ममैव मन्मथ पञ्चापि बाणा नृशंस रे मुक्ताः । अन्यं पुनस्तरुणीजनं किं हनिष्यसि चापयष्ट्या ॥ ] ममैवोपरि हे मन्मथ पञ्चापि बाणा नृशंस घातक रे मुक्ताः । अन्यं तरुणीजनं किं चापयष्ट्या हनिष्यसि । अन्योऽपि यस्त्यक्तसर्वबाणो भवति, स धनुषैव युध्यते ॥३९२॥

393) [ इच्छानिवृत्तप्रसरः कामः कुलबालिकानां किं करोति । सिंह इव पञ्जरगतोऽङ्ग एव क्षीयते वराकः ॥ ] कामः कुलबालिकानां कुलपुत्रीणां किं करोति । सिंह इव पञ्जरस्थोऽङ्ग एव क्षीयते वराकः । किंविशिष्टोऽनङ्गः । इच्छानिवृत्तप्रसरः । कुलबालिकाः कामं हृदय एव मारयन्तीति भावः ॥ ३९३ ॥

394) [ हे कुसुमशरास्तव धक्ष्यन्ते मा भण मदन न खलु भणितम् । प्रियविरहतापतप्ते मम हृदये प्रक्षिपतः ॥ ] रे मदन मा भणेति न खलु त्वया भणितम् । किमित्याह । तव कुसुमान्येव शरा धक्ष्यन्ते । किं कुर्वतस्तव । मम हृदये प्रक्षिपतः । किंविशिष्टे हृदये । प्रियविरहतापतप्ते ॥ ३९४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



395) मइरा मयंककिरणा महुमासो कामिणीण उल्लावो[1]।
पंचमसरस्स गेओ तलवग्गो कामदेवस्स ॥ ६ ॥

396) वम्मह पसंसणिज्जो सि वंदणिज्जो सि गुणमहग्घो सि।
गोरी हरस्स देहद्धवासिणी जेण निम्मविया ॥ ७ ॥

397) सच्चं अणंग कोयंडवावडो सरपहुत्तलक्खो सि।
तरुणीचलंतलोयणपुरओ जइ कुणसि संधाणं ॥ ८ ॥

## ४१. पुरिसुल्लावपवज्जा [ पुरुषोल्लापपद्धतिः ]

398) कह सा न संभलिज्जइ जत्थ वि निवसंति पंच वत्थूणि।
वीणावंसालावणिपारावयकोइलालवियं ॥ १ ॥

395) [ मदिरा मृगाङ्ककिरणा मधुमासः कामिनीनामुल्लापः। पञ्चमस्वरस्य गेयः सेवकवर्गः कामदेवस्य ॥ ] मदिरा, मृगाङ्ककिरणा, मधुमासः, कामिनीनामुल्लापः, पञ्चमस्वरस्य गीतं तलवर्गः सेवकलोकः कामदेवस्यैतत् ॥ ३९५ ॥

396 ) [ मन्मथ प्रशंसनीयोऽसि वन्दनीयोऽसि गुणमहार्घोऽसि। गौरी हरस्य देहार्धवासिनी येन निर्मिता ॥ ३९६ ॥ ]

397 ) [ सत्यमनङ्ग कोदण्डव्यापृतः शरप्रभूतलक्ष्योऽसि। तरुणीचलल्लोचनपुरतो यदि करोषि संधानम् ॥ ] सत्यं कोदण्डव्यापृतः कोदण्डयुक्तोऽसि, शरप्राप्तलक्ष्योऽसि, तरुणीचलल्लोचनपुरतो यदि सन्धानं करोषि रे मदन। अयं भावः। तावदेव कामः स्वपरवशौ दम्पती मारयति यावत्कामिनीकटाक्षबाणपूगपूरिताङ्गो न भवति। पश्चात्सोऽपि तादृग्विधः स्वैरेव बाणैर्मार्यते प्रत्युतेति ॥ ३९७ ॥

398 ) [ कथं सा न संस्मर्यते यत्रापि निवसन्ति पञ्च वस्तूनि। वीणावंशालापिनीपारावतकोकिलालपितम् ॥ ] कथं न सा संस्मर्यते यत्र निवसन्ति पञ्च वस्तूनि। वीणा, वंशः, आलापिनी वीणाविशेषः, (पारावतः), कोकिला एतेषां शब्दः। या वीणावंशालापिनी[2]कलरवकोकिलास्वरा वर्तते ॥ ३९८ ॥

---

1 G उल्लावा 2 I आलवनि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



399) कह सा न संभलिज्जइ जा सा अत्तत्तकणयतणुसोहा।
तिवलीतरंगमज्झा हरइ मणं वरमइंदाणं ॥ २ ॥

400) कह सा न संभलिज्जइ जा सा नवणलिणिकोमला बाला।
कररुह तणु छिप्पंती अकाल घणमद्दवं कुणइ ॥ ३ ॥

401) कह सा न संभलिज्जइ जा सा घरबारतोरणणिसण्णा।
हरिणि व्व जूहभट्ठा अच्छइ मग्गं पलोयंती[1] ॥ ४ ॥

402) कह सा न संभलिज्जइ जा सा नीसाससोसियसरीरा।
आसासिज्जइ सासा जाव न सासा समप्पंति ॥ ५ ॥

399) [कथं सा न संस्मर्यते या सा तप्तकनकतनुशोभा। त्रिवलीतरङ्गमध्या हरति मनो वरमतीन्द्राणाम् ॥] कथं न सा संस्मर्यते या सा दग्धकनकतनुशोभा, त्रिवलीतरङ्गमध्या हरति मनो वरमइंदाणं। वरा मतिर्येषां ते वरमतयो मुनयस्तेषामिन्द्राः स्वामिनस्तेषां मुनीश्वराणाम्। अथवा सत्पुरुषाणाम् ॥ ३९९ ॥

400) [कथं सा न संस्मर्यते या सा नवनलिनीकोमला बाला। कररुहैः तनुं स्पृशन्ती अकाले घनभाद्रपदं करोति ॥] कथं न सा संस्मर्यते या सा बाला नवनलिनीकोमला कररुहैस्तनुं स्पृशन्ती अकालेऽप्रस्तावे ज्येष्ठाषाढादौ घनभाद्रपदं करोति ॥ ४०० ॥

401) [कथं सा न संस्मर्यते या सा गृहद्वारतोरणनिषण्णा। हरिणीव यूथभ्रष्टा आस्ते मार्गं प्रलोकयन्ती ॥] कथं न सा संस्मर्यते या सा गृहद्वारतोरणनिषण्णा यूथभ्रष्टा हरिणीव मार्गं प्रलोकयन्ती—कदा मम भर्ता समागमिष्यतीति—तिष्ठति ॥ ४०१ ॥

402) [कथं सा न संस्मर्यते या सा निःश्वासशोषितशरीरा। आश्वास्यते श्वासा यावन्न श्वासाः समाप्यन्ते ॥] कथं न सा संस्मर्यते या सा निःश्वासशोषितशरीरा, आश्वास्यते सासा यावच्छ्वासा न समाप्यन्ते ॥ ४०२ ॥

---

1 G, I पुलोयंती

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ४२. पियाणुरायवज्जा [ प्रियानुरागपद्धतिः ]

403) मुहराओ च्चिय पयडइ जो जस्स पिओ किमेत्थ भणिएण।
साहेइ अंगणं च्चिय घरस्स अब्भंतरे लच्छि ॥ १ ॥

404) डज्झंति कढंति समूससंति ओ माइ सिमिसिमायंति।
जीवंति जीवसेसा जे रमिया पोढमहिलाहिं ॥ २ ॥

405) कंपंति वलंति समूससंति ओ माइ सिमिसिमायंति।
अंगाइ तस्स पुरओ न याणिमो कह धरिज्जंति ॥ ३ ॥

406) नीससिउक्कंपियपुलइएहि जाणंति नच्चिउं धन्ना।
अम्हारिसीण दिट्ठे पियम्मि अप्पा वि वीसरइ ॥ ४ ॥

---

403) [ मुखराग एव प्रकटयति यो यस्य प्रियः किमत्र भणितेन। कथयत्यङ्गणमेव गृहस्याभ्यन्तरे लक्ष्मीम् ॥ ] मुखराग एव प्रकटयति यो यस्य प्रियः किमत्र भणितेन। अमुमर्थमर्थान्तरेण साधयति। अङ्गणमेव कर्तृ कथयति गृहस्याभ्यन्तरस्थितां लक्ष्मीम् ॥ ४०३ ॥

404) [ दह्यन्ते क्वथ्यन्ते समुच्छ्वसन्त्यहो सिमिसिमायन्ते। जीवन्ति जीवशेषा ये रमिताः प्रौढमहिलाभिः ॥ ] 'ओ' इति अहो। माइ हे मातः। ये प्रौढमहिलाभी रमितास्ते जीवशेषा जीवन्ति, जीव एव केवलं तेषु तिष्ठति। कथं ज्ञायत इत्याह। दह्यन्ते, क्वथ्यन्ते। समुच्छ्वसन्ति, सिमिसिमायन्ते ॥ ४०४ ॥

405) [ कम्पन्ते वलन्ते समुच्छ्वसन्त्यहो मातः सिमिसिमायन्ते। अङ्गानि तस्य पुरतो न जानीमः कथं धार्यन्ते ॥ ] हे मातस्तस्य पुरतोऽङ्गानि कथं धार्यन्त इति वयं न जानीमः। यतोऽङ्गानि तस्मिन् प्रेयसि दृष्टे कम्पन्ते, वलन्ति, समुच्छ्वसन्ति, सिमिसिमायन्ते। कोऽर्थः। प्रियं दृष्ट्वा मदङ्गानि इमामवस्थामालम्बन्त इति ॥ ४०५ ॥

406) [ निःश्वसितोत्कम्पितपुलकितैर्जानन्ति नर्तितुं धन्याः। अस्मादृशीनां दृष्टे प्रिय आत्मापि विस्मर्यते ॥ ] धन्याः स्त्रियो निःश्वासोत्कम्पितपुलकितैर्नर्तितुं जानन्ति। अस्मादृशीनां पुनर्दृष्टे प्रेयस्यात्मापि विस्मर्यते। कोऽर्थः। प्रियं दृष्ट्वा धन्याः स्त्रियो निःश्वसितोत्कम्पित-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



407) अच्छउ ता फंसमुहं अमयरसाओ वि दूररमणिज्जं ।
दंसणमेत्तेण वि पियथमस्स भण किं न पज्जत्तं ॥ ५ ॥

408) अच्छउ ता लोयणगोयरम्मि पडिएण तेण जं सोक्खं ।
आयण्णिए वि पियसहि पिए जणे होइ निव्वाणं ॥ ६ ॥

409) हत्थप्फंसेण वि पिययमस्स जा होइ सोक्ख संपत्ती ।
सा सरभसगाढालिंगिए वि इयरे जणे कत्तो ॥ ७ ॥

410) ता किं करेमि माए लोयणजुयलस्स हयसहावस्स ।
एक्कं मोत्तूण पियं लक्खेवि न लक्खए लक्खं ॥ ८ ॥

---

पुलकितानि कुर्वन्ति । वयं पुनरात्मानमेव काहं, कुतस्तिष्ठामीति विस्मरामः ।। ४०६ ।।

407) [ आस्तां तावत्स्पर्शसुखममृतरसादपि दूररमणीयम् । दर्शनमात्रेणापि प्रियतमस्य भण किं न पर्याप्तम् ।। ] तिष्ठतु तावत्स्पर्शसुखममृतरसादपि दूररमणीयमत्यर्थं रमणीयम् । दर्शनमात्रेणापि प्रियतमस्य भण कथय किं न पर्याप्तम् ।। ४०७ ।।

408) [ आस्तां तावल्लोचनगोचरे पतितेन तेन यत्सुखम् । आकर्णितेऽपि प्रियसखि प्रिये जने भवति निर्वाणम् ।। ] हे प्रियसखि प्रिये जन आकर्णितेऽपि निर्वाणं सुखं भवति । आस्तां तावल्लोचनगोचरे पतितेन तेन । अयं भावः । लोचनगोचरमनागतस्यापि प्रियस्य नामाकर्णनमपि सुखं करोति ।। ४०८ ।।

409) [ हस्तस्पर्शेनापि प्रियतमस्य या भवति सौख्यसंपत्तिः । सा सरभसगाढालिङ्गितेऽपीतरस्मिञ्जने कुतः ।। ] हे सखि प्रियतमस्य हस्तस्पर्शेनापि या सुखसंपत्तिर्भवति, सा सरभसगाढालिङ्गितेऽपीतरस्मिन् जने कुतः । प्रियतमहस्तस्पर्शोऽप्यन्यजनगाढालिङ्गनादप्यतिरिच्यत इति भावः । असती नायिका ।। ४०९ ।।

410) [ तत् किं करोमि मातर्लोचनयुगलस्य हतस्वभावस्य । एकं मुक्त्वा प्रियं लक्षयित्वा न लक्षयति लक्षम् ।। ] ततः किं करोमि मातर्हतस्वभावस्यामुष्य लोचनयुगलस्य । किमिति । यत एकं प्रियं मुक्त्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



411) ता किं करेमि पियसहि पियस्स सोहग्गभारभमिरस्स।
रायंगणं व खुब्भइ जस्स घरं दूइसंघेहिं ॥ ९ ॥

412) तह तेण वि सा दिट्ठा तीए तह तस्स पेसिया दिट्ठी।
जह दोण्ह वि समयं चिय निव्वत्तरयाइं जायाइं ॥ १० ॥

४२. दूईवज्जा [ दूतीपद्धतिः ]

413) दूइ तुमं चिय कुसला कक्खडमउयाइ जाणसे वोत्तुं।
कंडुइयपंडुरं जह न होइ तह तं कुणिज्जासु ॥ १ ॥

---

लक्ष्येऽपि दृष्टिगोचरेऽपि लक्षं जनान्नैव लक्षयति । लक्षमपि जनाननालोक्य प्रियमेवावलोकयति लोचनयुगलम् ॥ ४१० ॥

411) [ तत् किं करोमि पियसखि प्रियस्य सौभाग्यभारभ्रमणशीलस्य। राजाङ्गणमिव क्षुभ्यति यस्य गृहं दूतीसंघैः ॥ ] ततः किं करोमि प्रियसखि प्रियस्य सौभाग्यभारभ्रमणशीलस्य। अपि तु न किमपि। यतो यस्य गृहं वासस्थानं दूतीसंघैः क्षुभ्यते। किमिव। राजाङ्गणमिव। यथा राजाङ्गणं दूतसंघैरन्यराजप्रेषितैर्दूतैः क्षुभ्यते। अयं भावः। यं सुभगयुवावतंसं सर्वा अपि नार्यो दूतीः प्रेषयित्वा ( ? प्रेष्य ) प्रत्यहं कामयन्ते तत्र मादृशो जनस्य मानवैरी कथमवकाशं लभतामिति ॥ ४११ ॥

412) [ तथा तेनापि सा दृष्टा तया तथा तस्य प्रेषिता दृष्टिः। यथा द्वयोरपि सममेव निर्वृत्तरतानि जातानि ॥ ] तेनापि तथा सा दृष्टा तयापि तस्य प्रेषिता दृष्टिस्तया, यथा द्वयोरपि सममेवैककालमेव निर्वृत्तरतानि जातानि। युवा तया कटाक्षितस्तेनापि सा कटाक्षिता, यथा गाढालिङ्गनं विनापि सुरतसुखमन्वभूतामिति भावः ॥ ४१२ ॥

413) [ दूति त्वमेव कुशला कठिनमृदूनि जानासि वक्तुम्। कण्डूयितपाण्डुरं यथा न भवति तथा त्वं कुर्याः ॥ ] हे दूति त्वमेव कुशला कठिनमृदूनि जानासि वक्तुम्। कण्डूयितपाण्डुरं यथा न भवति तथा त्वं कुर्याः। यथा स्वयमेव प्रियमभिससारैषेति लघुतां यथा न यामि, कार्यं च यथा सिध्यतीति। कण्डूयितपाण्डुरं ( ? कण्डूयितं पाण्डुरं ) यथा न संपद्यत इति ॥ ४१३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



414) कित्तियमेत्तं एयं एसावत्था उ सहि सरीरस्स ।
महिला महिलाण गई जं जाणसि तं कुणिज्जासु ॥ २ ॥
415) जं तुह कज्जं भण तं मह त्ति जं जाणिउं भणेज्जासु ।
ओ दूइ सच्चवयणेण तं सि पारं गया अज्ज ॥ ३ ॥
416) तिलयं विलयं विवरीय कंचुयं सेयभिन्न सव्वंगं ।
पडिवयणं अलहंता दूई कलिऊण सा हसिया ॥ ४ ॥
417) जइ सो न एइ गेहं ता दूइ अहोमुही तुमं कीस ।
सो होही मज्झ पिओ जो तुज्झ न खंडए वयणं ॥ ५ ॥

414) [ कियन्मात्रमेतदेषावस्था तु सखि शरीरस्य । महिला महिलानां गतिर्यज्जानासि तत्कुर्याः ॥ ] हे सखि कियन्मात्रमेतत्, एषावस्था तु शरीरस्य । महिला महिलानां गतिर्यज्जानासि तत्कुर्याः । मम भर्तुः परःसहस्रा अपराधाः । तेषु खलु यदि मानमवलम्बेय तर्हि शरीरस्येयमवस्था । अतः कारणादेवंविधे व्यतिकरे त्वमेव मम शरणम् । येन केन प्रकारेण स आगच्छति तद् विदधीथा इति भावः ॥ ४१४ ॥

415) [ यत्तव कार्यं भण तन्ममेति यज्ज्ञातुं भणेः । हे दूति सत्यवचनेन त्वमसि पारं गताद्य ॥ ] यत्तव कार्यं तन्मदीयं भण । यज्ज्ञातुं तद्भणेः । ओ दूइ हे दूति, सत्यवचनेन त्वं पारं गतासि अद्य ॥४१५॥

416) [ तिलकं विलयं विपरीतं कञ्चुकं स्वेदभिन्नं सर्वाङ्गम् । प्रतिवचनमलभमाना दूती कलयित्वा सा हसिता ॥ ] तिलकं विलयं, विपरीतं कञ्चुकं, स्वेदभिन्नसर्वाङ्गम् । प्रतिवचनमलभमाना कोपेन 'एवमकार्षीर्हे दूति' इति कलयित्वा सा हसिता ॥ ४१६ ॥

417) [ यदि स नैति गेहं तद् दूति अधोमुखी त्वं कस्मात् । स भविष्यति मम प्रियो यस्तव न खण्डयति वचनं ( वदनम् ) ॥ ] हे दूति यदि स न गेहमेति, ततस्त्वं किमित्यधोमुखी भवसि । स भविष्यति मम प्रियो यस्तव वचनं न खण्डयति, तवादेशं करिष्यति । अयं भावः । कयाचिन्नायिकया प्रेषिता दूती प्रियं प्रति, तत्रैव तेन सह सुरतसुखमनुभूय खण्डिताधरा, एवंविधं मुखं कथं तस्यै दर्शयामीत्यधोमुखी आगतवती । तां च तथाविधामवलोक्य नायिका प्रकारान्तरेण प्रतिभिनत्ति । हे सखि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



418) दूइ समागमसेउल्लयंगि दरल्हसियसिचयधम्मिल्ले ।
थणजहणकवोलणहक्खएहि नाया सि जह पडिया ॥ ६ ॥

419) इय रक्खसाण वि फुडं दूइ न खज्जंति दूइया[1] लोए ।
अह एरिसी अवत्था गयाण अम्हं वसे जाया ॥ ७ ॥

420) अच्छउ ताव सविब्भमकडयखविक्खेवजंपिरी दूई ।
तग्गामकुडिलसुणहिलया वि दिट्ठा सुहावेइ ॥ ८ ॥

421) वेल्लहलालाववियक्खणाउ अडयणपउत्तिहरणाओ ।
सो रण्णो नो गामो जत्थ न दो तिन्नि दूईओ ॥ ९ ॥

किमित्यधोमुखी भवसि । यस्तव वदनमोष्ठं खण्डयति स मम प्रियः कथम् । त्वां सेवमानो मम वैर्येवेति भावः ॥ ४१७ ॥

418) [ दूति समागमस्वेदार्द्राङ्गि ईषत्स्रस्तसिचयकेशपाशे । स्तनजघनकपोलनखक्षतैर्ज्ञातासि यथा पतिता ॥ ] हे समागमस्वेदार्द्राङ्गि, ईषत्स्रस्तवस्त्रकेशपाशे, स्तनजघनकपोलनखक्षतैर्ज्ञातासि यथा त्वं पतितासि । सुरतोद्भूतस्वेदाम्, ईषत्स्रस्तवस्त्रकेशपाशाम् अवलोक्य काचन दूतीं प्रतिभिनत्ति ॥ ४१८ ॥

419) [ एवं राक्षसानामपि स्फुटं दूति न खाद्यन्ते दूतिका लोके । अथेदृश्यवस्था गतानामस्माकं वशे जाता ॥ ] एवं राक्षसानामपि स्फुटं दूतिका लोके । अथेदृश्यवस्था गतानामस्माकं वशे जाता ॥ ४१९ ॥

420) [ आस्तां तावत्सविभ्रमकटाक्षविक्षेपजल्पनशीला दूती । तद्ग्रामकुटिलशुनक्यपि दृष्टा सुखयति ॥ ] तिष्ठतु तावत्सविभ्रमकटाक्षक्षेपोपलक्षितजल्पनशीला दूती, तद्ग्रामकुटिलशुनक्यपि दृष्टा सुखयति ॥ ४२० ॥

421) [ कोमलालापविचक्षणा असतीप्रवृत्तिहारिण्यः । तदरण्यं न ग्रामो यत्र न द्वे तिस्रो दूत्यः ॥ ] यत्र न द्वे तिस्रो दूत्यः सन्ति, सोऽरण्यं न तु ग्रामः । किंविशिष्टा दूत्यः । विकसदालापविचक्षणा असतीप्रवृत्तिहारिण्यः । वेल्लहलं विहसितम्[2] । अडयणा असती ॥ ४२१ ॥

1 G दूअया 2 I विकसितम्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ४४. ओलुग्गाविया वज्जा [अवरुग्णापद्धतिः]

422) तुह गोत्तायण्णणवियडरमणपज्झरियरसजलेणं व ।
रइमंदिरम्मि बाला अब्भुक्खंती परिब्भमइ ॥ १ ॥

423) तुह संगमदोहलिणीइ तीइ सोहग्गविंभियासाए ।
नवसियसयाइ देंतीइ सुहय देवा वि न हु पत्ता ॥ २ ॥

424) तुह अन्नेसणकज्जम्मि सुहय सा हरिसवियसियकवोला ।
जं जत्थ नत्थि तं तत्थ मग्गमाणी चिरं भमिया ॥ ३ ॥

425) अगणियसेसजुयाणा बालय वोलीणलोयमज्जाया ।
अह सा भमइ दिसामुहपसारियच्छी तुह कएण ॥ ४ ॥

---

422) [तव गोत्राकर्णनविकटरमणप्रस्नुतरसजलेनेव । रतिमन्दिरे बालाभ्युक्षन्ती परिभ्रमति ॥] हे नायक त्वद्गोत्राकर्णनविकटकटिस्थल-प्रस्नुतरसजलेनेव रतिमन्दिरे बालाभ्युक्षणशीला परिभ्रमति । अयं भावः । तव नामाकर्णनेनापि गृहमध्ये द्रवीभूतचित्ता परिभ्रमन्त्यपि द्रवति ॥४२२॥

423) [तव सङ्गमदोहदवत्या तया सौभाग्यविजृम्भिताशया । उपयाचितकशतानि ददत्या सुभग देवा अपि न प्राप्ताः ॥] तव सङ्गमे दोहदवत्या तया सौभाग्यविजृम्भिताशया, नवसितशतानि ददत्या सुभग देव्यपि न प्राप्ता । यत् पूर्णे मनोरथे देवादिभ्यो दीयते तन्नवसितम् ॥४२३॥

424) [तवान्वेषणकार्ये सुभग सा हर्षविकसितकपोला । यद्यत्र नास्ति तत्तत्र मार्गयन्ती चिरं भ्रान्ता ॥] तवान्वेषणकार्ये सरभसविकसित-कपोला यद्यत्र नास्ति तत् तत्र मार्गयन्ती चिरं भ्रमिता हे सुभग ॥४२४॥

425) [अगणितशेषयुवजना बालकातिक्रान्तलोकमर्यादा । अथ सा भ्रमति दिङ्मुखप्रसारिताक्षी तव कृते ॥] हे बालक असौ सा मत्सखी अगणितशेषयुवजनातिक्रान्तलोकमर्यादा त्वत्कृते दिङ्मुख-प्रसारिताक्षी भ्राम्यति । समस्तानपि यूनस्तृणवत् त्यक्त्वा सुभगमौलि-चूडामणिं त्वामेवान्वेषयन्ती परिभ्रमति ॥ ४२५ ॥

For Private And Personal Use Only

426) नयणाइ तुह विओए घोलिरवाहाइ सुहय तणुईए।
हिययट्ठियसोयहुयासधूमभरियाइ व गलंति ॥ ५ ॥

427) वइमग्गपेसियाइं तीए नयणाइ तम्मि वोलीणे।
अज्ज वि गलंति पडिलग्गकंटयाइ व्व ओ सुहय ॥ ६ ॥

428) संभरिऊण य रुण्णं तीइ तुमं तह विमुक्कपुक्कारं।
निद्दय जह सुहियस्स वि जणस्स ओ निवडिओ बाहो ॥ ७ ॥

429) एक्केक्कमवइवेढियविवरंतरतरलदिन्नणयणाए।
तइ वोलंते बालय पंजरसउणाइयं तीए ॥ ८ ॥

---

426) [ नयने तव वियोगे घूर्णनशीलबाष्पे सुभग तन्व्याः। हृदयस्थितशोकहुताशधूमभृते इव गलतः ॥ ] हे सुभग, तस्यास्तन्व्या नयने त्वद्वियोगे हृदयस्थितशोकहुताशधूमभृते इव गलतः। किंविशिष्टे नयने। प्रसारितबाष्पे। त्वद्वियोगशोकाग्निधूमपूरपिहिते इव नयने वहतोऽनवरतम् ॥ ४२६ ॥

427 ) [ वृतिमार्गप्रेषिते तस्या नयने तस्मिन्नतिक्रान्ते। अद्यापि गलतः प्रतिलग्नकण्टके इव हे सुभग ॥ ] हे सुभग तस्या नयने तस्मिन्नतिक्रान्तेऽद्यापि गलतः। किंविशिष्टे। वृतिविवरमार्गप्रेषिते। उत्प्रेक्षते। अक्षिणी[1] प्रतिलग्नकण्टके इव प्रतिलग्नकण्टककर्करे ( इव ) भवतः। तदा गलतः। सा तं युवानमवलोकयितुं वृतिच्छिद्रेष्वक्षिणी प्रक्षिप्तवती। तस्मिंश्चातिक्रान्ते विरहासहत्वादक्षिप्रतिलग्नकण्टकत्वादिवानवरतं रोदितीति ॥ ४२७ ॥

428) [ संस्मृत्य च रुदितं तया त्वां तथा विमुक्तपूत्कारम्। निर्दय यथा सुखितस्यापि जनस्याहो निपतितो बाष्पः ॥ ] हे निर्दय त्वां संस्मृत्य तया तथा विमुक्तपूत्कारं रुदितं, यथा सुखितजनस्य पार्श्वस्थितस्य दयितस्यापि जनस्याहो निपतितो बाष्पः ॥ ४२८ ॥

429) [एकैकवृतिवेष्टितविवरान्तरतरलदत्तनयनया। त्वय्यतिक्रामति बालक पञ्जरशकुनवदाचरितं तया ॥ ] त्वय्यतिक्रान्ते हे बालक, तया

---

1 G, I अक्षिणी चेत् प्रतिलग्नकण्टके भवतः तदा गलतः।

430) नयणब्भंतरघोळंतबाहभरमंथराइ दिट्ठीए।
पुणरुत्तपेच्छिरीए बालय ता किं न भणिओ सि ॥ ९ ॥

431) सुहय गयं तुह विरहे तिस्सा हिययं पवेविरं अज्ज।
करिचलणचंपणुच्छलियतुच्छतोयं मिव दिसासु ॥ १० ॥

432) सा तइ सहत्थदिन्नं अज्ज वि ओ सुहय गंधरहियं पि।
उव्वसियणयरघरदेवय व्व ओमालयं[1] वहइ ॥ ११ ॥

पञ्जरशकुनायितं पञ्जरस्थितशकुनवत् आचरितम्। किंविशिष्टया तया। एकैकस्य वृतिवेष्टकस्य[2] विवरान्तरतरलदत्तनयनया। त्वामवलोकयितुं दत्तवृतिविवरनयनया पञ्जरस्थितशकुनवत् संजातमिति भावः ॥४२९ ॥

430) [ नयनाभ्यन्तरघूर्णद्बाष्पभरमन्थरया दृष्ट्या। पुनरुक्तप्रेक्षणशीलया बालक ततः किं न भणितोऽसि ॥ ] हे बालक ततः किमिति न भणितोऽसि। केन साधनेनेत्याह। दृष्ट्या। किंविशिष्टया दृष्ट्या। नयनाभ्यन्तरघूर्णद्बाष्पभरमन्थरया। पुनरुक्तं पुनः पुनः प्रेक्षणशीलया। किमिति न भणितोऽसि। त्वामवलोकयन्त्या त्वद्विरहाश्रुपातकलुषितया पुनः पुनः प्रेषितया दृष्ट्या भणितोऽस्येव ॥ ४३० ॥

431) [ सुभग गतं तव विरहे तस्या हृदयं प्रवेपनशीलमद्य। करिचरणाक्रमणोच्छलिततुच्छतोयमिव दिक्षु ॥ ] हे सुभग त्वद्विरहे (तस्याः) प्रकम्पनशीलं हृदयं दिक्षु गतम्। किमिव। करिचरणाघातोच्छलितं स्तोकं तोयं प्रकम्पनशीलं सद् यथा दिक्षु याति ॥ ४३१ ॥

432) [ सा त्वया स्वहस्तदत्तामद्याप्यहो सुभग गन्धरहितामपि। उद्वासितनगरगृहदेवतेवावमालिकां वहति ॥ ] हे सुभग, सा बाला त्वया स्वहस्तदत्ताम्। 'ओ' इत्यहो, ओमालियं अवमालिकां पुष्पमाला वहति। कदाचिच्छुभगन्धा भवेत्तर्हि वहतु नामेत्याह। गन्धरहितामपि। केव। उद्वासितनगरगृहदेवतेव। त्वद्दत्तां मालिकां त्वत्समर्पितस्थपनिकामिव( ? ) त्वत्संगमैषिणी वहतीत्यर्थः ॥ ४३२ ॥

---

1 G ओमालियं    2 I वृतिवेष्टितविवरान्तर—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



433) तह झीणा तुह विरहे अणुदियहं सुंदरंग तणुयंगी।
जह सिढिलवलयणिवडणभएण उब्भियकरा भमइ ॥ १२ ॥

434) तुह विरहतावियाए तिस्सा बालाइ थणहरुच्छंगे।
दिज्जंती अणुदियहं मुणालमाला छमच्छमइ ॥ १३ ॥

435) सा तुज्झ कए गयमयविलेवणा तह वणेक्कसाहारा।
जाया निद्दय जाया मासाहारा पुलिंदि व्व ॥ १४ ॥

436) हत्थट्ठियं कवालं न मुयइ नूणं खणं पि खट्टंगं।
सा तुह विरहे बालय बाला कावालिणी जाया ॥ १५ ॥

---

433) [ तथा क्षीणा तव विरहेऽनुदिवसं सुन्दराङ्ग तन्वङ्गी । यथा शिथिलवलयनिपतनभयेनोर्ध्वीकृतकरा भ्राम्यति ॥ ] हे सुन्दराङ्ग त्वद्विरहेऽनुदिवसं सा तनुकाङ्गी तथा क्षीणा, यथा शिथिलवलयनिपतनभयेनोर्ध्वीकृतकरा भ्राम्यतीत्यतिशयोक्तिः ॥ ४३३ ॥

434) [ तव विरहतापितायास्तस्या बालायाः स्तनभरोत्संगे। दीयमानानुदिवसं मृणालमाला छमच्छमायते ॥ ] त्वद्विरहतापितायास्तस्याः स्तनभरोत्सङ्गेऽनुदिवसं दीयमाना मृणालमाला छमछमायतेऽग्नौ पतितार्द्रवस्तुवत् ॥ ४३४ ॥

435) [ सा तव कृते गतमदविलेपना ( गजमदविलेपना ) तथा पानीयैकस्वाहारा ( वनैकस्वाधारा ) । जाया निर्दय जाता मासाहारा ( मांसाहारा ) पुलिन्दीव ॥ ] हे निर्दय, सा तव कृते जाया मासाहारा, मासे आहारो यस्याः सा तथा, जाता । केव । पुलिन्दीव शबरजायेव । उभयोः श्लेषः । गयमयविलेवणा, गतमद्यविलेपना, पक्षे गजमद एव विलेपनं यस्याः शबरपुरन्ध्याः । तथा वणेक्कसाहारा, वनं पानीयमेवैकः स्वाहारो[1] यस्याः, पानीयपानशीला न तु भोजनादि । पक्षे वनैकस्वाधारा[2] काननैकरुचिः ॥ ४३५ ॥

436) [ हस्तस्थितं कपालं न मुञ्चति नूनं क्षणमपि खट्वाङ्गम् । सा तव विरहे बालक बाला कापालिनी जाता ॥ ] हे बालक, सा बाला

---

1 G साहारो 2 G वनैकस्वाधारा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



437) तह झीणा जह मउलियलोयणउडविहडणे वि असमत्था।
सक्किहिइ दुक्करं घरगयं पि दट्ठुं तुमं बाला ॥ १६ ॥

438) नाहं दूई न[1] तुमं पिओ त्ति को एत्थ मज्झ वावारो।
सा मरइ तुज्झ अजसो त्ति तेण धम्मक्खरं भणिमो ॥ १७ ॥

439) बहुसो वि कहिज्जंतं तुह वयणं मज्झ हत्थसंदिट्ठं।
न सुयं ति जंपमाणी पुणरुत्तसयं कुणइ अज्झा ॥[2] १८ ॥

---

त्वद्विरहे कापालिनी जाता। तत्साधर्म्यं विशेषणद्वारेण विशिनष्टि। नूनं निश्चितं हस्तस्थितं कपालं न मुञ्चति, अनवरतं ललाटदत्तहस्ता त्वन्मार्गं मार्गयन्ती तिष्ठति। तथा क्षणमपि खट्वाङ्गमङ्गं न मुञ्चति, रात्रावपि खट्वायां न शेते। कापालिका अप्येवंविधा भवन्ति। हस्तस्थितं कपालं मस्तकखण्डं न मुञ्चति भिक्षार्थम्। तथा खट्वाङ्गमायुधविशेषं न मुञ्चति ॥ ४३६ ॥

437) [ तथा क्षीणा यथा मुकुलितलोचनपुटविघटनेऽप्यसमर्था। शक्ष्यति दुष्करं गृहगतमपि द्रष्टुं त्वां बाला ॥ ] तथा बाला क्षीणा यथा मुकुलितलोचनपुटविघटनेऽप्यसमर्था सती त्वां द्रष्टुं गृहगतमपि दुष्करं शक्ष्यति ॥ ४३७ ॥

438) [ नाहं दूती न त्वं प्रिय इति कोऽत्र मम व्यापारः। सा म्रियते तवायश इति तेन धर्माक्षरं भणामः ॥ ] हे नायक, नाहं दूती। तस्यैव[3] प्रवर्तितकोऽत्र( ? )मम व्यापारः। तर्हि किमिति भणसीत्याह। सा म्रियते तवायशउक्तिः। तेन धर्माक्षरं भणामः ॥ ४३८ ॥

439) [बहुशोऽपि कथ्यमानं तव वचनं मम हस्तसंदिष्टम्। न श्रुतमिति जल्पन्ती पुनरुक्तशतं करोति प्रौढयुवतिः ॥] अज्झा प्रौढयुवतिः। देशीपदमिदम्। न श्रुतमिति जल्पमाना मम हस्तसंदिष्टं त्वद्वचनं बहुशोऽपि कथ्यमानं सत श्रुतमिति जल्पन्ती ॥ ४३९ ॥

---

1 G तस्स य पवत्तओ इत्थ मह वावारो। I तस्स य पवत्तिओ इत्थ मह वावारो।

2 G, I अज्जा

3 G तस्यैव प्रवर्तकोऽत्र मम व्यापारः। I तस्यैव प्रवर्तितकोऽत्र (?) मम व्यापारः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ४१. पंथियवज्जा [ पथिकपद्धतिः ]

440) मज्झण्हपत्थियस्स वि गिम्हे पहियस्स हरइ संतावं।
हिययट्ठियजायामुहमयंकजोण्हाजलुप्पीलो[1] ॥ १ ॥

441) मा उण्हं पियसु जलं विरहिणिविरहाणलेण संतत्तं।
एत्थ सरे ए पंथिय गयवइबहुयाउ मज्जविया ॥ २ ॥

442) को देसो उव्वसिओ को वसिओ सुहय जत्थ चलिओ सि।
ओ पहिय पंथदीवय पुणो तुमं कत्थ दीसिहिसि ॥ ३ ॥

443) दिट्ठो सि जेहि पंथिय जेहि न दिट्ठो सि बे वि ते मुसिया।
एक्काण हिययहरणं अन्नाण वि निप्फलं जम्मं ॥ ४ ॥

440) [ मध्याह्नप्रस्थितस्यापि ग्रीष्मे पथिकस्य हरति संतापम्। हृदयस्थितजायामुखमृगाङ्कज्योत्स्नाजलोत्पीडः ॥ ] पथिकस्य ग्रीष्मे मध्याह्ने प्रस्थितस्यापि संतापं हरति। कोऽसौ। हृदयस्थितजायामुखमृगाङ्कज्योत्स्नाजलोत्पीडः। कदाहं जायां द्रक्ष्यामीति जायामेव चिन्तयंस्तन्मुखचन्द्रचन्द्रिकाप्यायितशरीरो ग्रीष्ममध्याह्ने धर्मं मर्माविधमपि न गणयतीत्यर्थः ॥ ४४० ॥

441) [ मोष्णं पिब जलं विरहिणीविरहानलेन संतप्तम्। अत्र सरसि रे पथिक गतपतिवध्वो मज्जिताः ॥ ] रे पथिक, अत्र सरसि बह्व्यो गतपतिवध्वो मज्जिताः। मोष्णं पिब जलं विरहिणीविरहानलसंतप्तम् ॥ ४४१ ॥

442) [ को देश उद्वासितः को वासितः सुभग यत्र चलितोऽसि। हे पथिक पान्थदीपक पुनस्त्वं कुत्र द्रक्ष्यसे ॥ ] ओ इति प्रार्थनायाम्। हे पथिक पान्थदीपक को देश उद्वासितो यं परित्यज्यागतोऽसि। हे सुभग कश्च वासितो यत्र चलितोऽसि, आत्मचरणपद्धत्या यं पवित्रीकरिष्यसि। एवंविधस्त्वं पुनः कुत्र द्रक्ष्यसे। इति काचन परकीया नायिका कंचन पान्थं सस्पृहमाल्पत् ॥ ४४२ ॥

443) [ दृष्टोऽसि यैः पथिक यैर्न दृष्टोऽसि उभयेऽपि ते मुषिताः। एकेषां हृदयहरणमन्येषामपि निष्फलं जन्म ॥ ] हे सुभग यैर्दृष्टोऽसि,

1 G जलप्पूरो, I जल पूलो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



444) खरपवणचाडुचालिरकंठट्ठियदिन्नकप्पडो पहिओ।
दइयादंसणतुरिओ अद्धुड्डीणो व्व पडिहाइ ॥ ५ ॥

445) दइयादंसणतिण्हालुयस्स पहियस्स चिरणियत्तस्स।
नयरासन्ने धुक्कोडिया वि हियए न मायंति ॥ ६ ॥

### ५६. धन्नवज्जा [ धन्यपद्धतिः ]

446) ते धन्ना गरुयणियंबबिंबभारालसाहि तरुणीहिं।
फुरियाहरदरगग्गरगिराहि जे संभरिज्जंति ॥ १ ॥

447) ते धन्ना कढिणुत्तुंगथोरथणवीढभारियंगीहिं।
सब्भावणेहउक्कंठिरीहि जे संभरिज्जंति ॥ २ ॥

---

यैश्च न दृष्टोऽसि, तौ द्वावपि मुषितौ। कुत इत्याह। एवेषां हृदयहरणं यैर्नयनातिथितां नीतस्तेषां मनोलुण्टाकोऽभूः। यैश्च न दृष्टस्तेषामन्येषां त्वादृशं युवरत्नं पुनरपश्यतां जनुर्निष्फलमजनीति ॥ ४४३ ॥

444) [ खरपवनचाटुचलनशीलकण्ठस्थितदत्तकर्पटः पथिकः। दयितादर्शनत्वरितोऽर्धोड्डीन इव प्रतिभाति ॥ ] खरपवनचाटुचालनशीलः कण्ठस्थितो दत्तः कर्पटो येन। अत एव अर्धोड्डीन इव पथिको भाति। किंविशिष्टः। दयितादर्शनत्वरितः। पवनप्रेरितोभयपार्श्वस्थितकर्पटमिषात् पक्षाभ्यामुड्डीन इव लक्ष्यते स्म पान्थ इति ॥ ४४४ ॥

445) [ दयितादर्शनतृष्णालोः पथिकस्य चिरनिवृत्तस्य। नगरासन्ने संशया अपि हृदये न मान्ति ॥ ] पथिकस्य धुक्कोडिया कथं जीवन्तीं मृतां वा प्राणेश्वरीं द्रक्ष्यामीति हृदये धुगधुगितानि संशया न मान्ति; नगरासन्ने। किंविशिष्टस्य। दयितादर्शनतृष्णालोः। पुनश्चिरनिवृत्तस्य बहुकालव्याघुटितस्य ॥ ४४५ ॥

446) [ ते धन्या गुरुनितम्बबिम्बभारालसाभिस्तरुणीभिः। स्फुरिताधरदरगद्गदगीर्भिर्ये संस्मर्यन्ते ॥ ] ते धन्या य एवंविधाभिस्तरुणीभिः संस्मर्यन्ते। कीदृशीभिः। गुरुनितम्बबिम्बभारालसाभिः, स्फुरिताधरगद्गद-गीर्भिः ॥ ४४६ ॥

447) [ ते धन्याः कठिनोत्तुङ्गविस्तीर्णस्तनपीठभारिताङ्गीभिः। सद्भावस्नेहोत्कण्ठनशीलाभिर्ये संस्मर्यन्ते ॥ ] ते धन्या ये संस्मर्यन्ते तरु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



448) ते धन्ना ताण नमो ते च्चिय जीवंति वम्महपसाया।
ईसिवहसंतणीवीउलाहि जे संभरिज्जंति ॥ ३ ॥

449) ते धन्ना समयगइंदलीलल्लीलायरीहि अणवरयं।
छणवासरससहरवयणियाहि जे संभरिज्जंति ॥ ४ ॥

४७. हिययसंवरणवज्जा [ हृदयसंवरणपद्धतिः ]

450) खिज्जउ हिययं फुट्टंतु लोयणा होउ अज्ज मरणं पि।
मयणाणलो वियंभउ मा माणं मुंच रे हियय ॥ १ ॥

णीभिः कठिनोत्तुङ्गविस्तीर्णस्तनपीठभारिताङ्गीभिः। अकृत्रिमप्रेमोत्कण्ठनशीलाभिः ॥ ४४७ ॥

448) [ ते धन्यास्तेभ्यो नमस्त एव जीवन्ति मन्मथप्रसादात्। ईषत्स्रंसमाननीवीव्याकुलाभिर्ये संस्मर्यन्ते ॥ ] ते धन्यास्तेभ्यो नमस्त एव मन्मथप्रसादाज्जीवन्ति ये संस्मर्यन्ते ईषत्स्रंसमाननीवी[1]व्याकुलिताभिर्वनिताभिः। संस्मरणमात्रे नीवीबन्धस्रंसनं कामोद्दीपनविभावनम् ॥ ४४८ ॥

449) [ ते धन्याः समदगजेन्द्रलीलालीलाचरीभिरनवरतम्। क्षणवासरशशधरवदनाभिर्ये संस्मर्यन्ते ॥ ] ते धन्या ये प्रोषिता एवंविधाभिः संस्मर्यन्ते। कीदृशीभिः। समदो मत्तो योऽसौ गजेन्द्रस्तस्य लीला चलनं तद्वत् लीलया चलन्तीभिर्मत्तगजेन्द्रगमनचलनशीलाभिः। तथा पूर्णिमाचन्द्रवदनाभिः। एवंविधाभिरनवरतं ये संस्मर्यन्ते त एव धन्या नान्ये। यतस्ताः सर्वोऽपि स्मरति, न पुनस्ताः स्मरन्ति कंचन। अत एव तेषां धन्यत्वम्। न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४४९ ॥

450) [ क्षीयतां हृदयं स्फुटतां लोचने भवत्वद्य मरणमपि। मदनानलो विजृम्भतां मा मानं मुञ्च रे हृदय ॥ ] काचित् खण्डिता मानमवलम्बमाना विरहावस्थामसहमाना च स्वहृदयं संवृणोति। खिद्यतु ( ? क्षीयताम् ) हृदयं, तेन विना स्फुटतां लोचने, मरणमप्यद्य भवतु मम। मदनानलो विजृम्भतां, तथापि हे हृदय मानं मा त्याक्षीः ॥ ४५० ॥

1 G, I नीव्याउलाभिः ( नीवी + आउलाभिः )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



451) हा हियय झीणसाहस वियाळियमाहप्पचिंत भज्जेसि ।
जत्थ गओ न गणिज्जसि तत्थ तुमं बंधसे नेहं ॥ २ ॥

452) हा हियय किं किलम्मसि दुल्लहजणगरुयसंगमासाए ।
अघडंतजुत्तिकज्जाणुबंधकरणे सुहं कत्तो ॥ ३ ॥

453) अप्पच्छंदपहाविर दुल्लहलाहं जणं विमग्गंतो[1] ।
आयासं व भमंतो मुह व्व केणावि खज्जिहिसि ॥ ४ ॥

454) डज्झसि डज्झसु कड्ढसि कड्ढसु अह फुडसि हियय ता फुडसु ।
जेण पुणो न कयाइ य अन्नासत्ते मई कुणसि ॥ ५ ॥

451) [ हा हृदय क्षीणसाहस विगलितमाहात्म्यचिन्त भज्यसे ।
यत्र गतं न गण्यसे तत्र त्वं बध्नासि स्नेहम् ॥ ] हा हृदय क्षीणसाहस विगलितमाहात्म्यचिन्त भङ्क्ष्यसि । यत्र गतः ( ? गतं ) त्वं न गण्यसे तत्र त्वं बध्नासि प्रेम । काचित् कंचन वाञ्छन्ती तेनाप्यगणिता हृदयं प्रतीदमाहेति ॥ ४५१ ॥

452) [ हा हृदय किं क्लाम्यसि दुर्लभजनगुरुसंगमाशया । अघटमानयुक्तिकार्यानुबन्धकरणे सुखं कुतः ॥ ] हा खेदे हृदय किं क्लाम्यसि, दुर्लभजनगुरुसङ्गमाशया । अघटमानयुक्तिकार्यानुबन्धकरणे सुखं कुतः ॥४५२॥

453) [ आत्मच्छन्दप्रधावनशील दुर्लभलाभं जनं विमार्गयत् ।
आकाशमिव भ्रमन्मुधैव केनापि खादिष्यसे ॥ ] हे हृदय, अप्पच्छंदपहाविर, स्वतंत्रप्रधावनशील दुर्लभलाभं जनं विमार्गयन् मुधैवाकाशं शून्यं भ्रमत् केनापि खादिष्यसे । मुधैव केनापि परिभ्रमन् ज्ञास्यसे ॥ ४५३ ॥

454) [ दह्यसे दह्यस्व, क्वथ्यसे क्वथ्यस्व, अथ स्फुटसि हृदय तत्स्फुट । येन पुनर्न कदापि चान्यासक्ते मतिं करोषि ॥ ] हे हृदय दह्यसे दह्यस्व, क्वथ्यसे, क्वथ्यस्व अथ स्फुटसि तदा स्फुट । कुतः कारणात् । येन पुनर्न कदाप्यन्यासक्ते मतिं करिष्यसि । अन्यासक्तं जनं कामयमानस्य भवत एवं भवतु वरम् ॥ ४५४ ॥

1 I विमग्गंत ( Vocative )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ४८. सुघरिणीवज्जा [ सुगृहिणीपद्धतिः ]

455) भुंजइ भुंजियसेसं सुप्पइ सुत्तम्मि¹ परियणे सयले ।
पढमं चेय विबुज्झइ घरस्स लच्छी न सा घरिणी ॥ १ ॥

456) तुच्छं तवणिं पि घरे घरिणी तह कह वि नेइ वित्थारं ।
जह ते वि बंधवा जलणिहि व्व थाहं न याणंति ॥ २ ॥

457) दुग्गयघरम्मि घरिणी रक्खंती आउलत्तणं पइणो ।
पुच्छियदोहलसद्धा उययं चिय दोहलं कहइ ॥ ३ ॥

458) पत्ते पियपाहुणए मंगलवलयाइ विक्किणंतीए ।
दुग्गयघरिणीकुलवालियाइ रोवाविओ गामो ॥ ४ ॥

455) [ भुङ्क्ते भुक्तशेषं स्वपिति सुप्ते परिजने सकले । प्रथममेव विबुध्यते गृहस्य लक्ष्मीर्न सा गृहिणी ॥ ] भुङ्क्ते भुक्तशेषं भुक्तावशेषं, परिजने सकले सुप्ते स्वपिति, प्रथममेव सर्वेषु² जागरितेषु प्रातरुत्तिष्ठति । एवंविधा या गृहिणी भवति सा लक्ष्मीर्गृहस्य न तु गृहिणीति ॥ ४५५ ॥

456) [ तुच्छं भक्ष्यकणमपि गृहे गृहिणी तथा कथमपि नयति विस्तारम् । यथा तेऽपि बान्धवा जलनिधेरिव तलं न जानन्ति ॥ ] गृहिणी तवणिं व्ययं तुच्छमपि तथा विस्तारं नयति, यथा तेऽपि बान्धवाः सहोदराः स्ताघं न प्राप्नुवन्ति । क इव । समुद्र इव । यथागताः पान्थास्तस्य स्ताघं न प्राप्नुवन्ति ॥ ४५६ ॥

457) [दुर्गतगृहे गृहिणी रक्षन्त्याकुलत्वं पत्युः। पृष्टदोहदश्रद्धोदकमेव दोहदं कथयति ॥ ] दुर्गतगृहे गृहिणी दरिद्रकुटुम्बिनी पृष्टदोहदश्रद्धा, उदकमेव दोहदं निवेदयति । किं कुर्वती । पत्युराकुलत्वं रक्षन्ती । कव । गृहे । पत्या तुभ्यं किं रोचत इत्यन्तर्वत्नी पृष्टा । दरिद्रशिरोमणिरयमिति उदकमेव मह्यं रोचत इति निवेदितवती । अनेन तस्या सुगृहिणीत्वं व्यज्यते ॥ ४५७ ॥

458) [ प्राप्ते प्रियप्राघूर्णके मङ्गलवलयानि विक्रीणत्या । दुर्गतगृहिणीकुलबालिकया रोदितो ग्रामः ॥ ] दुर्गतगृहिणी च सा कुलबालिका

---

1 G, I: सुप्पम्मि 2 I सर्वेष्वजागरितेषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



459) बंधवमरणे वि हहा दुग्गयघरिणीइ वि न तहा रुण्णं।
अप्पत्तबलिविलक्खे वल्लहकाए समुड्डीणे ॥ ५ ॥

460) अमुणियपियमरणाए वायसमुड्डाविरीइ घरिणीए।
रोवाविज्जइ गामो अणुदियहं बद्धवेणीए ॥ ६ ॥

461) डिंभाण भुत्तसेसं छुहाकिलंता वि देइ दुहियाणं।
कुलगोरवेण वरईउ रोरघरिणीउ झिज्जंति ॥ ७ ॥

च दुर्गतगृहिणीकुलबालिका तया ग्रामो रोदते स्म। किं कुर्वत्या। मङ्गल-वलयान्यविधवात्वसूचकानि वलयानि विक्रीणानया। क सति। प्रियश्चासौ प्राघूर्णकश्च प्रियप्राघूर्णकस्तस्मिन् प्राप्ते आगते। प्राघूर्णकमागतं वीक्ष्य मङ्गलवलयान्यपि विक्रीणानां दरिद्रकुटुम्बिनीमवलोक्य धिगिदं दारिद्र्यमस्या वराक्या इति सकलग्रामो रोदितीत्यर्थः ॥ ४५८ ॥

459) [ बान्धवमरणेऽपि हहा दुर्गतगृहिण्यापि न तथा रुदितम्। अप्राप्तबलिविलक्षे वल्लभकाके समुड्डीने ॥ ] दुर्गतगृहिण्या बान्धवमरणेऽपि नैव तथा रुदितम्। हहेति खेदे। यथाप्राप्तबलिविलक्षे वल्लभकाके समुड्डीने। अयं भावः। वल्लभागमनार्थं पृष्टः काकः किल स्वचेष्टाविशेषेण तदागमनं कुशलम्[1] अचकथत्। तत्पूजार्थं बल्यर्थं तत्किमपि नास्ति येन बलिं संपाद्य तस्मै निवेदयति। पश्चात्तस्मिन्नुड्डीने अहो अहं दुर्भगशिरोमणिर्यदस्मै प्रियशकुनसूचकाय कवलमपि न न्यवेदयमिति तारस्वरं रुरोद ॥ ४५९ ॥

460) [अज्ञातप्रियमरणया वायसमुड्डायिन्या गृहिण्या। रोदते ग्रामोऽनुदिवसं बद्धवेण्या ॥] गृहिण्यानुदिवसं ग्रामो रोदते। किं कुर्वत्या तया। वायसं काकम् उड्डायनशीलया। विशेषणद्वारा रोदनकारणमाह। किंविशिष्टया गृहिण्या। अज्ञातप्रियमरणया। अयमर्थः। अहो पत्युर्मरणवार्तामजानानाया अस्या वराक्या "भोः काक, उड्डयस्व मम भर्तागमिष्यति" इति दशां पश्यन्तो ग्रामस्था लोका रुरुदुः। वायसमागतं वीक्ष्य प्रोषितपतिभार्यादयः स्त्रिय एवं कुर्वन्तीति तासां स्वभावः ॥ ४६० ॥

461) [ डिम्भानां भुक्तशेषं क्षुधाक्रान्तापि ददाति दुःखितेभ्यः। कुलगौरवेण वराक्यो दरिद्रगृहिण्यः क्षीयन्ते ॥ ] दुर्गतगृहिणी डिम्भानां

1 I शकुनम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



462) अहियाइमाणिणो दुग्गयस्स छाहिं पइस्स रक्खंती ।
नियबंधवाण जूरइ घरिणी विहवेण पत्ताणं ॥ ८ ॥

## ४९. सईवज्जा [ सतीपद्धतिः ]

463) उब्भेउ अंगुलि सा विलया जा मह पइं न कामेइ ।
सो को वि जंपउ जुवा जस्स मए पेसिया दिट्ठी ॥ १ ॥

464) चच्चरघरिणी पियदंसणा वि तरुणी पउत्थवइया वि ।
असईसइज्झिया[1] दुग्गया वि न हु खंडियं सीलं ॥ २ ॥

भुक्तशेषं क्षुधाक्रान्तापि दुःखितेभ्यो ददाति यतः, वराक्यो रोरगृहिण्यः क्षीयन्ते ॥ ४६१ ॥

462) [ अभिजातिमानिनो दुर्गतस्य छायां पत्यू रक्षन्ती । निजबान्धवेभ्यः कुप्यति गृहिणी विभवेन प्राप्तेभ्यः ॥ ] गृहिणी निजबान्धवेभ्यः ईर्ष्यति । किंविशिष्टेभ्यः । विभवेन गृहं प्राप्तेभ्यः । किं कुर्वती । पत्युश्छायां पतिशोभां रक्षन्ती । किंविशिष्टस्य पत्युः । आभिजात्यमानिनः[2] । दुर्गतस्य मम पत्युर्दारिद्र्येण भोजनादिपूजामकुर्वतो मानहानिस्तेषु बान्धवेष्वागतेषु मा भूदिति तानपि द्वेष्टि इति सत्कलत्रत्वम् ॥ ४६२ ॥

463) [ ऊर्ध्वीकरोत्वङ्गुलिं सा वनिता या मम पतिं न कामयते । स कोऽपि कथयतु युवा यस्य मया प्रेषिता दृष्टिः ॥ ] विलया वनिता साङ्गुलिमूर्ध्वीकरोतु, या मम पतिं न कामयते । स कोऽपि कथयतु युवा यस्य मया प्रेषिता दृष्टिः । अस्मिन्नगरेऽमूः सर्वा अपि कामिन्यो मत्कमितारं कामयन्ते । अहं तु न कमपीति अर्थो यदि मृषा तदा वदतु कोऽपीत्यर्थः । "वनिताया विलया" इति प्राकृतसूत्रेण ( हेमचन्द्र ८.२.१२८ ) निपातः ॥ ४६३ ॥

464) [ चत्वरगृहिणी प्रियदर्शनापि तरुणी प्रोषितपतिकापि । असतीप्रातिवेश्मिका दुर्गतापि न खलु खण्डितं शीलम् ॥ ] चत्वरगृहिण्यपि चतुष्पथगृहस्थितापि । तया न खलु खण्डितं शीलम् । कदाचिद्रूपवती न भवेत्तदा को नाम कामयते ताम् । अतः प्रियदर्शनापि । यद्यपि तादृश्यपि कदाचिदनवतीर्णतारुण्या भवेत् । तरुणी । तरुण्यपि कदाचिन्निकटवर्ति-

1 G असईसइज्जिया 2 G जात्यभिमानिनः, I आभिजात्याभिमानिनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



465) असरिसचित्ते दियरे सुद्धमणा पिययमे विसमसीले।
न कहइ कुडुंबविहडणभएण तणुयायए मुद्धा ॥ ३ ॥

466) घरवावारे घरिणी वेसा सुरयम्मि कुलवहू सुयणे।
परिणइमज्झम्मि सही विहुरे मंति व्व भिच्चो व्व ॥ ४ ॥

467) कुलवालियाइ पेच्छह जोव्वणलावण्णविब्भमविलासा।
सव्वे वि अप्पचलिया पियम्मि कयणिच्छए गंतुं ॥ ५ ॥

468) पुरिसविसेसेण सइत्तणाइ न कुलक्कमेण महिलाणं।
सग्गं गए वि हाले न मुयइ गोला पइट्ठाणं ॥ ६ ॥

भर्तृका भवेत् । प्रोषितपतिकापि । सतीप्रातिवेश्मिका भवेत्तदा शीलं न खण्डयति । असतीप्रातिवेश्मिका । कदाचिदीश्वरगृहिणी भवेत् । द्रव्यार्थं विरुद्धमप्याचर्यते । दुर्गतापि । एतेषु शीलखण्डनहेतुषु सत्स्वपि न खण्डितं शीलं, सतीत्वात् ॥ ४६४ ॥

465) [ असदृशचित्ते देवरे शुद्धमनाः प्रियतमे विषमशीले । न कथयति कुटुम्बविघटनभयेन तनूभवति मुग्धा ॥ ] काचिन्मुग्धा सतीमतल्लिका न कथयति पत्युः पुरतो मनोगतम् । क्व सति । असदृशचित्ते देवरे, प्रिये च विषमशीले । सा च शुद्धमनाः कुटुम्बविघटनभयेन । अयमर्थः । काचिदात्मीयदेवरमशुद्धमनसं तामेव च रिरंसुमवलोक्य पत्युः पुरस्तात्तद्दुश्चेष्टितम् , " अनयोर्भ्रात्रोर्विघटनं मा भूयाद् " इति न कथयति । केवलं तच्चिन्ताचान्तचेतास्तनूभवतीत्यर्थः ॥ ४६५ ॥

466) [ गृहव्यापारे गृहिणी वेश्या सुरते कुलवधूः सुजने । परिणतिमध्ये सखी विधुरे मन्त्रीव भृत्य इव ॥ ] गृहव्यापारे गृहिणी । वेश्यातुल्या सुरते । कुलवधूः सुजने । परिणतिमध्ये वृद्धावस्थायां सखी । विधुरे मन्त्रीव भृत्य इव ॥ ४६६ ॥

467) [ कुलपालिकाया प्रेक्षध्वं यौवनलावण्यविभ्रमविलासाः । सर्वेऽप्यप्रचलिताः प्रिये कृतनिश्चये गन्तुम् ॥ ] कुलबालिकाया विभ्रमलावण्ययौवनविलासाः सर्वेऽप्यप्रचलिताः प्रिये गन्तुं कृतनिश्चये ॥ ४६७ ॥

468) [ पुरुषविशेषेण सतीत्वादि न कुलक्रमेण महिलानाम् । स्वर्गं गतेऽपि हाले न मुञ्चति गोदा प्रतिष्ठानम् ॥ ] पुरुषविशेषेण सतीत्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



469) इहपरलोयविरुद्धेण कण्णकडुएण गरहणिज्जेण।
उभयकुलदूसणिज्जेण दूइ किं तेण भणिएण ॥ ७ ॥

470) जइ सो गुणाणुराई गुणन्नुओ मह गुणे पसंसेइ।
पढमं च्चिय जइ असई गुणगणणा का तह चेय ॥ ८ ॥

471) जइ उत्तमो[1] वि भण्णइ मह पुरओ सो वि सुयणु अणुदियहं।
मामि न उत्तम[1]पुरिसा परस्स दाराइ पेच्छंति ॥ ९ ॥

---

न कुलक्रमेण महिलानाम्। स्वर्गं गतेऽपि हाले सातवाहने गोला गोदावरी पइट्ठाणं (प्रतिष्ठानं) नाम नगरं न मुञ्चति। यथा पुरुषश्चेच्छीलवान् स्त्र्यपि शीलवती। यदि सातवाहनस्य कोऽपि गुणोऽभूत् तदा तस्मिन्स्वर्गं गतेऽपि प्रतिष्ठानं नगरम् अद्यापि न त्यजति (गोदावरी) यथा काचित्सती भर्तरि मृतेऽपि पतिस्थानं न मुञ्चति॥ ४६८ ॥

469) [ इहपरलोकविरुद्धेन कर्णकटुकेन गर्हणीयेन। उभयकुलदूषणीयेन दूति किं तेन भणितेन ॥ ] हे दूति किं तेन भणितेन। किंविशिष्टेन। इहपरलोकविरुद्धेन, कर्णकटुकेन गर्हणीयेन, उभयकुलदूषणीयेन। अयमर्थः। काचन दूती केनचित् पुंश्चलेन प्रेरिता सतीमतल्लिकामागत्यामुकं भजस्वेत्युक्तवती। तां चैवं ब्रुवाणां सती प्रत्युत्तरयति ॥ ४६९ ॥

470) [ यदि स गुणानुरागी गुणज्ञो मम गुणान् प्रशंसति। प्रथममेव यद्यसती गुणगणना का तथा चैव ॥ ] यदि स गुणानुरागी गुणज्ञो मम गुणान् बहु मन्यते, अहं चासती भवेयं यदि, तदा मम क इमे गुणाः ॥ ४७० ॥

471) [ यद्युत्तमोऽपि भण्यते मम पुरतः सोऽपि सुतन्वनुदिवसम्। मामि नोत्तमपुरुषाः परस्य दारान् प्रेक्षन्ते ॥ ] काचन सती, "असावुत्तमस्त्वद्गुणान् बहु मन्यते" इति ब्रुवाणां दूतीं प्रत्युत्तरयति। यदि त्वया अनुदिवसं मम पुरतो हे सुतनु "उत्तमः सः" इति भण्यते, तदा हे मामि हे सखि ये उत्तमपुरुषास्ते परदारान् न पश्यन्ति ॥ ४७१ ॥

---

1 I उत्तिम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ५०. असईवज्जा [ असतीपद्धतिः ]

472) निअडकुडंगं[1] पच्छन्नदेउलं बहुजुवाणसंकिण्णं ।
थेरो पइ त्ति मा रुवसु पुत्ति दिन्ना सि सुग्गामे ॥ १ ॥

473) मा रुवसु ओणयमुही धवलायंतेसु सालिछेत्तेसु ।
हरियालमंडियमुहा नड व्व सणवाडया जाया ॥ २ ॥

474) पुव्वेण सणं पच्छेण वंजुला दाहिणेण वडविडवो ।
पुत्तिइ पुण्णेहि विणा न लब्भइ एरिसो गामो ॥ ३ ॥

472) [ निकटनिकुञ्जं प्रच्छन्नदेवकुलं बहुयुवसंकीर्णम् । स्थविरः पतिरिति मा रुदिहि पुत्रि दत्तासि सुग्रामे ॥ ] हे पुत्रि मा रोदीः । कथमिति । मम पतिः स्थविरः । यदि स्थविरस्तथापि मा रोदीः । किमिति । दत्तासि शोभनग्रामे । कथम् । निकटकुडंगं निकटगहनप्रदेशः । लताभिश्छन्नप्रदेशः कुडंग इत्यभिधीयते । प्रच्छन्नदेवकुलम् । बहुयुवसंकीर्णम् । कोऽर्थः । एतेषु सत्सु तव का नाम चिन्ता । केनापि मनोऽभीष्टेन यूना सह रतं कुर्वीथा इति ॥ ४७२ ॥

473) [ मा रुदिह्यवनतमुखी धवलीभवत्सु शालिक्षेत्रेषु । हरितालमण्डितमुखा नटा इव शणवाटका जाताः ॥ ] हे पुत्रि धवलीभवत्सु शालिक्षेत्रेषु नतमुखी मा रोदीः । कुतः । शणवाटका हरितालमण्डितमुखा नटा इव संजाताः । अयं भावः । काचन स्वैरिणी पक्वेषु शालिक्षेत्रेषु मम सुरतस्थानं क्षेत्रं लविष्यते । एतत्पश्चात् सुरतस्थानं क्व भावीति रुदत्यन्यया सख्यागत्य " किमिति रोदिषि, तव सुरतस्थानान्तरमेते शणवाटाः पुरुषद्वयसा संजाताः सन्ति " इति मा रोदनं कार्षीरिति न्यवारि[2] ॥ ४७३ ॥

474) [ पूर्वेण शणः पश्चाद् वञ्जुला दक्षिणेन वटविटपः । पुत्रिके पुण्यैर्विना न लभ्यत ईदृशो ग्रामः ॥ ] हे पुत्रि, ईदृशो ग्रामो न लभ्यते पुण्यैर्विना । पूर्वेण पूर्वस्यां ( दिशि ) शणः शणवाटः । पश्चेण पाश्चात्यभागेन वंजुला वेतसवृक्षाः । दक्षिणेन भागेन ग्रामस्य वटविटपः ॥ ४७४ ॥

1 I °कुडंगं 2 I adds : अन्यद् व्याख्यानान्तरम् ईदृशीनां गाथानां श्रीत्रिभुवनपालविहितः छेकोक्तिविचारलीलया ज्ञेयम् । यतोऽहं लेखक एव ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



475) पेच्छह महाणुभावं काणाघरिणीइ जं कयं कज्जं।
चुंबेवि[1] न लहु नयणं झडत्ति[2] नीसारिओ जारो ॥ ४ ॥

476) पउरजुवाणो गामो महुमासो जोव्वणं पई थेरो।
जुण्णसुरा साहीणा असई मा होउ किं मरउ ॥ ५ ॥

477) देवाण बंभणाण य पुत्ति पसाएण एत्तियं कालं।
न हु जाओ अम्ह घरे कइया वि सईत्तणकलंको ॥ ६ ॥

475) [ प्रेक्षध्वं महाश्चर्यं काणगृहिण्या यत् कृतं कार्यम्। चुम्बित्वा न लघु नयनं झटिति निःसारितो जारः ॥ ] प्रेक्षध्वं महदाश्चर्यं काणगृहिण्या यत् कृतं कार्यम्। चुम्बित्वा काणस्याक्ष्येकं लघु निःसारितो जारः। काचिदसती अन्येन सह सुरतसौख्यमनुभवन्ती यावत्तिष्ठति तावदक्ष्णा काणस्तत्पतिः समाजग्मिवान्। तत उक्त्वा[3] "अयं मम प्रियतमः समागतोऽहं धन्या" इति तस्य द्वितीयमक्षि सरभसं चुम्बति स्म। तावज्जारो निःससारेति भावः ॥ ४७५ ॥

476) [ प्रचुरयुवको ग्रामो मधुमासो यौवनं पतिः स्थविरः। जीर्णसुरा स्वाधीनासती मा भवतु किं म्रियताम् ॥ ] असती मा भवतु, किं म्रियताम्। यतो यत्र(सा)वसति स ग्रामः प्रचुरतरुणः। ग्रामो भवतु, यदि तरुणा न भवन्ति, न असती। प्रचुरतरुणः। प्रचुरतरुणोऽपि भवतु, यदि मधुमासो न स्यात्। सोऽपि भवतु, यदि न तारुण्यम्। तदप्यास्तां, यदि न पतिः स्थविरः। पतिरपि वर्षीयान् भवतात्, यदि जीर्णसुरा स्वाधीना न भवति, पुराणं मद्यमात्मवशे यदि न स्यात्। एवंभूतेषु कामोद्दीपकेषु बहुषु प्रकारेषु यद्यसती न भवेत्तदा मरणं शरणं मन्येत[4] ॥ ॥ ४७६ ॥

477) [ देवानां ब्राह्मणानां च पुत्रि प्रसादेनैतावन्तं कालम्। न खलु जातोऽस्माकं गृहे कदाचिदपि सतीत्वकलङ्कः ॥ ] हे पुत्रि, अस्मद्गृहे देवानां ब्राह्मणानां च प्रसादेन एतावत्कालं न खलु जातः सतीत्वकलङ्कः, इयं सतीति कलङ्कः ॥ ४७७ ॥

1 I चुंबेविणु, 2 I झडिति, 3 I तत उत्थाय
4 I मरणं शरणं नान्यत्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



478) सट्ठीइ होइ सुहवा सएण रंभत्तणं च पावेइ ।
पुण्णे जारसहस्से इंदो अद्धासणं देइ ॥ ७ ॥

479) जइ फुडु एत्थ मुयाणं जम्मफलं होइ किं पि अम्हाणं ।
ता तेसु कुडंगेसु ह' तेण समं तह नु कीलेज्जा ॥ ८ ॥

480) जो जं करेइ पावइ सो तं सोऊण निग्गया असई ।
रमियव्वं तेण समं तत्थ जहच्छाइ ता एण्हि ॥ ९ ॥

481) असईहि सई भणिया निहुयं होऊण कण्णमूलम्मि ।
नरयं वच्चसि पावे परपुरिसरसं अयाणंती ॥ १० ॥

478) [ षष्ट्या भवति सुभगा शतेन रम्भात्वं च प्राप्नोति । पूर्णे जारसहस्रे इन्द्रोऽर्धासनं ददाति ॥ ] षष्ट्या जारैः सुभगा भवति, शतेन जारै रम्भात्वं प्राप्नोति, पूर्णे जारसहस्रे इन्द्रोऽर्धासनं ददाति । पुंश्चलीत्व-धर्मातिशयादिति ॥ ४७८ ॥

479) [ यदि स्फुटमत्र मृतानां जन्मफलं भवति किमप्यस्माकम् । तत्तेषु निकुञ्जेषु हा तेन समं तथा खलु क्रीडेयम् ॥ ] यदि स्फुटमत्र मृता-नामस्माकं किमपि जन्मफलं भवति, ततस्तेष्वेव गह्वरप्रदेशेषु 'नु' इत्यहो, तथा इहजन्मवत् ( तेन समं ) क्रीडेयम् ॥ ४७९ ॥

480) [ यो यत्करोति प्राप्नोति स तच्छ्रुत्वा निर्गतासती । रन्तव्यं तेन समं तत्र यदृच्छया तद् इदानीम् ॥ ] यो यत्करोति प्राप्नोति स तद् इति श्रुत्वा निर्गतासती, रन्तव्यं तेन समं मया तत्र यदृच्छया, तत इदानीमपि रम्यते ॥ ४८० ॥

481) [ असतीभिः सती भणिता निभृतं भूत्वा कर्णमूले । नरकं व्रजसि पापे परपुरुषरसमजानाना ॥ ] असतीभिः सती भणिता निभृतं, भूत्वा कर्णमूले, कर्णे लगित्वेत्यर्थः । किम् उक्ता । नरकं व्रजसि पापे परपुरुषरसमजानाना ॥ ४८१ ॥

1 I ह

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



482) जत्थ न खुज्जयविडवो न नई न वणं न उज्जडो गेहो ।
तत्थ भण कह वसिज्जइ सुविसत्थविवज्जिए गामे ॥ ११ ॥

483) रे रे विडप्प मा मुयसु दुज्जणं गिलसु पुण्णिमायंदं ।
अमयमयं भुंजंतो हयास दीहाउओ होसि ॥ १२ ॥

484) छिन्नं पुणो वि छिज्जउ महुमहचक्केण राहुणो सीसं ।
गिलिओ जेण विमुक्को असईणं दूसओ चंदो ॥ १३ ॥

485) तं किं पि कह वि होहिइ लब्भइ पुहविं वि हिंडमाणेहिं ।
जेणोसहेण चंदो जीरिज्जइ पुण्णिमासहिओ ॥ १४ ॥

---

482) यत्र न कुब्जकविटपो न नदी न वनं न निर्जनं गेहं । तत्र भण कथमुष्यते सुविश्वस्तविवर्जिते ग्रामे ॥ ] यत्र न कुब्जकवृक्षो, न नदी, न वनं, नोद्वसं गृहं, तत्र कथय कथमुष्यते सुसार्थवर्जिते ग्रामे पुंश्चलरहित इत्यर्थः ॥ ४८२ ॥

483) [ रे रे राहो मा मुञ्च दुर्जनं गिल पूर्णिमाचन्द्रम् । अमृतमयं भुञ्जानो हताश दीर्घायुर्भविष्यसि ॥ ] रे रे राहो मा मुञ्च दुर्जनममुं पूर्णिमाचन्द्रम् । गिल । केवलं न मम कार्यमेतत्, तथापि लाभो भविता । कथम् । अमृतमयममुं भुञ्जानो हताश दीर्घायुर्भविष्यसि । अतो गिलेति ॥ ॥ ४८३ ॥

484) [ छिन्नं पुनरपि छिद्यतां मधुमथनचक्रेण राहोः शिरः । गिलितो येन विमुक्तोऽसतीनां दूषकश्चन्द्रः ॥ ] राहोः शिरश्छिन्नमपि पुनश्छिद्यताम् । केन । मधुमथनचक्रेण सुदर्शनेन । येन राहुणा गिलितोऽपि विमुक्तोऽसतीनां दूषकश्चन्द्रः ॥ ४८४ ॥

485) [ तत्किमपि कथमपि भविष्यति लभ्यते पृथ्वीमपि हिण्डमानैः । येनौषधेन चन्द्रो जीर्यते पूर्णिमासहितः ॥ ] तत् किमपि कथमपि भविष्यति लभ्यते पृथिवीं हिण्डमानैर्येनौषधेन पूर्णिमासहितश्चन्द्रो जीर्यते ॥ ॥ ४८५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



486) किं विहिणा सुरलोए एक्का वि न पुंसलि त्ति निम्मविया ।
साहीणो जेण ससी न बोलिओ नीलरंगम्मि ॥ १५ ॥

487) पसरइ जेण तमोहो फिट्टइ चंदस्स चंदिमा जेण ।
तं सिद्ध सुमरि सिरिपव्वयाउ आणेसहं किं पि ॥ १६ ॥

488) मा पत्तियं पि दिज्जसु पुंसलि सिविणे वि कामडहणस्स ।
जो अम्हाण अमित्तं चंदं सीसे समुव्वहइ ॥ १७ ॥

489) असईणं विप्पिय रे गव्वं मा वहसु पुण्णिमायंद ।
दीसिहिसि तुमं कइया जह भग्गो वलयखंडो व्व ॥ १८ ॥

---

486) [ किं विधिना सुरलोक एकापि न पुंश्चलीति निर्मापिता ।
स्वाधीनो येन शशी न निमज्जितो नीलरङ्गे ॥ ] किं विधात्रा सुरलोक एकापि पुंश्चली न कृता यया ( शशी ) स्वाधीन आत्मायत्तो नैकव्यवशान्न मज्जितो नीलरंगे नीलीरागे[1] ॥ ४८६ ॥

487) [ प्रसरति येन तमओघो भ्रश्यति चन्द्रस्य चन्द्रिका येन । तत्सिद्ध स्मृत्वा श्रीपर्वतादानयौषधं किमपि ॥ ] प्रसरति येन तमओघोऽन्धकारनिकुरम्बो, याति च चन्द्रस्य चन्द्रिका येन, तदौषधं श्रीपर्वतात् स्मृत्वानय किमपि हे सिद्ध । श्रीपर्वतः[2] सर्वेषामौषधानां स्थानं, तत्र सिद्धा एव व्रजन्ति ॥ ४८७ ॥

488) [ मा पत्रिकामपि दद्याः पुंश्चलि स्वप्नेऽपि कामदहनस्य । योऽस्माकममित्रं चन्द्रं शीर्षे समुद्वहति ॥ ] हे पुंश्चलि, स्वप्नेऽपि कामदहनस्येश्वरस्य पत्रिकामपि मा दद्याः । ईश्वरः पत्रिकया न पूजनीयो द्विपत्रः । योऽयमीश्वरोऽस्माकममित्रं चन्द्रं शिरस्युद्वहति ॥ ४८८ ॥

489) [ असतीनां विप्रिय रे गर्वं मा वह पूर्णिमाचन्द्र । द्रक्ष्यसे त्वं कदापि यथा भग्नो वलयखण्ड इव ॥ ] रे असतीनां विप्रिय चन्द्र गर्वं मा वहस्व । कदापि त्वं द्रक्ष्यसे । कथम् । यथा भग्नो वलयखण्ड इव ॥४८९॥

1 I adds : एतेन सर्वाभिः पुंश्चलीभिः स्वात्मानो मलिनीकृताः सन्तीति भावः ।
2 I श्रीपर्वतो हिमवत्पर्वतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



490) अव्वो धावसु तुरियं कज्जल भरिऊण वे वि हत्थाइं।
दिट्ठो कूवावडिओ असईणं दूसओ[1] चंदो ॥ १९ ॥

491) मह एन्ति कीस पंथिय जइ हरसि नियंसणं नियंबाओ।
साहेमि कस्स पुरओ गामो दूरे अहं एक्का ॥ २० ॥

492) अत्ता बहिरंधलिया[2] बहुविहवीवाहसंकुलो गामो।
मज्झ पई य विएसे को तुज्झ वसेरयं देइ ॥ २१ ॥

490) [ अहो धाव त्वरितं कज्जलेन भृत्वा द्वावपि हस्तौ। दृष्टः कूपपतितोऽसतीनां दूषकश्चन्द्रः ॥ ] अहो त्वरितं धाव कज्जलेन भृत्वा द्वावपि हस्तौ। अयं चन्द्रः कूपपतितो दृष्टः। किंविशिष्टः। असतीनां दूषकः। चन्द्रमसः प्रतिमां कूपान्तःस्थामवलोक्य तदुपरि विरुद्धमनाः काचन स्वैरिणी "कज्जलेनामुं मलिनीकुरु येन ज्योत्स्नाजालं न विकिरति" इति सखीमुवाचेत्यर्थः ॥ ४९० ॥

491) [ मामेषि कस्मात्पथिक यदि हरसि निवसनं नितम्बात्। कथयामि कस्य पुरतो ग्रामो दूरेऽहमेका ॥ ] हे पथिक किमिति मामेषि मामागच्छसि। यदि नितम्बान्निवसनं हरसि, आच्छिनत्सि, तदा कस्य पुरतः कथयामि। यतो ग्रामो दूरेऽहमेका। अयमर्थः। मां प्रत्यागच्छन्किमिति बिभेषि। नितम्बाद्वस्त्रमपि यदि गृह्णासि तदा कस्याग्रतः कथयाम्यहम्। आगमनं तावद् दूरे तिष्ठतु, नीवीबन्धमुन्मोच्य तथा रमस्व यथा मनोऽभीष्टम्। दवीयसो ग्रामादिदानीं कोऽपि नागमिष्यतीति स्वयमेव याचनं पुंश्चल्या ॥ ४९१ ॥

492) [ श्वश्रूर्बधिरान्धा बहुविधविवाहसंकुलो ग्रामः। मम पतिश्च विदेशे कस्तव वासं ददाति ॥ ] हे पथिक तव को नाम वासं ददाति। यतः श्वश्रूर्बधिरान्धा, ग्रामश्च बहुविवाहसंकुलो, मम पतिश्च विदेशे, अतः को नाम उत्तरं ददाति। अयं भावः। श्वश्रूस्तावन्न पश्यति, न शृणोति। ग्रामलोकश्च गृहे गृहे विवाहव्यग्रः, मम पतिश्चात्र नास्ति। तस्मात्सर्वतोऽपि भीतिं परित्यज्य सकलां रात्रिं रमस्वेति भङ्ग्योक्तवती काचन कुलटा ॥ ४९२ ॥

1 G, I दूसओ 2 I बहिरंधलया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



493) जणसंकुलं न सुन्नं रूसइ अत्ता न देइ ओआसं।
ता वच्च पहिय मा मग्ग वासयं एत्थ मज्झ घरे ॥ २२ ॥

494) कह लब्भइ सत्थरयं अम्हाणं पहिय पामरघरम्मि।
उन्नयपओहरे पेच्छिऊण जइ वससि ता वससु ॥ २३ ॥

495) वस पहिय अंगण च्चिय फिट्टउ ता तुज्झ वसणदोहलओ।
इह गामे हेमंतो नवरं गिम्हस्स सारिच्छो ॥ २४ ॥

493) [ जनसंकुलं न शून्यं रुष्यति श्वश्रूर्न ददात्यवकाशम्। तद्व्रज पथिक मा मार्गय वासकमत्र मम गृहे ॥ ] हे पथिक, एतत्स्थानं जनसंकुलं, न शून्यम्। तव वासेऽनवकाशः। अत एव अत्ता श्वश्रू रुष्यति, न ददात्यवकाशं तव स्वप्तुम्। ततो व्रज, मा मार्गय वासकमत्र मम गृहे। इति प्राकृतोऽर्थः। भावार्थस्त्वयम्। हे पथिक, एतत्स्थानं जनसंकुलं न वर्ततेऽत एव शून्यमेतत्। अत्ता ( श्वश्रूः ) न रुष्यति, ददाति स्वप्तुमवकाशम्। तदा मा व्रज, किंतु वासं यावत्स्वात्र मम गृहे ॥ ४९३ ॥

494) [ कथं लभ्यते स्रस्तरकं ( स्वस्थरतं ) अस्माकं पथिक पामरगृहे। उन्नतपयोधरान् ( उन्नतपयोधरौ ) प्रेक्ष्य यदि वससि तद्वस॥ ] हे पथिक, अत्र क्व लभ्यते स्रस्तरकमस्माकं पामरगृहे। उन्नतान् पयोधरान् मेघान् दृष्ट्वा यदि वससि ततो वस। इति प्राकृतः ( अर्थः )। भावार्थस्त्वयम्। हे पथिक, अस्माकं पामरगृहे ग्रामीणगृहे सत्थरयं स्वस्थरतं क प्राप्यते। अत्र कोऽर्थः। आत्मानं प्रति ग्रामीणत्वव्याजेन च्छेकगतिकां सुरतचातुर्यं प्रकटयति। तथोन्नतौ पयोधरौ मामकीनौ चिबुकोत्तम्भनरुची दृष्ट्वा यदि वससि ततोऽवश्यं वस। मया सह रमस्वेति प्रकारान्तरेण शब्दश्लेषेण प्रकटयति ॥ ४९४ ॥

495) [ वस पथिकाङ्गण एव भ्रश्यतु तावत्तव वसनदोहदः। इह ग्रामे हेमन्तः केवलं ग्रीष्मस्य सदृक्षः ॥ ] हे पथिक, अङ्गण एव वस। ततस्तव वसनदोहदो गच्छतु। नवरं केवलमत्र ग्रामे हेमन्तो ग्रीष्मसदृक्षः। कोऽर्थः। यद्यत्र वत्स्यसि तदा मत्कुचोष्मणा गतशीतो गतामपि रात्रिं न ज्ञास्यस इत्यर्थः ॥ ४९५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



496) इत्तो निवसइ अत्ता एत्थ अहं एत्थ परियणो सयलो।
ए पहिय रत्तिअंधय मा मह सयणे निमज्जिहिसि ॥ २५ ॥

## ५१. जोइसियवज्जा [ ज्यौतिषिकपद्धतिः ]

497) दीहरखडियाहत्थो जोइसिओ भमइ नयरमज्झम्मि।
जाणइ सुक्कस्स गई गणइ जइ गणावए को वि ॥ १ ॥

498) जोइसिय मा विलंबसु खडियं घेत्तूण गणसु मह तुरियं।
अंगारए पणट्ठे सुक्कस्स गई तह च्चेय ॥ २ ॥

---

496) [ इतो निवसति श्वश्रूरत्राहमत्र परिजनः सकलः। हे पथिक रात्र्यन्ध मा मम शयने निमंक्ष्यसि ] इतो निवसति स्वपिति अत्ता श्वश्रूः। अत्राहम्। इतः परिजनः सकलः। हे रात्र्यन्ध पथिक मा मम शयने निमंक्ष्यसि। काचनाकुल्या सकलपरिजनस्वापस्थान(दर्शन)व्याजेन पथिकस्य सुरताय समागच्छतो निशीथे आत्मनः स्थानं निवेदितवती ॥ ४९६ ॥

497) [ दीर्घखटिकाहस्तो ज्यौतिषिको भ्राम्यति नगरमध्ये। जानाति शुक्रस्य गतिं गणयति यदि गणयति कोऽपि ॥ ] ज्यौतिषिको नगरमध्ये भ्राम्यति। किंविशिष्टः। दीर्घखटिकाहस्तः। जानाति शुक्रस्य गतिं मार्गवस्यातिचारम्। अस्मिन् राशौ नक्षत्रे शुक्रो गतो गमिष्यति गच्छतीति। अतो यदि कोऽपि गणयति कथयेति प्रतिपादयति, तदा गणयतीत्यक्षरार्थः। भावार्थस्त्वयम्। दीर्घशेफो नगरमध्ये भ्राम्यति, शुक्रस्य सप्तमधातोर्गतिं स्तम्भनं कर्तुं जानाति। अतः कारणाद्यदि काचन याभयति तदा याभयतु। शुक्रस्तम्भनेन तस्याः सुरतसुखं पूरयामीत्यर्थः ॥ ४९७ ॥

498) [ ज्यौतिषिक मा विलम्बस्व खटिकां गृहीत्वा गणय मम त्वरितम्। अङ्गारके ( अङ्गरते ) प्रनष्टे शुक्रस्य गतिस्तथैव ॥ ] ज्यौतिषिक मा विलम्बस्व। मम गणय त्वरितम्। किं कृत्वा। खटिकां गृहीत्वा। अङ्गारके भौमे, पक्षे अङ्गरते। प्रनष्टे। शुक्रस्य गतिः शुक्रातिचारस्तथैवास्ते ॥ ४९८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



499) अत्थि घर च्चिय गणओ विचित्तकरणेहि निट्ठुरं गणइ।
न हु जाणइ सुक्कगई तेणाहं तुह घरे पत्ता ॥ ३ ॥

500) जोइसिय कीस चुक्कसि विचित्तकरणाइ जाणमाणो वि।
तह कह वि कुणसु सिग्घं जह सुक्कं निच्चलं होइ ॥ ४ ॥

501) विवरीए रइबिंबे नक्खत्ताणं च ठाणगहियाणं।
न पडइ जलस्स बिंदू सुंदरि चित्तट्ठिए सुक्के ॥ ५ ॥

499) [ अस्ति गृह एव गणको विचित्रकरणैर्निष्ठुरं गणयति। न खलु जानाति शुक्रगतिं तेनाहं तव गृहे प्राप्ता ॥ ] अस्ति गृह एव गणकः। विचित्रकरणैः, विचित्राणि यानि करणानि बवबालवादीनि सप्त, तैर्निष्ठुरं गणयति। परं न खलु जानाति शुक्रस्य गतिं शुक्रातिचारं, तेनाहं तव गृहे प्राप्तास्मीति। भावार्थस्त्वयम्। अस्ति गृहे एव गणको विचित्रकरणैर्नानाबन्धैर्निष्ठुरं गणयति। परं न खलु जानाति शुक्रस्तम्भनं, तेनाहं तव गृहे प्राप्तास्मीति। त्वं तथा कुर्विथा यथा शुक्रो निश्चलः (शुक्रं निश्चलं) स्यादिति ॥ ४९९ ॥

500) [ ज्यौतिषिक किं प्रमाद्यसि विचित्रकरणानि जानानोऽपि। तथा कुरु कथमपि शीघ्रं यथा शुक्रो (शुक्रं) निश्चलो (निश्चलं) भवति ॥ ] ज्यौतिषिक किमिति भ्रमसि विचित्रकरणानि जानानोऽपि। तथा कथमपि कुरु शीघ्रं यथा शुक्रो निश्चलो भवति। पक्षे शुक्रं सप्तमो धातुर्वीर्यमिति ॥ ५०० ॥

501) [ विपरीते रविबिम्बे (रतिबिम्बे) नक्षत्राणां (नखक्षतानां) च स्थानगृहीतानाम्। न पतति जलस्य (बीजस्य) बिन्दुः सुन्दरि चित्रास्थे (चित्तस्थे) शुक्रे ॥ ] विपरीते रविबिम्बे पक्षे रतिबिम्बे। नक्षत्राणां नखक्षतानां च। न पतति जलस्य बिन्दुः, हे सुन्दरि, चित्रास्थे शुक्रे भार्गवे। पक्षे जलस्य बीजस्य, चित्तस्थे शुक्रे वीर्ये ॥ ५०१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



502) विउलं फलयं थोरा सलायया[1] तुं पि गणय कुसलो सि ।
तह वि न आओ सुक्को सच्चं चिय सुन्नहियओ सि ॥ ६ ॥

503) डज्झउ सो जोइसिओ विचित्तकरणाइ जाणमाणो वि ।
गणिउं सयवारं मे उट्ठइ धूमो गणंतस्स ॥ ७ ॥

504) जइ गणसि पुणो वि तुमं विचित्तकरणेहि गणय सविसेसं ।
सुक्कक्कमेण[2] रहियं न हु लग्गं सोहणं होइ ॥ ८ ॥

505) मोत्तूण करणगणियं अंगुलिमेत्तेण जइ वि सो गणइ ।
अइणिउणो जोइसिओ कड्ढइ नाडीगयं सुक्कं ॥ ९ ॥

502) [ विपुलं फलकं दीर्घा शलाका त्वमपि गणक कुशलोऽसि । तथापि नागतः शुक्रः सत्यमेव शून्यहृदयोऽसि ॥ ] विपुलो विस्तीर्णः फलकः[3], थोरा प्रौढा शलाका, त्वमपि गणक कुशलोऽसि । तथापि नागतः शुक्रः सत्यमेव शून्यहृदयोऽसि । विस्तीर्णं रतिमन्दिरं, दीर्घश्च प्रजापतिस्त्वमपि कुशलो यभने प्रवीणः । तथापि यन्न शुक्रं समायातं, न द्रवीभूतोऽसि, तज्जाने शून्यहृदयोऽसि ॥ ५०२ ॥

503) [ दह्यतां स ज्यौतिषिको विचित्रकरणानि जानानोऽपि । गणयित्वा शतवारं ममोत्तिष्ठति धूमो गणयतः ॥ ] विचित्रकरणानि जानानोऽपि दह्यतां स ज्यौतिषिकः । मम शतवारं गणयित्वा धूम उत्तिष्ठति गणयतस्तस्येति ॥ ५०३ ॥

504) [ यदि गणयसि पुनरपि त्वं विचित्रकरणैर्गणय सविशेषम् । शुक्रक्रमेण रहितं न खलु लग्नं शोभनं भवति ॥ ] हे गणक, यदि गणयसि पुनस्त्वं, विचित्रकरणैः सविशेषं गणय । शुक्रगमनेन रहितं न खलु लग्नं शोभनं भवति ॥ ५०४ ॥

505) [ मुक्त्वा करणगणितमङ्गुलिमात्रेण यद्यपि स गणयति । अतिनिपुणो ज्यौतिषिकः कर्षति नाडीगतं शुक्रम् ॥ ] करणगणितं मुक्त्वा, अंगुलिमात्रेण अंगुलिरेखाभिर्यदि गणयति, तदा अतिनिपुणो ज्यौतिषिक आकर्षति नाडीगतं शुक्रम् ॥ ५०५ ॥

1 G, I सलाइया; 2 G, I सुक्कगमणेण 3 I फलहकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



506) भणिओ वि जइ न कुप्पसि जइ न तुमं होसि कूडजोइसिओ।
ता कीस तुज्झ जाया अन्नेहि गणाविर दियहं ॥ १० ॥

507) अंगारयं न याणइ न हु बुज्झइ हत्थचित्तसंचारं।
इय माइ कूडगणओ कह जाणइ सुक्कसंचारं ॥ ११ ॥

## ५२. लेहयवज्जा [ लेखकपद्धतिः ]

508) मसि मलिऊण न याणसि लेहणि गहिऊण मूढ खलिओ सि।
ओसरसु कूडलेहय सुललियपत्तं विणासिहिसि ॥ १ ॥

509) ढलिया य मसी भग्गा य लेहणी खरडियं च तलवट्टं।
धिद्धित्ति कूडलेहय अज्ज वि लेहत्तणे तण्हा ॥ २ ॥

---

506) [ भणितोऽपि यदि न कुप्यसि यदि न त्वं भवसि कूटज्यौतिषिकः । तत् किं तव जायान्यैर्गणयति दिवसम् ॥ ] भणितोऽपि यदि न कुप्यसि, यदि त्वं न भवसि कूटज्यौतिषिकस्ततः किमिति तव जायान्यैर्गणयति दिवसम् । यदि त्वं सम्यग्वक्तुं जानासि, तदा किमित्यन्येन याभयति । तस्मात्त्वमकुशलः ॥ ५०६ ॥

507) [ अङ्गारकं न जानाति न खलु बुध्यति हस्तचित्रासंचारम् (हस्तचित्रसंचारम्) । इति मातः कूटगणकः कथं जानाति शुक्रसंचारम् ॥ ] अङ्गारकं भौमं, (पक्षे) अङ्गरतं, न जानाति, न खलु बुध्यति हस्तचित्रा-संचारम् । हस्तचित्रयोश्च संचारः कुक्कोकप्रणीतोऽत्र बोद्धव्यः । ग्रन्थगौरव-भयान्न लिख्यतेऽत्र । इति हे मातः, अयं कूटगणकः शुक्रसंचारं भार्गवसंचारं शुक्रस्तम्भनं कथं जानाति ॥ ५०७ ॥

508) [ मषीं मर्दितुं न जानासि लेखनीं गृहीत्वा मूढ स्खलितोऽसि । अपसर कूटलेखक सुललितपत्रं विनाशयिष्यसि ॥ ] मषीं मर्दितुं न जानासि लेखनीं गृहीत्वा मूढ स्खलितोऽसि अतोऽपसर कूटलेखक, सुललितपत्रं विनाशयिष्यसि । कश्चिद् यभ्धुम् अनिपुणः कयाचिन्नायिकया एवमुच्यते ॥ ५०८ ॥

509) [ स्खलिता च मषी भग्ना च लेखनी भग्नं च तालपत्रम् (तलपट्टम्) । धिग्धिगिति कूटलेखकाद्यापि लेखकत्वे तृष्णा ॥ ] ढलिता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



510) पिहुलं मसिभायणयं अत्थि मसी वित्थरं च तलवट्टं।
अम्हारिसाण कज्जे हयलेहय लेहणी भग्गा ॥ ३ ॥

५२. विज्जवज्जा [ वैद्यपद्धतिः ]

511) विज्ज न पसो जरओ न य वाही एस को वि संभूओ।
उवसमइ सलोणेणं विडंगजोयामयरसेणं ॥ १ ॥

512) सच्चं जरए कुसलो सरसुप्पन्नं य लक्खसे वाहिं।
एयं पुणो वि अंगं विज्ज विडंगेहि पच्चत्तं ॥ २ ॥

513) पुक्कारयं पउंजसु बालाइ रसुब्भवाइ वाहीए।
अज्जं अणज्ज निल्लज्ज विज्ज पेज्जाइ न हु कज्जं ॥ ३ ॥

मषी, भग्ना लेखनी, खरटितं च तालपत्रम्। धिग् धिक् कूटलेखक, अद्यापि लेखकत्वे तृष्णा। अन्यच्च, स्खलिता मषी वीर्यं, भग्ना लेखनी शेफः, खरटितं तल्पत्रं शय्याप्रच्छादनपटम्। धिग् रे कूटकार्यकर्तः, अद्यापि यभने तव तृष्णा ॥ ५०९ ॥

510) [ पृथुलं मषीभाजनमस्ति मषी विस्तृतं च तालपत्रम् ( वराङ्गम् ) । अस्मादृशीनां कार्ये हतलेखक लेखनी भग्ना ॥ ] हे हतलेखक, पृथुलं मषीभाजनं, मषी चास्ति, विस्तीर्णं तालपत्रम्। अस्मादृशीनां कार्ये तव लेखनी भग्ना। लिख्यत उल्लिख्यते भगमनयेति लेखनी ॥ ५१० ॥

511) [ वैद्य नैष ज्वरो न च व्याधिरेष कोऽपि संभूतः । उपशाम्यति सलवणेन विडङ्ग ( विटाङ्ग ) योगामृतरसेन ॥ ] हे वैद्य नैष ज्वरो, न च कोऽपि संभूतो व्याधिः। किंतु अयं ज्वरो विडंगयोग एवामृतरसस्तेनोपशाम्यति। किंविशिष्टेन तेन। सलवणेन। भावार्थश्चायम्। अयं सलावण्यविटाङ्गयोग एवामृतरसस्तेनोपशाम्यति ॥ ५११ ॥

512) [ सत्यं ज्वरे कुशलः स्वरसोत्पन्नं च लक्षसे व्याधिम्। इदं पुनरप्यङ्गं वैद्य विडङ्गैः प्रज्ञप्तम् ॥ ] सत्यं ज्वरे कुशलः स्वरसोत्पन्नं च लक्षसे व्याधिम्। इदं पुनरङ्गं वैद्य विटाङ्गैः प्रज्ञप्तं पुनर्नूतनीसंजातम् ॥ ॥ ५१२ ॥

513) [ पुक्कारयं ( पुंस्कारकं ) प्रयुङ्क्ष्व बालाया रसोद्भवस्य व्याधेः। अद्यानार्य निर्लज्ज वैद्य पेयया न खलु कार्यम् ॥ ] अद्य अनार्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



514) सामा खामा न सहेइ मद्दणं विज्ज किं वियप्पेणं।
अग्गंगुलीइ दिज्जउ अवलेहो माउलिंगस्स ॥ ४ ॥
515) पुक्कारएण विज्जय निव्विण्णा तुह य दीहसासेण।
मा वारिज्जउ बाला भुंजउ अन्नं जहिच्छाए ॥ ५ ॥
516) गहवइसुएण भणियं अउव्वविज्जत्तणं हयासेणं
जेण पउंजइ पुक्कारयं पि पव्वत्तियाणं पि ॥ ६ ॥
517) विज्ज तुहागमण च्चिय मुक्का जरएण किं न परिमुणसि।
ता नियसु मज्झ अंगे संपइ सेओ समुप्पन्नो ॥ ७ ॥

निर्लज्ज वैद्य, बालाया रसोद्भवाया व्याधेः पुक्कारयं ओषधिविशेषं प्रयुङ्क्ष्व। किंतु पिज्जाए पेयया न खलु कार्यम् ॥ ५१३ ॥

514) [ श्यामा क्षामा न सहते मर्दनं वैद्य किं विकल्पेन। अग्राङ्गुल्या दीयतामवलेहो मातुलिंगस्य ( मातृलिंगस्य ) ॥ ] श्यामा क्षामा न सहते मर्दनं, वैद्य किं विकल्पेन, अग्राङ्गुल्या क्रियतामवलेहो मातुलिंगस्य। अंगमर्दनं न सहते। लिंगस्य अङ्गुल्या अवलेहः क्रियताम् ॥ ५१४ ॥

515) [ पुक्कारयेण वैद्य निर्विण्णा तव च दीर्घश्वासेन। मा वार्यतां बाला भुङ्क्तामन्नं ( अन्यं ) यथेच्छम् ॥ ] पुक्कारएण वैद्य निर्विण्णा तव दीर्घश्वासेन। मा वार्यतां बाला, भुङ्क्तामन्नं यदृच्छया। पक्षे अन्यं विटम् ॥ ५१५ ॥

516) [ गृहपतिसुतेन भणितमपूर्ववैद्यकं हताशेन। येन प्रयुङ्क्ते पुक्कारयं ( पूत्काररतम् ) अपि प्रव्रजितानामपि ॥ ५१६ ॥ ] गृहपतिसुतेन अपूर्ववैद्यकं भणितमस्ति हताशेन। येन प्रयुङ्क्ते पुक्कारयं पव्वत्तियाणं वि। पक्षे पूत्काररतं[1] प्राप्तानामपि।

517) [ वैद्य तवागमन एव मुक्ता ज्वरेण किं न जानासि। तद् पश्य ममाङ्गे संप्रति स्वेदः समुत्पन्नः ॥ ] हे वैद्य तवागमन एवाहं मुक्ता ज्वरेण किं न जानासि। ततः पश्य मदङ्गे संप्रति स्वेदः समुत्पन्नः। ज्वरो यदा मुञ्चति, तदा स्वेदो भवति। पक्षे, त्वदागमनजन्मा प्रस्वेदः समुल्लसति साधुना ॥ ५१७ ॥

1 G पूत्काररतम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



518) विज्जय अन्नं वारं मह जरओ सयरएण पन्नत्तो।
जइ तं नेच्छसि दाउं ता किं छासी वि मा होउ ॥ ८ ॥

519) बालं जराविलंगिं कलमहुरपलाविणिं नियंतस्स।
विज्जस्स सूसुओ सूसुओ वि सहसत्ति पब्भट्ठो ॥ ९ ॥

520) मोत्तूण बालतंतं तह य वसीकरणमंततंतेहिं।
सिद्धत्थेहि महम्मइ तरुणी तरुणेण विज्जेण ॥ १० ॥

521) अन्नं न रुच्चइ च्चिय मज्झ पियासाइ पूरियं हिययं।
नेहसुरयल्लयंगे तुह सुरयं विज्ज पडिहाइ ॥ ११ ॥

---

518) [ वैद्यान्यं वारं मम ज्वरः शतरयेण ( शतरतेन ) प्रज्ञप्तः। यदि तत् नेच्छसि दातुं तत् किं तक्रमपि ( षडशीतिरपि ) मा भवतु ॥ ] वैद्य अन्यं वारं मम सयरएण औषधेन प्रज्ञप्तः ( ज्वरः )। यदि तन्नेच्छसि दातुं, तत् किं छासी तक्रमपि मा भवतु। पक्षे, शतस्य रतम्। छासी वि षडशीतिरपि मा भूत् ॥ ५१८ ॥

519) [ बालां ज्वराविलाङ्गीं कलमधुरप्रलापिनीं पश्यतः। वैद्यस्य सुश्रुतः सुश्रुतोऽपि सहसा प्रनष्टः ॥ ] वैद्यस्य सुश्रुतोऽपि सुश्रुतो वैद्यकसंहिता प्रनष्टो विसस्मार। कथम् सहसत्ति झटिति। किंविशिष्टस्य वैद्यस्य। बालां ज्वराविलाङ्गीं कलमधुरप्रलापिनीं पश्यतः। एतां बालाम् एवंविधरोगरुग्णां कथमुपचरिष्यामीति वैद्यस्य पण्डितस्यापि चिन्ता समुदपादि। बालां ज्वराविलाङ्गीं पश्यतः सुश्रुतो नष्टः ॥ ५१९ ॥

520) [ मुक्त्वा बालतन्त्रं तथा च वशीकरणमन्त्रतन्त्रैः। सिद्धार्थैः महण्यते तरुणी तरुणेन वैद्येन ॥ ] मुक्त्वा बालतन्त्रं, तथा वशीकरणमन्त्रतन्त्रैः, सिद्धार्थैः महम्मइ तरुणी तरुणेन वैद्येन ॥ ५२० ॥

521) [ अन्नं ( अन्यत् ) न रोचत एव, मम पिपासया ( प्रियाशया ) पूरितं हृदयम्। स्नेहसुरतार्द्राङ्गि तव सुरतं वैद्य प्रतिभाति ॥ ] अन्नम् अन्यच्च न रोचत एव। मम पिपासया प्रियाशया पूरितं हृदयम्। स्नेहसुरतार्द्राङ्गि तव सुरतं वैद्य प्रतिभाति ॥ ५२१ ॥

---

1 G तुं (त्वम्)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ५४. धम्मियवज्जा [धार्मिकपद्धतिः]

522) जो धम्मिओ न पावइ कुरयं मंदारयं च मुग्गरयं।
सो गहियकरंडो च्चिय कत्तो धुत्तीरयं[1] लहइ॥ १॥

523) धुत्तीरएण धम्मिय जइ इच्छसि लिंगपूरणं काउं।
ता वज्जसु मज्झ [2]परोहडम्मि सूरम्मि अत्थमिए॥ २॥

524) धुत्तीरयस्स कज्जे गहिराणि परोहडाइ वच्चंतो।
धम्मिय सुरंगकाओ कुरयाण वि नवरि चुक्किहिसि॥ ३॥

522) [ यो धार्मिको न प्राप्नोति कुरबकं ( कुरतं ) मन्दारकं (मन्दारतं) च मुद्गरकम् ( मुग्धारतम् )। स गृहीतकरण्ड एव ( गृहीत-करण्डक एव ) कुतो धत्तूरकं ( धूर्तारतं )] लभते॥ यो धार्मिको न प्राप्नोति कुरबकं मन्दारकं, मुग्गरकं, स गृहीतकरण्ड एव कुतो धत्तूरकं लभते। अन्यच्च। ( यः ) कुरतं, मन्दारतं, मुग्धारतं न प्राप्नोति स गृहीत-करण्ड[3] एव कुतो धूर्तारतं लभते॥ ५२२॥

523)[ धत्तूरेकण ( धूर्तारतेन ) धार्मिक यदीच्छसि लिङ्गपूरणं कर्तुम्। तत आगच्छ मम गृहपश्चाद्भागे सूर्येऽस्तमिते॥ ] हे धार्मिक, धत्तूरकेण यदी-च्छसि लिङ्गस्येश्वरस्य पूरणं कर्तुं, तत आगच्छ मम गृहपश्चाद्भागे सूर्येऽस्तमिते। अन्यच्च। धूर्तारतेन हे धार्मिक लिङ्गपूरणं प्रजापतिपूरणं कर्तुं ( यदीच्छसि ), तदा मम गृहमागत्य पश्चात सूर्येऽस्तमिते सुरतसुखमनुभूयाः॥ ५२३॥

524) [ धत्तूरकस्य ( धूर्तारतस्य ) कार्ये गभीरान् गृहपश्चाद्भागान् व्रजन्। धार्मिक सुरङ्गकात् कुरबकेभ्योऽपि ( कुरतेभ्योऽपि ) केवलं भ्रंशि-ष्यसि॥ ] धत्तूरकस्य कार्ये गभीराणि परोहडाणि (परगृहपश्चाद्भागान्) व्रजन् धार्मिक सुरंगाकार्ये कुरबकाण्यपि चुक्किहिसि न प्राप्स्यसि। धूर्ता-रतस्य निमित्तं गंभीरान् गृहपश्चाद्भागान् व्रजन् सुरतकार्ये कुरतान्यपि न प्राप्स्यसि॥ ५२४॥

1 Here and in the following gāthās of this section, G has धत्तूरयं, धत्तूरएण, धत्तूरयस्स, धत्तूरयाण, धत्तूरयाइ, धत्तूरएहिं. Only in 526 and 529, G reads धुत्तीरएहि and धुत्तीरयं respectively. 2 Here and in subsequent gāthās I reads पुरोहड for परोहड. 3 G गृहीतकराण्ड

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



525) धुत्तीरयाण कज्जेण धम्मिओ परपरोहडे भमइ।
अन्नेहि विलुप्पंतं नियथारामं न लक्खेइ ॥ ४ ॥

526) घेत्तूण करंडं भमइ वावडो परपरोहडे नूणं।
धुत्तीरएसु रत्तो एक्कं पि न मेल्लए धम्मी ॥ ५ ॥

527) सुलहाइ परोहडसंठियाइ धुत्तीरयाणि मोत्तूणं।
कुरयाण कए रण्णं पेच्छह कह धम्मिओ भमइ ॥ ६ ॥

528) कंचीरएहि कणवीरएहि धुत्तीरएहि बहुएहिं।
जइ इच्छसि देहरयं धम्मिय ता मह घरे एज्ज ॥ ७ ॥

525) [ धत्तूरकाणां ( धूर्तारतानां ) कार्येण धार्मिको परगृहपश्चाद्भागान् भ्रमति । अन्यैर्विलुप्यमानं निजारामं न लक्षयति ॥ ] धत्तूरकाणां कार्ये धार्मिको भ्रमति परोहडशतानि । अन्यैर्विलुप्यमानं निजारामं न लक्षयति । धूर्तारतानां कृते परोहडशतानि परिभ्रमति । आत्मन आरामम् आत्मनो जायाम् अन्येन रम्यमाणां न लक्षयति ॥ ५२५ ॥

526) [ गृहीत्वा करण्डं भ्राम्यति व्यापृतः परगृहपश्चाद्भागान् नूनम् । धत्तूरकेषु ( धूर्तारतेषु ) रक्त एकमपि ( एकामपि ) न मुञ्चति धर्मी ॥ ] गृहीत्वा करण्डं भ्राम्यति व्यापृतः परपरोहडान्नूनम् । धत्तूरकेषु रक्त एकमपि न त्यजति धर्मी । ( धूर्तारतेषु रक्त एकामपि न त्यजति धर्मी । ) पक्षे गृहीतकराण्डः ॥ ५२६ ॥

527) [ सुलभान् गृहपश्चाद्भागसंस्थितान् धत्तूरकान् ( धूर्तारतानि ) मुक्त्वा । कुरबकाणां ( कुरतानां ) कृतेऽरण्यं प्रेक्षध्वं कथं धार्मिको भ्रमति ॥ ] सुलभानि परोहडसंस्थितानि धत्तूरकपुष्पाणि मुक्त्वा, कुरबकाणां निमित्तं पश्यत कथं धार्मिको भ्रमति । धूर्तारतानि सुलभानि । कुरतकृते ॥५२७॥

528) [ कंचीरकैः ( काञ्चीरतैः ) करवीरकैः ( कन्यारतैः ) धत्तूरकैः ( धूर्तारतैः ) बहुभिः । यदीच्छसि देवगृहं ( देहरतं ) धार्मिक तन्मम गृह आगच्छेः ॥ ] हे धार्मिक, करवीरकैर्धत्तूरकैर्बहुभिर्यदि चेद् देवगृहमिच्छसि, ततो मम गृह आगच्छ ॥ कैः । कांचनारकुसुमैः, पुनर्बहुभिः कणवीरकुसुमैः, पुनरपि बहुभिर्धत्तूरकुसुमैः । पक्षान्तरे । काञ्चीरतैः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



529) मंदारयं विवज्जइ कुरयं परिहरइ चयइ भंगरयं।
धुत्तीरयमलहंतो गहियकरंडो गणो भमइ ॥ ८ ॥

530) वियसियमुहाइ वण्णुज्जलाइ मयरंदपायडिल्लाइं।
धुत्तीरयाइ धम्मिय पुण्णेहि विणा न लब्भंति ॥ ९ ॥

531) एक्केण वि जह धुत्तीरएण लिंगस्स उवरि लग्गेण।
मंदारयाण धम्मिय कोडीइ न तं सुहं होइ ॥ १० ॥

532) सिसिरमयरंदपज्झरणपउरपसरंतपरिमलुल्लाइं।
कणवीरयाइ गेण्हसु धम्मिय सब्भावरत्ताइं ॥ ११ ॥

---

कन्यारतैर्धूर्तारतैर्बहुभिर्देहरतं कर्तुं यदीच्छसि तदा मम गृहमागच्छेरिति स्वैरिणीवाक्यम् ॥ ५२८ ॥

529) [ मन्दारकं ( मन्दारतं ) विवर्जयति, कुरबकं ( कुरतं ) परिहरति, त्यजति भृङ्गारकं ( भंगरतम् )। धत्तूरकं ( धूर्तारतम् ) अलभमानो गृहीतकरण्डो ( गृहीतकराण्डो ) गणो भ्रमति ॥ ] मन्दारकं विवर्जयति, कुरबकं परिहरति, भृङ्गरकं भृङ्गराजं त्यजति। धत्तूरकमलभमानो गृहीतकरण्डको गणो धार्मिकपेटकः परिभ्रमति। पक्षे। मन्दारतं, कुरतं, भंगरतं धूर्तारतम्। गृहीतं कराभ्यामण्डकं मुष्को येन स करगृहीतसाधनः ॥ ५२९ ॥

530) [ विकसितमुखानि वर्णोज्ज्वलानि मकरन्दप्रकटानि। धत्तूरकाणि ( धूर्तारतानि ) धार्मिक पुण्यैर्विना न लभ्यन्ते ॥ ] धत्तूरककुसुमानि पुण्यैर्विना न लभ्यन्ते। कीदृशि। विकसितमुखानि पुष्पितानि, वर्णोज्ज्वलानि, मकरन्दप्रसिद्धानि। अथ च धूर्तारतानि हसितमुखानि, वर्णेन शरीरकान्त्योज्ज्वलानि, मकरन्दप्रकटानि ॥ ५३० ॥

531) [ एकेनापि यथा धत्तूरकेण ( धूर्तारतेन ) लिङ्गस्योपरि लग्नेन। मन्दारकाणां ( मन्दारतानां ) धार्मिक कोट्या न तत्सुखं भवति ॥ ] हे धार्मिक हे देवपूजक, एकेनापि धत्तूरकपुष्पेण लिङ्गस्योपरि लग्नेन यथा सुखं भवति तथा मन्दाराणामपि कोट्या सुखं न भवति। अन्यच्च। एकेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ५५. जंतियवज्जा [ यान्त्रिकपद्धतिः ]

533) जंतिय गुलं विमग्गसि न य मे इच्छाइ वाहसे जंतं ।
अरसन्न किं न याणसि न रसेण विणा गुलं होइ ॥ १ ॥
534) वियडा वि जंतवाया मउओ नालो रसाउलो उच्छू ।
लट्ठी वि[1] सुप्पमाणा किं जंतिय ऊणयं वहसि ॥ २ ॥
535) सद्दालयं सरूवं वित्थिण्णं वररसं सुमद्दसहं ।
जं[2] एरिसयं जंतं तत्थ सुहं जंतिओ लहइ ॥ ३ ॥

धूर्तारतेन विदग्धालिङ्गनेन लिङ्गलग्नेन साभसस्पृष्टेन यत् सुखं भवति, तन्मन्दारतेन मुग्धानां सुरतेन कुतः । अपि तु न क्वापि ।। ५३१ ।।

532) [ शिशिरमकरन्दप्रक्षरणप्रचुरप्रसरत्परिमलयुक्तानि । करवीराणि ( कन्यकारतानि ) गृहाण धार्मिक स्वभावरक्तानि (सद्भावरक्तानि) ।। ] हे धार्मिक, शिशिरमकरन्दप्रक्षरणप्रचुरप्रसरत्परिमलयुक्तानि करवीराणि गृहाण स्वभावरक्तानि प्रकृत्या रक्तानि । सात्त्विकभावभावितप्रस्रवद्रवत्पानीयानि कन्यकारतानि सद्भावानुरक्तानि गृहाणामूनि ।। ५३२ ।।

533) [ यान्त्रिक गुडं विमार्गयसे न च ममेच्छया वहसि यन्त्रम् । अरसज्ञ किं न जानासि न रसेन विना गुडो भवति ।। ] हे यान्त्रिक । यन्त्रेण चरति यान्त्रिकः । गुलं मधुरतामिच्छसि, ममेच्छया यन्त्रं न वहसि । अतः कारणाद् हे अरसज्ञ, किं न जानासि रसेन विना गुलं न भवति । अन्यच्च । हे मैथुनकर्तः, द्रवीकरणं त्वं वाञ्छसि । ममेच्छया यन्त्रं न वहसि । अरसज्ञ किं त्वं न जानासि शोभनमैथुनेन विना गुलं मधुरत्वं विचित्रद्रवत्वं[3] कुतो भवति । अपि तु न स्यात् ।। ५३३ ।।

534) [ विकटा अपि यन्त्रपादा मृदुको नालो रसाकुल इक्षुः । यष्टिरपि सुप्रमाणा किं यान्त्रिकोनकं वहसि ।। ] विकटा यन्त्रपादा, मृदुको नालो, रसाकुल इक्षुः । यष्टिरपि सुप्रमाणा, अतो हे यान्त्रिक, किम् ऊनं वहसि ।। ५३४ ।।

535) [ शब्दालयं सरूपं विस्तीर्णं वररसं सुमर्दसहम् । यद् ईदृशं यन्त्रं तत्र सुखं यान्त्रिको लभते ।। ५३५ ।। ]

1 G य, 2 G जइ, 3 विस्तद्रवत्वम्

वज्जा १०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



536) तह जंतिएण जंतं अक्कंतं नेहणिब्भररसेण।
जह पढमं चिय कुंडी भरिया एक्केण घाएण ॥ ४ ॥

537) तं जंतं सा कुंडी सो उच्छू बहलपत्तलच्छाओ।
पीलावय तुज्झ गुणो अज्ज वि ऊणो रसो जाओ ॥ ५ ॥

५६. मुसलवज्जा [ मुसलपद्धतिः ]

538) चंदणवलियं दिढकंचिबंधणं दीहरं सुपरिमाणं।
होइ घरे साहीणं मुसलं धन्नाण महिलाणं ॥ १ ॥

539) थोरगरुयाइ [1]सुंदरकंचीजुत्ताइ हुंति नियगेहे।
धन्नाण महिलियाणं उक्खलसरिसाइ मुसलाइं ॥ २ ॥

---

536) [ तथा यान्त्रिकेण यन्त्रमाक्रान्तं स्नेहनिर्भररसेन। यथा प्रथममेव कुण्डी भृतैकेन घातेन ॥ ] तथा यान्त्रिकेण यन्त्रमाक्रान्तं स्नेहनिर्भररसेन, यथा प्रथममेव एकेनैव घातेन कुण्डी भृता ॥५३६॥

537) [ तद्यन्त्रं सा कुण्डी स इक्षुर्बहलपत्रलच्छायः। पीडक तव गुणोऽद्याप्यूनो रसो जातः ॥ ] तद्यन्त्रं लोकोत्तरं यन्त्रं, सा कुण्डी, स इक्षुर्बहलपत्रलच्छायः। हे यान्त्रिक तव गुणोऽयं यद् अद्याप्यूनो रसो जातः ॥ ५३७ ॥

538) [ चन्दनवलितं दृढकाञ्चीबन्धनं दीर्घं सुपरिमाणम्। भवति गृहे स्वाधीनं मुसलं धन्यानां महिलानाम् ॥ ] धन्यानां स्त्रीणां गृहे स्वाधीनं मुसलं भवति। क्व। गृहे। किंविशिष्टम्। चन्दनवलितं, दृढकाञ्चीबन्धनं, दीर्घं सुपरिमाणम् ॥ ५३८ ॥

539) [ स्थूलदीर्घाणि सुन्दरकाञ्चीयुक्तानि भवन्ति निजगेहे। धन्यानां महिलानामुदूखलसदृशानि मुसलानि ॥ ] धन्यानां महिलानाम् उदूखलसदृशानि मुसलानि भवन्ति। किंविशिष्टानि। स्थूलदीर्घाणि सुन्दरकाञ्चीयुक्तानि लोहमयकटकयुक्तानि। क्व। निजगेहे ॥ ५३९ ॥

---

1 G, I, Laber सुंदरि ( Vocative Singular )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



540) मुहभारियाइ सुट्ठु वि सुट्ठु वि कंचीइ दिढनिबद्धाई।
अन्नाहि पि हु जुण्णुक्खलम्मि भज्जंति मुसलाई ॥ ३ ॥

541) भमिओ चिरं असेसो गामो मइ सहियओ सयं वारं।
गेहुक्खलपरिमाणेण मामि मुसलं चिय न दिट्ठं ॥ ४ ॥

542) भद्दमुहमंडणं चिय दरपिहुलं तह य कंचिसोहिल्लं।
अन्नेसिं पिय[1] मुसलं पडिछंदं तेण वच्चामो ॥ ५ ॥

५७. बालासंवरणवज्जा [ बालासंवरणपद्धतिः ]

543) जस्स तुमं अणुरत्ता सो तुज्झ य मंदनेहओ पुत्ति।
न हु दिज्जइ ताली दीहरच्छि एक्केण हत्थेण ॥ १ ॥

---

540) [ मुखभारिकाणि सुष्ठ्वपि सुष्ठ्वपि काञ्च्या दृढनिबद्धानि। अन्याभिरपि खलु जीर्णोदूखले भज्यन्ते मुसलानि ॥ ] मुखगुरूणि, सुष्ठ्वपि काञ्च्या दृढबद्धानि, अन्याभिरपि जीर्णोदूखले भज्यन्ते मुसलानि ॥ ५४० ॥

541) [ भ्रान्तश्चिरमशेषो ग्रामो मया सख्यः शतवारम्। गेहोदूखलपरिमाणेन सख्यो मुसलमेव न दृष्टम् ॥ ] हे सख्यः, अशेषो ग्रामो मया चिरं भ्रान्तः। कथम्। शतं वारान्। हे मामि गेहोदूखलयोग्यं मुसलं न दृष्टम्। अयं भावः। सर्वमपि ग्रामं भ्रान्तास्मि। परम् आत्मभगयोग्यं कस्यापि साधनं न दृष्टमिति ॥ ५४१ ॥

542) [ भद्रमुखमण्डनमेवेषत्पृथुलं तथा च काञ्चीशोभितम्। अन्येषामपि मुसलं प्रतिच्छन्दं तेन व्रजामः ॥ ] अहं ( ? वयं ) तेन व्रजामः। अन्येषामेव मुसलं प्रतिच्छन्दं मद्गेहे नास्ति। किंविशिष्टम्। भद्रमुखमण्डनम्। दर ईषत्पृथुलम्। तथा च काञ्चीशोभितम् ॥ ५४२ ॥

543) [ यस्य त्वमनुरक्ता स तव च मन्दस्नेहः पुत्रि। न खलु दीयते तालिका दीर्घाक्ष्येकेन हस्तेन ॥ ] यस्य त्वमनुरक्ता स त्वयि हे पुत्रि मन्दस्नेहः, न खलु दीयते तालिका दीर्घाक्ष्येकेन हस्तेन ॥ ५४३ ॥

---

1 I चिय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



544) जत्थ गओ तत्थ गओ सामलि सीहो न जुप्पइ हलम्मि ।
सप्पुरिसो वि तह च्चिय पुंससु नयणाइ मा रुण्णं ॥ २ ॥

545) तइया वारिज्जंती पियासि[1] पइं उल्लिरीहि अच्छीहिं ।
एण्हिं विरहावत्थं पुणो वहंती किलामिहिसि ॥ ३ ॥

546) मा रुवसु पुत्ति छेयाण अग्गए खिज्जिहिति नयणाइं ।
न हु खिज्जइ ताण मणं सेलं मिव सलिलपूरेणं ॥ ४ ॥

547) दाणं न देंति बहुलं नेहं दरिसंति नेय रज्जंति ।
गेण्हंति न देंति मणं पुत्ति च्छेया दुराराहा ॥ ५ ॥

---

544) [ यत्र गतस्तत्र गतः श्यामले सिंहो न युज्यते हले । सत्पुरुषोऽपि तथैव प्रोञ्छ नयने मा रुदितम् ॥ ] श्यामले यत्र गतस्तत्र गतः सिंहः[2] । किम् । हले न युज्यते । सत्पुरुषोऽपि तथैव । अत एव नयने प्रोञ्छ । मा रुद्यताम् । काचन खण्डिता मानमवलम्ब्य यावत् स्थिता, तावदागत्य भर्त्रानुनीतापि मानं न तत्याज । ततः सोऽपि मानं जगृहे । एवंविधे व्यतिकरे काम ( ? कोप ) परवशो यावन्न पतिर्मानं त्यजति तावद्रोदितुं प्रवृत्ता सती सख्योच्यत एतावदिति ॥ ५४४ ॥

545) [ तदा वार्यमाणा पिबसि पतिमार्द्राभ्यामक्षिभ्याम् । इदानीं विरहावस्थां पुनर्वहन्ती क्लमिष्यसि ॥ ] तदा वार्यमाणापि त्वं पति उल्लिरीहि रोदनार्द्राभ्यामक्षिभ्यां पिबसि पश्यसीति यावत् । इदानीं विरहावस्थां पुनर्वहमाना क्लमिष्यसि ॥ ५४५ ॥

546) [ मा रुदिहि पुत्रि च्छेकानामग्रे खेत्स्येते नयने । न खलु खिद्यते ( क्षीयते ) तेषां मनः शैल इव सलिलपूरेण ॥ ] मा रोदीः पुत्रि च्छेकानामग्रे[3], यतो नयने तव रोदनेन खेत्स्येते । न खलु तेषां मनः खेत्स्यते क्षीयते, शैल इव पर्वतो यथा सलिलपूरेण । त्वद्रोदनेन तेषां छेकानां मनो न दूयते । प्रत्युत कृतकरोदनेन मां प्रतारयत्येषेति मन्यन्ते ॥ ५४६ ॥

547) [ दानं न ददति बहुलं स्नेहं दर्शयन्ति नैव रज्यन्ते । गृह्णन्ति न ददति मनः पुत्रि च्छेका दुराराधाः ॥ ] हे पुत्रि च्छेका दुरा-

---

1 G, I, Laber पियसि 2 G, I सिंहः किं हले युज्यते ।
3 G, I अग्रतः which presupposes the reading अग्गओ.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



548) रज्जंति[1] नेय कस्स वि रत्ता पसयच्छि न हु विरज्जंति[1]।
दिणयरकर व्व छेया अदिट्ठदोसा वि रज्जंति[1] ॥ ६ ॥

549) रज्जावंति[2] न रज्जहिं[3] हरंति हिययं न देंति नियहिययं।
छेया भुयंगसरिसा डसिऊण परंमुहा होंति ॥ ७ ॥

550) रज्जावंति[2] न रज्जहिं[3] देंति असोक्खं न दुक्खिया हुंति।
असुयविणय त्ति एण्हिं दुक्खाराहा जए छेया ॥ ८ ॥

551) रत्ते रत्ता कसणम्मि कसणया धवलयम्मि तह धवला।
फलिहमणि व्व छइल्ला हुंति जणे पुत्ति संपुण्णा ॥ ९ ॥

राध्याः । अथवा दुःखेनारुह्यन्ते दुरारोहाः । कथं तदेव दर्शयति । दानं न ददति, बहुलं स्नेहं दर्शयन्ति, नैव रज्यन्ते, परेषां मनो गृह्णन्ति, न त्वात्मनो ददति । अत एव दुराराध्याः ॥ ५४७ ॥

548) [ रज्यन्ते नैव कस्मिन्नपि रक्ताः प्रसृताक्षि न खलु विरज्यन्ते । दिनकरकरा इव छेका अदृष्टदोषा अपि रज्यन्ते ॥ ] रज्यन्ते नैव कस्मिन्नपि, हे प्रसृताक्षि[4] नैव रक्ताः सन्तो विरज्यन्ते । दिनकरकरा इव छेका दृष्टदोषा विरज्यन्ते । दिनकरकिरणपक्षे, दृष्टा दोषा रात्रिर्यैस्ते ॥ ५४८ ॥

549) [ रञ्जयन्ति न रज्यन्ते हरन्ति हृदयं न ददति निजहृदयम् । छेका भुजङ्गसदृशा दष्ट्वा पराङ्मुखा भवन्ति ॥ ५४९ ॥ ]

550) [ रञ्जयन्ति न रज्यन्ते ददत्यसौख्यं न दुःखिता भवन्ति । अश्रुतविनया इतीदानीं दुःखाराध्या जगति छेकाः ॥ ] रञ्जयन्ति न रज्यन्ते, ददत्यसौख्यं, न दुःखिता भवन्ति । अमुणेमि जाण इण्हि ( ? ) येषामिदानीं दुःखाराध्या जगति छेकाः ॥ ५५० ॥

551) [ रक्ते रक्ताः कृष्णे कृष्णा धवले तथा धवलाः । स्फटिकमणिरिव छेका भवन्ति जने पुत्रि संपूर्णाः ॥ ] हे पुत्रि छेकाः संपूर्णाः स्फटिकमणिरिव भवन्ति । कथं तदेव दर्शयति । रक्तेऽनुरक्तजने रक्ताः,

1 G, I, Laber रच्चंति, विरच्चंति, वि रच्चंति
2 I रच्चावंति 3 I रच्चहिं 4 I प्रसृत्यक्षि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ५८. कुट्टिणीसिक्खावज्जा [ कुट्टिनीशिक्षापद्धतिः ]

552) ईसहसियकडक्खणिरिक्खणाइ सिंगारकम्मसिणाइं।
पयाइ पुणो सिक्खसु निरुवमसोहग्गदइयाइं ॥ १ ॥

553) मग्गंती मूलियमूलियाइ मा भमसु घरहरं पुत्ति।
छंदाणुवत्तणं पिययमस्स पयं वसीकरणं ॥ २ ॥

554) भूसणपसाहणाडंबरेहि मा खिवसु[1] पुत्ति अप्पाणं।
रंजिज्जइ जेण जणो अन्न च्चिय ते अलंकारा ॥ ३ ॥

555) अन्नासत्ते वि पिए अहिययरं आयरं कुणिज्जासु।
उद्धच्छि वेयणाइ वि नमंति चरियाइ वि गुणेहिं ॥ ४ ॥

---

कृष्णे दुष्टहृदये कृष्णाः, धवले शुद्धहृदये धवलाः । मणिरप्येवंविधो भवति ॥ ५५१ ॥

552) [ ईषद्धसितकटाक्षनिरीक्षणानि शृङ्गारकर्मसृणानि । एतानि पुनः शिक्षस्व निरुपमसौभाग्यदायकानि ॥ ] हे पुत्रि, ईषद्धसितकटाक्षनिरीक्षणानि शृङ्गारकर्मसृणानि, एतानि पुनः शिक्षस्व निरुपमसौभाग्यदायकानि ॥ ५५२ ॥

553) [ मार्गयमाणा मूलिका मूलिका मा भ्रम गृहगृहं पुत्रि । छन्दानुवर्तनं प्रियतमस्यैतद्वशीकरणम् ॥ ] मार्गयमाणा मूलिका औषधीः, मम भर्ता कथं वश्यो भवतीति, गृहं गृहं मा भ्राम्य हे पुत्रि । छन्दानुवर्तनं प्रियतमस्यैतद्वशीकरणम् । छन्दानुवर्तनम्—" इदं कृष्णं कृष्णं प्रियतम ननु श्वेतमथवा, गमिष्यामो यामो, भवतु गमनेनाथ भवतु " इत्यादि वर्तनम् ॥५५३॥

554) [ भूषणप्रसाधनाडम्बरैर्मा क्षिप पुत्र्यात्मानम् । रज्यते येन जनोऽन्य एव तेऽलङ्काराः ॥ ] भूषणप्रसाधनाडम्बरैर्मा क्षपयात्मानम् । रज्यते येन जनोऽन्य एव तेऽलङ्काराः ॥ ५५४ ॥

555) [ अन्यासक्तेऽपि प्रियेऽधिकतरमादरं कुर्वीथाः । ऊर्ध्वाक्षि वेदना अपि नमन्ति चरिता अपि गुणैः ॥ ] अन्यासक्ते प्रियेऽधिकतरमादरं कुर्वीथाः । ऊर्ध्वाक्षि हे प्रसृताक्षि....दुःखमपि चरित्रगुणैर्नमनशीला भवन्ति ॥ ५५५ ॥

---

1 G, I खवसु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



556) न विणा सब्भावेणं घेप्पइ परमत्थजाणओ लोओ।
को जुण्णमंजरं कंजिएण वेयारिउं तरइ ॥ ५ ॥
557) जेण विणा न वलिज्जइ[1] अणुणिज्जइ सो कयावराहो वि।
पत्ते वि नयरडाहे भण कस्स न वल्लहो अग्गी ॥ ६ ॥
558) अव्वो जाणामि अहं तुम्ह पसाएण चाडुयसयाइं।
एक्कं नवरि न जाणे निण्णेहे[2] रमणपज्झरणं ॥ ७ ॥
559) ताव च्चिय ढलहलया जाव च्चिय नेहपूरियसरीरा।
सिद्धत्था उण छेया नेहविहूणा खलीहुंति ॥ ८ ॥

556) [ न विना सद्भावेन गृह्यते परमार्थज्ञो लोकः । को जीर्णमार्जारं कांजिकेन विकारयितुं शक्नोति ॥ ] हे पुत्रि, परमार्थं जानानो लोको विना सद्भावेन न गृह्यते । कथमेवं ज्ञायत इत्याह । को जीर्णमार्जारं गृहीतुं कांजिकेन प्रतारयितुं शक्नोति ॥ ५५६ ॥

557) [ येन विना न स्थीयतेऽनुनीयते स कृतापराधोऽपि । प्राप्तेऽपि नगरदाहे भण कस्य न वल्लभोऽग्निः ॥ ] येन विना न स्थीयते, अनुनीयते स कृतापराधोऽपि । अमुमर्थमर्थान्तरेण द्रढयति । प्राप्ते नगरदाहे तथापि भण कस्य न वल्लभोऽग्निः । कृतनगरदाहोऽपि पाचनार्थं सर्वकार्यार्थं पुनर्वल्लभ्यते ( अग्निः ) तथा विहितापराधोऽपि प्रेयान् इति ॥ ५५७ ॥

558) [ अहो जानाम्यहं तव प्रसादेन चाटुकशतानि । एकं केवलं न जाने निःस्नेहे रमणप्रक्षरणम् ॥ ] अहो जानाम्यहं युष्मत्प्रसादेन चाटुशतानि । एकं केवलं न जाने निःस्नेहे[3] प्रिये द्रावणम् ॥ ५५८ ॥

559) [ तावदेव मृदुका यावदेव स्नेहपूरितशरीराः । सिद्धार्थाः पुनश्छेकाः स्नेहविहीनाः खलीभवन्ति ॥ ] तावदेव ढलहला मृदुका यावदेव स्नेहपूरितशरीराः । सिद्धार्थाः सर्षपाः पुनः सिद्धार्थाः कृतकृत्याश्च स्नेहविहीनाः खलीभवन्ति । सर्षपाश्च तैलं विना खलीभवन्ति पिण्याकं भवन्तीत्यर्थः ॥ ५५९ ॥

1 B विकिज्जइ ( ? जिविज्जइ = जीविज्जइ )
2 I निन्नेहे 3 I निःस्नेहे प्रियद्रावणम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ५९. वेसावज्जा [ वेश्यापद्धतिः ]

560) अहिणि व्व कुडिलगमणा रोरहरे दीवय व्व निण्णेहा ।
सुकइ व्व अत्थलुद्धा वेसं दट्ठूण वंदामि ॥ १ ॥

561) वण्णड्ढा मुहरसिया नेहविहूणा वि लग्गए कंठं ।
पच्छा करइ वियारं बलहट्टुयसारिसा वेसा ॥ २ ॥

562) सहइ सलोहा घणघायताडणं तह य बाणसंबंधं ।
कुंठि व्व पउरकुडिला वेसा मुद्ठीइ संवहइ ॥ ३ ॥

560) [ अहिरिव कुटिलगमना दरिद्रगृहे दीपक इव निःस्नेहा । सुकविरिवार्थलुब्धा वेश्यां दृष्ट्वा वन्दे ॥ ] वेश्यां दृष्ट्वा वन्दे नमस्करोमि दूरत एव। यतः कीदृशी सा । अहिर्ना सर्पिणी तद्वत् कुटिलगमना वक्रगमनशीला वक्रगतिः । तथा रोरगृहे दरिद्रालये दीपक इव निःस्नेहा । दरिद्रगृहदीपः प्रायेण तैलरहितो भवति । तद्वत् निःस्नेहा प्रेमवर्जिता । तथा अर्थलुब्धा सुकविरिव । यथा सुकविरर्थोऽभिधेयस्तत्र लुब्धः[1] ॥ ५६० ॥

561) [ वर्णाढ्या मुखरसिका स्नेहविहीनापि लगति कण्ठम् । पश्चात् करोति विकारं चणकरोटिकासदृक्षा वेश्या ॥ ] वेश्या बलहट्टुयसारिसा चणकरोटिकासदृक्षा। उभयोः श्लेषमाह। वर्णाढ्या पातच्छविलत्वात्, मुहरसिया मुखे रसिका, " आगच्छ प्राणनाथ मां दासीं किमिति दृशापि न संभावयसि " इति । पक्षे मुखरसिका, भक्ष्यमाणा स्वादुर्भवति । स्नेहविहीनापि लगति कण्ठम् । कृत्रिमप्रेमप्रकटना कण्ठे लगति । चणकपूपलिकापि स्नेहविहीना तैलादिरहिता कण्ठे तालुनि लगति, अतिरूक्षत्वात्तस्याः । पश्चाद् करोति विकारं, निर्द्रव्यं पुरुषं कृत्वा विकारं कुर्वन्ति वेश्याः, निष्कासयन्तीत्यर्थः । रोटिकापक्षे पश्चाद्विकारम् उदराध्मानाजीर्णातिसारादिकं करोति ॥ ५६१ ॥

562) [ सहते सलोभा ( सलोहा ) घनघातताडनं तथा च बाणसंबन्धम् । संदंशिकेव प्रचुरकुटिला वेश्या मुष्ट्या संवहति ॥ ] वेश्या

1 G, I add : तद्वदियमपि अर्थे द्रव्ये लुब्धा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



563) जाओ पियं पियं पइ एक्कं विज्झाइ तं चिय पलित्तं ।
होइ अवरट्ठिओ च्चिय वेसासत्थो तिणग्गि व्व ॥ ४ ॥

564) निम्मलपवित्तहारा बहुलोहा पुलइएण अंगेण ।
खग्गलइ व्व वेसा कोसेण विणा न संवहइ ॥ ५ ॥

565) धणसंचया[1] सुगुज्झा निबद्धलोहा भुयंगमहणिज्जा ।
मंजूसिय व्व वेसा ठाणं चिय लोहवित्तस्स ॥ ६ ॥

मुष्टया संवहति । किंविशिष्टा । सलोहा सलोभा । घनघाततांडनं सहते ।
अत एव कुंठि व्व संदंशिकेव प्रचुरकुटिला मुष्टया संवहति ॥ ५६२ ॥

563) [ यातः प्रियं प्रियं प्रति एकं निर्वापयति तमेव प्रदीप्तम् । भवत्यपरस्थित एव वेश्यासार्थस्तृणाग्निरिव ॥ ] वेश्यासार्थस्तृणाग्निरिव भवति । जाओ पियं पियं पइ । एकं विध्याति, तं वि अपलित्तं तदपि अप्रज्वलितम्[2] अपरस्थितोऽपि तृणाग्निरिव । यथा तृणाग्निरेकं विध्याति प्रदीप्तं सत्, अप्रज्वलिते अपरस्मिन् स्थितो भवति प्रज्वलितत्वात् ॥५६३॥

564) [ निर्मलपवित्रहारा ( °धारा ) बहुलोभा ( °लोहा ) पुलकितेनाङ्गेन । खड्गलतिकेव वेश्या कोशेन विना न संवहति ॥ ] खड्गलतेव वेश्या कोशेन भाण्डागारेण, द्रव्येणेति यावत् । पक्षे कोशः प्रत्याकारः । तेन विना न संवहति, न वशीभवति । किंविशिष्टा । निर्मलपवित्रहारा बहुलोभा पुलकितेनाङ्गेन । खड्गयष्टिरपि कीदृक् । निर्मलपवित्रधारा, बहुलोहा प्रचुरायस्का, पुलकितेन संजातरोमाञ्चेनाङ्गेन । परद्रव्यं दृष्ट्वोत्कण्टकितशरीरा ॥ ५६४ ॥

565) [ धनसंचया सुगुह्या निबद्धलोभा ( निबद्धलोहा ) भुजंगमहनीया । मंजूषिकेव वेश्या स्थानमेव लोभवित्तस्य ( लोहवित्तस्य ) ॥ ] वेश्या मंजूषिकेव । किंविशिष्टा । धनसंचया[3] । पक्षे धनसंचयो यस्याम् । निबद्धलोहा निबद्धलोभा । पक्षे, प्राकृते पूर्वनिपातः, लोहनिबद्धा । भुजंग-

---

1 G, I धणसंचया, 2 G अप्रज्वलितं प्रज्वलति, अपरस्मिन् स्थितो भवति ।
3 G, I घनसंचया । पक्षे घनः संचयो यस्याम् ।

For Private And Personal Use Only

566) न गणेइ रूववंतं न कुलीणं नेय रूवसंपन्नं ।
वेसा वाणरिसरिसा जत्थ फलं तत्थ संकमइ ॥ ७ ॥
567) अन्नन्नरायरसियं आसन्नपओहरं गुणविहूणं ।
ठड्ढं सहाववंकं वेसाहिययं सुरधणु व्व ॥ ८ ॥
568) कवडेण रमंति जणं पियं पयंपंति अत्थलोहेण ।
ताण नमो वेसाणं अप्पा वि न वल्लहो जाण ॥ ९ ॥
569) कुललंछणं अकित्ती अत्थस्स खओ असीलसंवासो ।
गंतुं चिय वेसहरं न जुज्जए पंडियजणस्स ॥ १० ॥

महनीया भिङ्गसेवनीया। पक्षे, भुजंगैर्महनीया। लोभ एव वित्तं, लोभद्रव्यस्य स्थानम्। पक्षे, लोह[1]मेव वित्तं, तस्य स्थानमेव ॥ ५६५ ॥

566) [ न गणयति रूपवन्तं न कुलीनं नैव रूपसंपन्नम् । वेश्या वानरीसदृशी यत्र फलं तत्र संक्रामति ॥ ] वेश्या वानरीसदृशा यत्रैव फलं तत्रैव संक्रामति। कथम्। न गणयति रूपवन्तम्, अरूपं वा, न कुलीनं नैव रूपसंपन्नम् ॥ ५६६ ॥

567) [ अन्यान्यरागरसिकमासन्नपयोधरं गुणविहीनम् । स्तब्धं स्वभाववक्रं वेश्याहृदयं सुरधनुरिव ॥ ] वेश्याहृदयं सुरधनुरिवेन्द्रचापमिव। अधुना श्लेषः। किंविशिष्टम्। अन्यस्मिन्नन्यस्मिन्योऽसौ रागस्तेन रसितं, नानाजनरागि। पक्षे, अन्योऽन्यो योऽसौ रागः पंचवर्णत्वात्। अन्योन्यरागरसितम्। तथा आसन्नौ पयोधरौ स्तनौ यत्र। पक्षे, आसन्नास्तन्निकटवर्तिनः पयोधरा मेघा यत्र तत्। गुणविहीनम्। गुणा ऋजुत्वादयः। पक्षे शिञ्जिनीरहितम्। स्तब्धमुभयमपि। स्वभाववक्रमनृजु ॥ ५६७ ॥

568) [ कपटेन रमयन्ति जनं प्रियं प्रजल्पन्त्यर्थलोभेन । ताभ्यो नमो वेश्याभ्य आत्मापि न वल्लभो यासाम् ॥ ] ताभ्यो वेश्याभ्यो नमो यासामात्मापि न वल्लभः। कोऽर्थः। आत्मानं द्रव्यलोभेन कुष्ठिनेऽप्यर्पयन्ति। कपटेन रमन्ते जनम्। अर्थलोभेन प्रियं प्रजल्पन्ति ॥ ५६८ ॥

569) [ कुललाञ्छनमकीर्तिरर्थस्य क्षयोऽशीलसंवासः । गन्तुमेव वेश्यागृहं न युज्यते पण्डितजनस्य ॥ ] पण्डितजनस्य विद्वल्लोकस्य वेश्यागृहं

---

1 G, I लोभ एव वित्तं तस्य स्थानमेव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



570) संपत्तियाइ काले गमेसु सुलहाइ अप्पमुल्लाए।
देउलवाडयपत्तं तुट्टणसीलं अइमहग्घं॥ ११ ॥

571) वेसाण कवडसयपूरियाण सब्भावणेहरहियाणं।
अत्थरहिओ न रुच्चइ पच्चक्खो कामदेवो वि ॥ १२ ॥

572) अत्थस्स कारणेणं चुंबंति मुहाइ वंकविरसाइं।
अप्पा वि जाण वेसो को ताण परो पिओ होइ ॥ १३ ॥

573) सुपमाणा य सुसुत्ता बहुरूवा तह य कोमला सिसिरे।
कत्तो पुण्णेहि विणा वेसा पडिय व्व संपडइ ॥ १४ ॥

गन्तुमपि न युज्यते, सर्वदोषाविष्करणात् । के के दोषा इत्याह । कुललाञ्छनमकीर्तिरर्थक्षयोऽशीलसंश्रयः ॥ ५६९ ॥

570) [ वाल्या काले गमय सुलभयाल्पमूल्यया । देवकुलवाटकपत्रं त्रुटनशीलमतिमहार्घम् ॥ ] 'हे पुत्रि संपत्रिकया एवं काले गमय । किंविशिष्टा संपत्रिका । सुलभा सुप्रापा । पुनः किंविशिष्टा । अल्पमूल्या । हे पुत्रि देवकुलवाटकपत्रं त्रुटनशीलं त्रुटितत्परम् अतिमहार्घं बहुमूल्यमित्यर्थः ॥ ५७० ॥

571) [ वेश्याभ्यः कपटशतपूरिताभ्यः सद्भावस्नेहरहिताभ्यः । अर्थरहितो न रोचते प्रत्यक्षः कामदेवोऽपि ॥ ] वेश्याभ्यः कपटशतपूरिताभ्यः सद्भावस्नेहरहिताभ्योऽर्थरहितः प्रत्यक्षं कामदेवोऽपि न रुच्यते ( ? रोचते ) । आसां कुरूपः ॥ ५७१ ॥

572) [ अर्थस्य कारणेन चुम्बन्ति मुखानि वक्रविरसानि । आत्मापि यासां द्वेष्यः कस्तासां परः प्रियो भवति ॥ ] अर्थस्य कारणेन चुम्बन्ति मुखानि वक्रविरसानि । यासामात्मापि द्वेष्यः । यद्यात्मा द्वेष्यो न भवेत् तदा कुरूपान् कुष्ठिनोऽपि कथं भजन्ते । आत्मान एव द्वेष्यः । कस्तासां परोऽन्यः प्रियो भवति ॥ ५७२ ॥

573) [ सुप्रमाणा च सुसूत्रा ( सुसुप्ता ) बहुरूपा तथा च कोमला शिशिरे । कुतः पुण्यैर्विना वेश्या पटिकेव संपतति ॥ ] वेश्या पटीव साटिकेव कुतः पुण्यैर्विना शिशिरे संपद्यते । किंविशिष्टा पटी । सुप्रमाणा सुस्थाना नातिदीर्घा नातिकृशा । सुसूत्रा बहुरूपा तथा च कोमला ।

1 G, I omit the whole of the commentary on the gāthā.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



574) कुडिलत्तणं च वंकत्तणं च वंचत्तणं असच्चं च ।
अन्नाण हुंति दोसा वेसाण पुणो अलंकारा ॥ १५ ॥

575) सरसा निहसणसारा गंधड्ढा बहुभुयंगपरिमलिया[1] ।
चंदणलय व्व वेसा भण कस्स न वल्लहा होइ ॥ १६ ॥

576) मा जाणह मह सुहयं वेसाहिययं समम्मणुल्लावं ।
सेवाललित्तपत्थरसरिसं पडणेण जाणिहिसि ॥ १७ ॥

577) एक्कं खायइ मडयं अन्नं च कडक्खरक्खियं धरइ ।
अन्नस्स देइ दिट्ठिं मसाणसिवसारिसा वेसा ॥ १८ ॥

---

साटिकापि सुप्रमाणा, सुसूत्रा, बहुरूपा पीतनीलरक्तकृष्णशुभ्रैर्वर्णैर्वयिता,. कोमला ॥ ५७३ ॥

574) [ कुटिलत्वं च वक्रत्वं च वञ्चकत्वमसत्यं च । अन्येषां भवन्ति दोषा वेश्यानां पुनरलङ्काराः ॥ ] कुटिलत्वं हृदयकौटिल्यं, वक्रत्वं वक्रोक्तिभणनत्वं, वञ्चकत्वं प्रतारणत्वम्, असत्यं च, एते दोषा अन्येषां सामान्यानां लोकानां भवन्ति । वेश्यानां पुनरलङ्कारा मण्डनानि भवन्ति ॥ ५७४ ॥

575) [ सरसा निघर्षणसारा गन्धाढ्या बहुभुजङ्गपरिमृदिता । चन्दनलतेव वेश्या भण कस्य न वल्लभा भवति ॥ ] सरसा निघर्षणसारा गन्धाढ्या बहुभुजङ्गपरिमृदिता चन्दनलतेव वेश्या भण कस्य न वल्लभा भवति । चन्दनलतापि सरसा, निघर्षणसारा, गन्धाढ्या, बहुसर्पवेष्टिता, एवंविधा कस्य न वल्लभा भवति, दाहोपशामकत्वात् तस्याः ॥ ५७५ ॥

576) [ मा जानीत मम सुभगं वेश्याहृदयं समन्मनोल्लापं । शैवाललिप्तप्रस्तरसदृशं पतनेन ज्ञास्यसि ॥ ] मा जानीत मम सुभगं वेश्याहृदयं समन्मनोल्लापम् । शैवाललिप्तपाषाणसदृशं पतनेन ज्ञास्यसि । यथा शैवालबद्धप्रस्तरपतनं दुःखाय संपद्यते, तथा वेश्याहृदयविश्वासः ॥ ५७६ ॥

577) [ एकं खादति मृतकमन्यं च कटाक्षरक्षितं धारयति । अन्यस्य ददाति दृष्टिं श्मशानशिवासदृशी वेश्या ॥ ] वेश्या श्मशानशिवा-

---

1 G बहुभुयंगपरिवरिया ( बहुभुजङ्गपरिवृता )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



578) गहिऊण सयलगंथं मोक्खं झायंति तग्गयमणाओ।
वेसा मुणिसारिच्छा निच्चं चिय कवलियाहत्था ॥ १९ ॥

६०. किविणवज्जा [ कृपणपद्धतिः ]

579) न हु कस्स वि देंति धणं अन्नं दैंतं पि तह निवारेंति।
अत्था किं किविणत्था सत्थावत्था सुयंति व्व ॥ १ ॥

580) निहणंति धणं धरणीयलम्मि इय जाणिऊण किविणजणा।
पायाले गंतव्वं ता गच्छउ अग्गठाणं पि ॥ २ ॥

सदृक्षा, शृगालीतुल्या। कथं, तदेव दर्शयति। एकं मृतकम् आत्मवशीकृतं मृतकप्रायमिव खादति, अनवरतं भक्षयति। अन्यं चाजिगमिषुं व्यसनिनं कटाक्षरक्षितं धारयति, एनमपि ग्रहीष्यामीति। अन्यस्य ददाति दृष्टिम्, अस्य नगरस्थासौ धनी यद्यागच्छति तदात्मवशमानयामीति दृष्टिं ददाति[1], श्वः परश्वः के मृतकं भक्षयिष्यामीति ॥ ५७७ ॥

578) [ गृहीत्वा सकलग्रन्थं मोक्षं ध्यायन्ति तद्गतमनसः। वेश्या मुनिसदृक्षा नित्यमेव कवलित( कपालिका )हस्ताः ॥ ] वेश्या मुनिसदृश्यः। कथं, तदेव दर्शयति। गृहीत्वा सकलग्रन्थमर्थं, मोक्षं तस्माद् व्यसनिनो ध्यायन्ति। किंविशिष्टाः। तद्गतमनसः। पुनः किंविशिष्टाः। नित्यमेव कवलितहस्ताः कवलितुमेव भक्षितुमेव हस्तौ यासां ताः। मुनयोऽप्येवंविधाः। सकलग्रन्थं शास्त्रं गृहीत्वा कण्ठस्थं विधाय, आगमादिकं ज्ञात्वा, मोक्षं शिवं ध्यायन्ति। तद्गतमनसस्तस्मिन्मोक्ष एव गतं मनो येषां ते तथा। नित्यं कपालिकाहस्ताः ॥ ५७८ ॥

579) [ न खलु कस्यापि ददति धनमन्यं ददतमपि तथा निवारयन्ति। अर्थाः किं कृपणस्थाः स्वस्थावस्थाः स्वपन्तीव ॥ ] न खलु कस्यापि ददति धनं,धनं ददानमन्यं निवारयन्ति। अर्थाः किं कृपणस्थाः शास्त्रावस्थाः ( ? स्वस्थावस्थाः ) श्रूयन्ते ( ? स्वपन्ति ) इव ॥ ५७९ ॥

580) [ निखनन्ति धनं धरणीतल इति ज्ञात्वा कृपणजनाः। पाताले गन्तव्यं तद्गच्छत्वग्रस्थानमपि ॥ ] कृपणजना इति ज्ञात्वा धनं धरणीतले

1 G, I add अत एव श्मशानशिवासदृक्षा कृपाजीवा। सापि एकं मृतकं भक्षयति। अन्यच्च कटाक्षनिरीक्षितं बिभर्ति। अन्यस्य च दृष्टिं ददाति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



581) करिणो हरिणहरवियारियस्स दीसंति मोत्तिया कुंभे ।
किविणाण नवरि मरणे पयड च्चिय हुंति भंडारा ॥ ३ ॥

582) परिमुसइ करयलेण वि पेच्छइ अच्छीहि तं सया किविणो ।
आलिहियभित्तिबाउल्लयं व न हु भुंजिउं तरइ ॥ ४ ॥

583) पुच्छिज्जंता नियपरियणेण पयडंति नेय तं अत्थं ।
संतं पि धणं नत्थि त्ति जे भणंति[1] ते महाधीरा ॥ ५ ॥

584) अत्थं धरंति वियला न देंति पूयंति सयलभूयाइं ।
पुण्णक्खएण झिज्जइ न संपया चायभोएण ॥ ६ ॥

निक्षिपन्ति । इति किम् इत्याह । अमीभिः ( ? अस्माभिः ) पाताले गन्तव्यं ततोऽग्रतोऽपि गच्छतु ।। ५८० ।।

581) [ करिणो हरिनखरविदारितस्य दृश्यन्ते मौक्तिकानि कुम्भे । कृपणानां केवलं मरणे प्रकटान्येव भवन्ति भाण्डागाराणि ।। ] हरिनखर-विदारितस्य करिणः कुम्भे मौक्तिकानि दृश्यन्ते । कृपणानां मरणे प्रकटानि भवन्ति भाण्डागाराणि केवलम् ।। ५८१ ।।

582) [ परिमृशति करतलेनापि पश्यत्यक्षिभ्यां तत्सदा कृपणः । आलिखितभित्तिपाञ्चालिकामिव न खलु भोक्तुं शक्नोति ।। ] कृपणस्तद् धनं करतलेन प्रोञ्छति, अक्षिभ्यां पश्यति सदा सर्वदा । आलिखितभित्ति-चित्रपुत्रिकामिव न खलु भोक्तुं प्रभवति ।। ५८२ ।।

583) [ पृच्छ्यमाना निजपरिजनेन प्रकटयन्ति नैव तमर्थम् । सदपि धनं नास्तीति ये भणन्ति ते महाधीराः ।। ] निजपरिजनेन पृच्छ्य-माना अर्थं नैव प्रकटयन्ति । सदपि विद्यमानमपि धनं नास्तीति ये भणन्ति ते महाधीराः कथ्यन्ते । विद्यमानमपि धनमपलपितुं न शक्यत इति भावः ।। ५८३ ।।

584) [ अर्थं धरन्ति विकला न ददति पूजयन्ति सकलभूतानि । पुण्यक्षयेण क्षीयते न संपत् त्यागभोगाभ्याम् ।। ] विकला अर्थं धरन्ति, न ददति, पूजयन्ति भूतानि मम धनं क्वापि मा गच्छत्विति । यतः संपत् पुण्यक्षयेण क्षीयते, न त्यागभोगाभ्याम् ।। ५८४ ।।

1 B, C, G, I, Laber जे भणंता महाधीरा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



585) देमि न कस्स वि जंपइ उद्दारजणस्स विविहरयणाइं।
चाएण विणा वि नरो पुणो वि लच्छीइ पम्मुक्को ॥ ७ ॥

६१. उड्डवज्जा [ कूपखनकपद्धतिः ]

586) छुहइ दढं कुद्दालं अइगमणे आउलं व पेल्लेइ।
विलिहइ दो वि तडीओ आणइ हियपाणियं उड्डो ॥ १ ॥

587) सिरजाणुए[1] निउत्तो उड्डो हत्थेण खणणकुसलेण।
कुद्दालेण य रहियं कह उड्डो आणए उययं ॥ २ ॥

588) निद्दयकुद्दालयमज्झ[2] बहुलुच्छलंतजलसोत्तं।
उड्डो लद्धप्फरिसो मरियं पि न मेल्लए वाविं ॥ ३ ॥

585) [ ददामि न कस्यापि वदति उदारजनस्य विविधरत्नानि। त्यागेन विनापि नरः पुनरपि लक्ष्म्या प्रमुक्तः ॥ ] ददामीति धनं न कस्याप्यग्रत उदारजनस्य निवेदयति। कानि। विविधरत्नानि। त्यागेन विनापि नरः पुनरपि लक्ष्म्या प्रमुक्तः ॥ ५८५ ॥

586) [ क्षिपति दृढं कुद्दालमतिगमन आकुलमिव प्रेरयति। विलिखति द्वे अपि तटयात्रानयति हृदयेप्सितपानीयं खनकः ॥ ] उड्डो तडागखनकः। दृढं यथा स्यात् तथा कुद्दालं कुशीं भूमौ प्रक्षिपति। अतिगमन आकुलमिव प्रेरयति। विलिखति द्वे अपि तटयौ, आनयति हृदयेप्सितं पानीयम्। यथा कामी साधनं विनिक्षिप्य द्वे तटयौ भगस्य विलिख्य, हृदयेप्सितं पानीयमानयति द्रावयतीत्यर्थः ॥ ५८६ ॥

587) [ शिरोजानुके नियुक्तः खनको हस्तेन खननकुशलेन। कुद्दालेन च रहितं कथं खनक आनयत्युदकम् ॥ ] कथम् उड्डः आनयति उदकम्। किंविशिष्टः। शिरोजानुके नियुक्तः। हस्तेन खननकुशलेन, कुद्दालेन रहितम् ॥ ५८७ ॥

588) [ निर्दयकुद्दालकमध्यबहुलोच्छलज्जलस्रोतसम्। खनको लब्धस्पर्शो मृतामपि न त्यजति वापीम् ॥ ] उड्डो लब्धस्पर्शो मृतामपि वापीं न त्यजति, पुनश्चिखनियति। किंविशिष्टां वापीम्। निर्दयकुद्दालकम[3]ध्यबहुलो-

1 G, I सिरि जाणुए 2 G, I Laber कुद्दालयहत्थमज्झ
3 I निर्दयकुद्दालहस्तकमध्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



589) कुद्दालघायघणताडणेण पज्झरइ वसुह न हु चोज्जं।
सो उड्डो जस्स वि दंसणेण वडवा जलं देइ ॥ ४ ॥

६२. कण्हवज्जा [ कृष्णपद्धतिः ]

590) 'कुसलं राहे' 'सुहिओ सि कंस' 'कंसो कहिं' 'कहिं राहा'।
इय बालियाइ भणिए विलक्खहसिरं हरिं नमह ॥ १ ॥

591) तं नमह जस्स गोट्ठे मयणाणलताविआउ गोवीओ।
पायडकंठग्गहमग्गिरीउ रिट्ठं पसंसंति ॥ २ ॥

---

च्छलज्जलस्रोतसम्। यथा कश्चन कामुको लब्धसुखो निर्दयालिङ्गनबहुलो-च्छलद्रेतसं नारीं द्रवीभूतामपि पुनरालिङ्गति ॥ ५८८ ॥

589) [ कुद्दालघातघनताडनेन प्रक्षरति वसुधा न खल्वाश्चर्यम्। स खनको यस्य दर्शनेन वडवा जलं ददाति ॥ ] वसुधा पृथ्वी कुद्दालघातघन-ताडनेन यत् प्रक्षरति, तन्न खल्वाश्चर्यकारि। स उड्डो यस्य दर्शनेनैव वडवा जलं ददाति। अयमर्थः। नारी द्वादशांगुलिप्रमाणलिंगदृढघातेन यत् प्रस्रवति तन्नाश्चर्यकारि। यस्य दर्शनेनैव द्रवति स कामुकः कुशलः ॥ ५८९ ॥

590) [ 'कुशलं राधे' 'सुखितोऽसि कंस' 'कंसः क्व' 'क्व राधा'। इति बालिकया भणिते विलक्षहसनशीलं हरिं नमत ॥ ] कुशलं राधे, सुखितोऽसि कंस, कंसः क्वात्र, क्वात्र राधा। इति बालिकया भणिते विलक्षहसनशीलं हरिं नमत। अयमर्थः। कयाचन इति गोत्रस्खलिते हरि-रुक्तिप्रत्युक्तिकया एवमुच्यते स्म। हरिः कांचन गोपबालिकां राधानाम्ना-लपति स्म। 'कुशलं राधे'। तर्हि सा क्रोधाविष्टा 'सुखितोऽसि कंस' इति हरिं प्रत्यवादीत्। ततो भगवान् सचमत्कारं परावृत्य 'कंसः क्वात्र' इति पप्रच्छ। ततः सा, 'राधिकापि क्वात्र' इति प्रत्युत्तरमदादिति ॥५९०॥

591) [ तं नमत यस्य गोष्ठे मदनानलतापिता गोप्यः। प्रकट-कण्ठग्रहमार्गणशीला अरिष्टं प्रशंसन्ति ॥ ] तं नमत हरिं, यस्य हरेर्गोष्ठे मदनानलतापिता गोप्योऽरिष्टं वृषभासुरं प्रशंसन्ति। यतः प्रकटकण्ठग्रहण-

For Private And Personal Use Only

592) कण्हो जयइ जुवाणो राहा उम्मत्तजोव्वणा जयइ।
जउणा बहुलतरंगा ते दियहा तेत्तिय¹ च्चेव॥ ३॥

593) तिहुयणणमिओ वि हरी निवडइ गोवालियाइ चलणेसु।
सच्चं चिय नेहणिरंधलेहि दोसा न दीसंति॥ ४॥

594) कण्हो कण्हो निसि चंदवज्जिया निविडवेडिसा जउणा।
भमरी होहिसि जइ, लहसि पुत्ति वयणस्स गंधेण॥ ५॥

---

मार्गणशीलाः। धन्योऽसि वृषभराज यदागमनव्याकुलतयामुष्य सुभगयुवावतंसस्य हरेः सकलजनप्रत्यक्षमेव गाढकण्ठग्रहम् अलप्स्महि॥ ५९१॥

592) [ कृष्णो जयति युवा राधोन्मत्तयौवना जयति। यमुना बहुलतरङ्गा ते दिवसास्तावन्त एव॥ ] कृष्णो जयति युवा, राधोन्मत्तयौवना जयति। यमुना बहुलतरङ्गा ते दिवसास्त एवाभूवन्। कोऽर्थः। कृष्णः कपाटवक्षाः पुरार्गलादीर्घभुजः कमलदलनेत्रः। राधिकापि चम्पककलिकागौराङ्गी, कठिनकुचयुगलनिरुद्धवक्षःस्थला, कमलमृणालबाहुयष्टिर्मुखचन्द्रचन्द्रिकामयादिव लग्नतमोनिकुरुंबकेशपाशा। द्वावप्येतौ यमुनायां चिरं चिक्रीडतुर्येषु दिवसेषु ते तादृशा दिवसा²स्तदानीमभूवन्न तु इदानीमिति॥ ५९२॥

593) [ त्रिभुवननमितोऽपि हरिर्निपतति गोपालिकायाश्चरणयोः। सत्यमेव स्नेहान्धैर्दोषा न दृश्यन्ते॥ ] त्रिभुवननमितो हरिर्निपतति गोपालिकायाश्चरणयोः। अहो आश्चर्यम्। अथवा सत्यमेव स्नेहान्धैर्दोषा न दृश्यन्ते। हरिस्त्रिभुवननतोऽपि "अहं किमिति नीचगोपालिकाचरणयोर्निपतामि" इति जानानोऽपि स्नेहपाशयन्त्रितः पतत्येव॥ ५९३॥

594) [ कृष्णः कृष्णो निशा चन्द्रवर्जिता निबिडवेतसा यमुना। भ्रमरी भविष्यसि यदि, लभसे पुत्रि वदनस्य गन्धेन॥ ] काचन गोप्यम्बा कस्याश्चित् कृष्णविरहार्दिताङ्गया गोप्या अग्रे कृष्णलाभोपायं निवेदयति। कृष्णस्तावत्कृष्णस्तापिच्छच्छविः। निशा च चन्द्रवर्जिता। स्वभावत एव

1 G, I तेत्तिओ च्चेय ( तत्तिय च्चेव )  2 G, I ते दिवसास्तादृशा एवाभूवन्। न तु इदानीं सन्ति।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



595) केसिवियारणरुहिरुल्लकुप्परुग्घसणलंछणग्घवियं ।
न मुयइ कण्ह जुण्णं पि कंचुयं अज्ज वि विसाहा ॥ ६ ॥

596) राहाइ कवोलतलुच्छलंतजोण्हाणिवायधवलंगो ।
रइरहसवावडाए धवलो आलिंगिओ कण्हो ॥ ७ ॥

---

तावज्जनार्दनो भिन्नाञ्जनचयोपमः, तत्रापि सूचिभेद्यान्धकारप्राग्भारभरिता रात्रिः । अपरं च । यदि पन्थास्त्रुटितो[1] भवेत् तदा भगवान् प्राप्यत एवेत्याह — निबिडवेतसा यमुना । सा च कालकाया कालजला कालियव्यालकुलं यमुना निरन्तरतरणिनिरुद्धसरणिः । अत एवाह । हे पुत्रि भ्रमरी भव यदि वदनगन्धेन — भगवतः किल वदनोच्छ्वासः कमलकिञ्जल्कपुञ्जसब्रह्मचारी वर्तते — तेन वदनगन्धेन यदि निजचित्तचौरं तम् उभयपाप्यनञ्जनकं प्राप्नोषीति ॥ ५९४ ॥

595) [ केशिविदारणरुधिरार्द्रकूर्परोद्घर्षणलाञ्छनार्घितम । न मुञ्चति कृष्ण जीर्णमपि कञ्चुकमद्यापि विशाखा ॥ ] हे कृष्ण । विशाखा गोपीभेदः । जीर्णमपि कञ्चुकमद्यापि न त्यजति । अमोचने कारणमाह । केशिनस्तुरंगदानवस्य यद्विदारणं, तेन यद्रुधिरं, तेनार्द्रो योऽसौ कूर्परः — 'कुहणी' इति लोके — तस्योद्घर्षणेन यल्लाञ्छनं, तेनार्घितम् । केशिदानवमारणरुधिरार्द्रकूर्परलाञ्छनार्घितम् । दानवरुधिराक्तकूर्परगाढालिङ्गनजनितलाञ्छनं कञ्चुकमद्यापि न त्यजति विशाखा । एतेन दानवारेर्नारायणस्य सुभटप्रकाण्डस्य वल्लभास्मीति गर्वायते स्म ॥ ५९५ ॥

596) [ राधया कपोलतलोच्छलज्ज्योत्स्नानिपातधवलाङ्गः । रतिरभसव्यापृतया धवल आलिङ्गितः कृष्णः ॥ ] कयाचिद् गोप्या रतिरभसव्यापृतया कृष्णोऽपि धवल आलिङ्गितः । किंविशिष्टः । राधायाः कपोलतलोच्छलज्ज्योत्स्नानिपातधवलाङ्गः । एतेन राधाकपोलतलयोश्चाकचक्यं वर्ण्यते स्म ॥ ५९६ ॥

---

1 G, I यदि पन्थाः स्फुटितो ( uneven, full of ups and downs ) भवेत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



597) धवलं धवलच्छीए महुरं महुराउरीइ मज्झम्मि।
तक्कं विक्कंतीए कण्हो कण्हो त्ति वाहरिओ ॥ ८ ॥
598) सच्चं चेय भुयंगी विसाहिया कण्ह तण्हहा होइ।
संते वि विणयतणए जीए घुम्माविओ तं सि ॥ ९ ॥
599) केसव पुराणपुरिसो सच्चं चिय तं सि जं जणो भणइ।
जेणं विसाहियाए भमसि सया हत्थलग्गाए ॥ १० ॥

597) [ धवलं धवलाक्ष्या मधुरं मथुरापुर्यां मध्ये। तक्रं विक्रीणत्या कृष्णः कृष्ण इति व्याहृतम् ॥ ] कयाचिद्धवलाक्ष्या[1] मधुरं यथा स्यात् तथा मथुरापुर्या मध्ये धवलं श्वेतं तक्रं मथितं विक्रीणानया कृष्णः कृष्ण इति व्याहृतम्। एतेन किमुक्तं भवति। भगवति गतचित्ता धवलमपि तक्रं कृष्णमिति भगवतो नाम गृह्णाति स्मेति ॥ ५९७ ॥

598) [ सत्यमेव भुजङ्गी विशाखा कृष्ण तृष्णका भवति। सत्यपि विनतातनये यया घूर्णितस्त्वमसि ॥ ] हे कृष्ण[2], एव निश्चयेन विशाखा– तव कलत्रं – सत्यं भुजङ्गी। किंविशिष्टा। विषाधिका। विषेणाधिका विषाधिका। सत्यं भुजङ्गीति को भावः। भुजङ्गीति प्रोक्तेन सिद्धं सत्यमे- तद् रहस्यम्। यया त्वं सर्वदापि घूर्णितोऽसि। किंविशिष्टस्त्वम्। स्वाधीन- विनतातनयः। विनतायास्तनयो विनतातनयो वैनतेयो गरुडः। यस्य भगवतो वाहनं गरुडस्तस्य भुजङ्गी किं करोति। यस्य नामसंकीर्तनेनैव कुलनागा प्रधनं ( निधनं ) प्रयान्ति, तस्मिन् गरुडे वाहने विद्यमानेऽपि सा विशाखा भुजङ्गी भगवन्तं त्वां घूर्णयति। तदा सा विशाखा नाम तव कलत्रं कथं सत्यं भुजङ्गी न। अत एव सत्यं भुजङ्गी ॥ ५९८ ॥

599) [ केशव पुराणपुरुषः सत्यमेव त्वमसि यज्जनो भणति। येन विशाखया भ्रमसि सदा हस्तलग्नया ॥ ] हे केशव[3] हे वासुदेव जनो

---

1 G, I धवलाक्ष्या 2 G, I present the following abridged version of the commentary हे कृष्ण सत्यं विशाखा भुजंगी एव सर्पिण्येव, विलासिन्येव। यया विनतातनये गरुडे सत्यपि त्वं घूर्णापितोऽसि। 3 The commentary on this gāthā runs as follows in B, G, I हे केशव सत्यमेव त्वं पुराणपुरुषोऽसि यज्जनो भणति। येन हेतुना भ्राम्यसि सदा हस्तलग्नया विशाखया यष्ट्या, अथ च विशाखया गोपीभेदेन सदा हस्तलग्नया परिभ्रमसि। एतेन कंसारातिर्निमेषान्तरमपि विशाखां गोपीं न परित्यजति, अतिवाल्लभ्यात् तस्या इत्यर्थः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



600) किसिओ सि कीस केसव किं न कओ धन्नसंगहो मूढ ।
कत्तो मणपरिओसो विसाहियं भुंजमाणस्स ॥ ११ ॥

601) विहडउ मंडलिबंधो भज्जउ रासो न मुच्चए कण्ह ।
नवसियसएहि लद्धो तुह हत्थो मज्झ हत्थेण ॥ १२ ॥

602) कण्हो देवो देवा वि पत्थरा सुयणु निम्मविज्जंति ।
अंसूहि न मउइज्जंति पत्थरा किं व रुण्णेण ॥ १३ ॥

लोक इति भणति । इनीति किम् । अयं पुराणपुरुषः डोल्लकरः ( ? ), तत्सत्यमेव त्वं पुराणपुरुषः । येन कारणेन विशाखया यष्ट्या हस्तलग्नया परिभ्रमसि । ये पुराणपुरुषा भवन्ति, ते यष्टिमवलम्ब्य परिभ्रमन्तीति भावः ॥ ५९९ ॥

600) [ कशितोऽसि कस्मात्केशव किं न कृतो धन्यासंग्रहो (धान्यसंग्रहो) मूढ । कुतो मनःपरितोषो विशाखिकां (विषाधिकं) भुञ्जानस्य ॥ ] हे मूढ मूर्ख केशव किमिति कृशोऽसि । किं न कृतो धान्यसंग्रहः । कुतो मनःपरितोषो विसाधितं भुञ्जानस्य । पक्षे । किमिति कृशोऽसि । किं न कृतो धन्यानां संग्रहः । विशाखिकां गोपीमुपभुञ्जानस्य कुतो मनःपरितोषः । रूप्यं वस्तु यथा यथा भुज्यते तथा तथा तृष्णा वर्धतेतराम् । यो नित्यं विसाधयति[1] तस्य कुतो मनःपरितोषः ॥६००॥

601) त्रिघटतां मण्डलीबन्धो भज्यतां रासो न मुच्यते कृष्ण । उपयाचितकशतैर्लब्धस्तव हस्तो मम हस्तेन ॥ ] काचिद् गोपी कथयति । हे कृष्ण मण्डलीबन्धो विघटतु । रासो भज्यताम् । न मुच्यते तव हस्तो मम हस्तेन नवसियसएहि लद्धो । पूर्णे मनोरथे यद् देवेभ्यो दीयते तत् नवसितम् । नवसितानां शतेन लब्धो मम हस्तेन तव हस्तः । परितुष्ट-देवाद् वरसहस्रेण प्राप्तं हस्तं तावकीनं न मुञ्चामीति ॥ ६०१ ॥

602) [ कृष्णो देवो देवा अपि प्रस्तराः सुतनु निर्माप्यन्ते । अश्रुभिर्न मृदूक्रियन्ते प्रस्तराः किं वा रुदितेन ॥ ] काचिद्गोपी खण्डिता मानमवलम्ब्य सुचिरं रुदती कयाचन सख्यैवमुच्यते । हे सुतनु कृष्णो देवः कथ्यते । देवाश्च प्रस्तरा निर्मीयन्ते । अत एवाश्रुभिर्न मृदूभवन्ति प्रस्तराः ।

1 G विशोधयति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



603) महुरारज्जे वि हरी न मुयइ गोवालियाण तं पेम्मं ।
खंडंति न सप्पुरिसा पणयपरूढाइं पेम्माइं ॥ १४ ॥

604) सच्चं चिय चवइ जणो अमुणियपरमत्थ नंदगोवालो ।
थणजीवणो सि केसव आभीरो नत्थि संदेहो ॥ १५ ॥

605) संभरसि कण्ह कालिंदिमज्जणे मह कडिल्लपंगुरणं ।
एण्हिं महुरारज्जे आलवणस्सावि संदेहो ॥ १६ ॥

### ६२. रुद्दवज्जा [ रुद्रपद्धतिः ]

606) रइकलहकुवियगोरीचलणाहयणिवडिए जडाजूडे ।
निवडंतचंदरुंभणविलोलहत्थं हरं नमह ॥ १ ॥

---

किं वा रुदितेन। पाषाणसदृशहृदयोऽयं न तत्र रोदनैर्मृदुहृदयो भवति ॥ ६०२ ॥

603) [ मथुराराज्येऽपि हरिर्न मुञ्चति गोपालिकानां तत्प्रेम। खण्डयन्ति न सत्पुरुषाः प्रणयप्ररूढानि प्रेमाणि ॥ ] हरिर्गोपालिकानां तत् प्रेम न मुञ्चति। क्व। मथुराराज्ये प्राप्ते। युक्तोऽयमर्थः। ये सत्पुरुषास्ते प्रणयप्ररूढानि प्रेमाणि न खण्डयन्ति ॥ ६०३ ॥

604) [ सत्यमेव वदति जनोऽज्ञातपरमार्थो नन्दगोपालः। स्तन्य-जीवनोऽसि केशवाभीरो नास्ति संदेहः ॥ ] ॥ ६०४ ॥

605) [ संस्मरसि कृष्ण कालिन्दीमज्जने मम कटीवस्त्रप्रावरणम्। इदानीं मथुराराज्य आलपनस्यापि संदेहः ॥ ] काचन बाल्यक्रीडासखी गोपी कृष्णमुपालभते। हे कृष्ण कालिन्दीमज्जने यमुनाजलक्रीडायां मद्वस्त्रपरि-धानं, यत् त्वया भ्रमेण मद्वस्त्रं परिहितम्। (तत् स्मरसि किम्।) इदानीं मथुराराज्ये त्वया प्राप्ते सति, आलपनस्यापि संदेहः ॥ ६०५ ॥

606) [ रतिकलहकुपितगौरीचरणाहतनिपतिते जटाजूटे। निपत-च्चन्द्ररोधनविलोलहस्तं हरं नमत ॥] रतिकलहकुपितगौरीचरणाहतनिपतिते[1] जटाजूटे, अत एव निपतच्चन्द्रधारणविलोलहस्तं हरं नमत ॥ ६०६ ॥

---

1 I °चरणाहतिनिपतिते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



607) परिहासवासछोडणकरकिसलयरुद्धणयणजुयलस्स।
रुद्दस्स तइयणयणं पव्वइपरिचुंबियं जयइ ॥ २ ॥

608) संझासमए परिकुवियगोरियामुद्दविहडणं विउलं।
अद्धुम्मिल्लपलोयंत¹लोयणं तं हरं नमह ॥ ३ ॥

609) चंदाहयपडिबिंबाइ² जाइ मुक्कट्टहासभीयाए।
गोरीइ माणविहडणघडंतदेहं हरं नमह ॥ ४ ॥

610) नमिऊण गोरिवयणस्स पल्लवं ललियकमलसरभमरं।
कयरइमयरंदकलं ललियमुहं तं हरं नमह ॥ ५ ॥

607) [ परिहासवासोमोचनकरकिसलयरुद्धनयनयुगलस्य। रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥ ] रुद्रस्य तृतीयं नयनं जयति सर्वोत्कर्षेण वर्तते। किंविशिष्टम्। पव्वइपरिचुंबियं पार्वत्या परिचुम्बितं परि समन्ततोभावेन चुम्बितम्। चुम्बने कारणमाह। परिहासेन खेलनेन यद् वासश्छोटनं तस्मात् कारणात् करकिसलयाभ्यां रुद्धं नयनयुगलं यस्य रुद्रस्य। अयमर्थः। खेलया गौर्यूरुमूलनितम्बबिम्बकुचयुगलादिदिदृक्षुरीश्वरो वसनग्रन्थिच्छोटनमकार्षीत्। तस्मिन् कृते ममाङ्गयष्टिं मासौ पश्यत्विरयबलात्वादन्यत् कर्तुमपारयन्ती तस्यैव नयनयुगलं पाणिनलिनयुगलेन पिदधे। पश्चादेवं कृतेऽपि तार्तीयललाटलोचनेन मां द्रक्ष्यतीत्युपायान्तरमपश्यन्ती तन्नयनम् अचिम्बतेति³ ( ? ) ॥ ६०७ ॥

608) [ सन्ध्यासमये परिकुपितगौरीमुद्राविघटनं विपुलम्। अर्धोन्मीलप्रलोकयल्लोचनं तं हरं नमत ॥ ] ॥ ६०८ ॥

609) [ चन्द्राहतप्रतिबिम्बाया यस्या मुक्ताट्टहासभीतायाः। गौर्या मानविघटनघटमानदेहं हरं नमत ॥ ] हे लोका हरं नमत। किंविशिष्टं हरम्। मानविघटनघटमानदेहम्। कस्याः। गौर्याः। किंविशिष्टायाः। मुक्ताट्टहासभीतायाः। चन्द्राहतप्रतिबिम्बाया⁴ यस्याः ॥ ६०९ ॥

610) [ नत्वा गौरीवदनस्य पल्लवं ललितकमलसरोभ्रमरम्। कृतरतिमकरन्दकलं ललितमुखं तं हरं नमत ॥ ] ललितमुखं तं हरं नमत।

1 G पुलोयंत 2 G चंदाहयपडिबिंबाए 3 G अनिस्तेति
4 G चन्द्राहतप्रतिबिम्बाया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ६४. हियालीवज्जा [ हृदयवतीपद्धतिः ]

611) विवरीयरया लच्छी बंभं दट्ठूण नाहिकमलत्थं।
हरिणो दाहिणणयणं रसाउला कीस झंपेइ ॥ १ ॥

612) ढक्कसि हत्थेण मुहं जं जंपसि अणिमिसं पलोयंतो।
हसिरं च वहसि वयणं तुह नाह न निव्वुया दिट्ठी ॥ २ ॥

613) जइ सा सहीहिं भणिया तुज्झ मुहं पुण्णचंदसारिच्छं।
ता कीस मुद्धमुही करेण गंडत्थलं पुसइ[1] ॥ ३ ॥

---

किंविशिष्टम्। कृतरतिमकरन्दकलम्। नत्वा गौरीवदनस्य (पल्लवं) ललित-कमलसरोभ्रमरम् ॥ ६१० ॥

611) [ विपरीतरता लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम्। हरेर्दक्षिणनयनं रसाकुला कस्मात्पिदधाति ॥ ] विपरीतरता लक्ष्मीर्नाभिकमलस्थितं ब्रह्माणं दृष्ट्वा हरेर्नारायणस्यैव दक्षिणं नयनं रसाकुला सती कथं पिदधाति। इदमुत्तरमत्र कथयन्ति पूर्वविदः। लक्ष्मीः किल कामार्ता ब्रह्माणमपि नाभिकमलस्थितं दृष्ट्वा सुरतसुखं त्यक्तुमपारयन्ती लज्जामज्जद्वदनकमला कथमसौ परमेष्ठी मामेवंकुर्वाणां द्रक्ष्यतीति चिन्ताचान्तचित्ता, "हुँ ज्ञातम्, अस्य भगवतो नयनद्वयी किल सूर्याचन्द्रमसौ। तर्हि यत्र सूर्यस्तत्र कमलं विकसति, तस्मिंश्चास्तमयमाने पयोजमपि संकुचति। अतो नाभिपायोरुहं नारायणदक्षिणनयनसूर्याच्छादनेन संकुचेदिति[2] (दक्षिण) नयनं पिदधे भगवत्युदधिजेति ॥ ६११ ॥

612) [ छादयसि हस्तेन मुखं यज्जल्पस्यनिमिषं प्रलोकयन्। हसनशीलं च वहसि वदनं तव नाथ न निर्वृता दृष्टिः ॥ ] पिदधासि यद् हस्तेन मुखम्, अनिमिषं प्रलोकयन् यज्जल्पसि, हसनशीलं यद्वदनं वहसि, हे नाथ तव न निर्वृता दृष्टिः। एतावता सापराधो भवानिति ॥ ६१२ ॥

613) [ यदि सा सखीभिर्भणिता तव मुखं पूर्णचन्द्रसदृक्षम्। तत् कस्मान्मुग्धमुखी करेण गण्डस्थलं प्रोञ्छति ॥ ] यदि सा सखीभिरेवं भणिता। कथम्। हे सखि तव मुखं पूर्णिमाचन्द्रसदृक्षम्। इदानीं ततः

---

1 G, I फुसइ  2 G संकुचत्विति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



614) अच्छीहि पइं सिहिणेहि दियवरं गुरुयणं नियंबेण ।
तिन्नि वि जूरेइ वहू न याणिमो केण कज्जेण ॥ ४ ॥

615) जइ सा पइणा भणिया तिलयं विरएमि अत्तणो(? अत्तणा)तुज्झ ।
ता कीस मुद्धडमुद्धी हसिऊण परम्मुही ठाइ ॥ ५ ॥

616) हियए रोसुग्गिण्णं पायपहारं सिरम्मि पत्थंतो ।
तह उ त्ति पिओ माणंसिणीइ थोरंसुअं रुण्णं ॥ ६ ॥

किमिति सा मुग्धमुखी स्वकरेण गण्डस्थलमुत्पुंसयति । इदमुत्तरम् । मम मुखं तावत् केतकीकर्पूरधूलिधवलं, पूर्णिमाचन्द्रश्च मृगलक्ष्मदूषितः । ततो मम गण्डस्थले कुतस्त्यं कज्जलं लगितं, यन्मुखमृगाङ्कलक्ष्मणानुमिमीत इयमिति ॥ ६१२ ॥

614) [ अक्षिभ्यां पतिं स्तनाभ्यां द्विजवरं गुरुजनं नितम्बेन । त्रीण्यपि निन्दति वधूर्न जानीमः केन कार्येण ॥ ] अक्षिभ्यां पतिं, स्तनाभ्यां द्विजवरं, गुरुजनं श्वशुरादिं नितम्बेन, त्रीण्यपि जूरेइ निन्दतीति यावद् वधूः, तदयं न जानीमः केन कार्येणेति । आभ्यां स्तनाभ्यां निरुद्धत्वाद् हृदयस्य, अमुष्य ब्राह्मणस्य नमस्कारसूचकं मम शिरोनमनं न भवतीति किमित्यागादसावितिं । अमुना नितम्बेन दुर्वहेण मम त्वरितं गमनं न संगच्छते, श्वशुरादेः स्पर्शः कथं रक्षितव्य इति ॥ ६१४ ॥

615) [ यदि सा पत्या भणिता तिलकं विरचयाम्यात्मनस्तव ( विरचयाम्यात्मना तव )। तत् कस्मान्मुग्धमुखी हसित्वा पराङ्मुखी तिष्ठति ॥ ] यदि सा पत्या भणिता । इति किम् ( किमिति )। आत्मनस्तव तिलकं विरचयामि, ततः सा मुग्धमुखी किमिति हसित्वा पराङ्मुखी भवति । इदमुत्तरम् । पतिस्तस्यास्तिलककरणव्याजेन मुखं चुचुम्बिषति । सा च "अहमिदानीमृतुमत्यस्मि, पश्य रुधिराक्तं मम वासः" इति पराङ्मुखीभूय दर्शनम् ॥ ६१५ ॥

616) [ हृदये रोषोद्गीर्णं पादप्रहारं शिरसि प्रार्थयमानः । तथैवेति प्रियो मनस्विन्या स्थूलाश्रुकं रुदितम् ॥ ] हृदये रोषोद्गीर्णं रोषादुत्थापितं पादप्रहारं भर्ता शिरसि प्रार्थयमानः, तथैव, यथा मम मनसि शङ्काभूत् तथैव, नान्यथेति स्थूलाश्रु यथा स्यादेवं रुदितम् । अयं भावः । अस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



617) तं दट्ठूण जुवाणं परियणमज्झम्मि पोढमहिलाए ।
उप्फुल्लदलं कमलं करेण मउलावियं कीस ॥ ७ ॥
618) हंतूण वरगइंदं वाहो एक्केण नवरि बाणेण ।
धुवइ सरं पियइ जलं तं जाणह केण कज्जेण ॥ ८ ॥
619) कुंकुमकयंगरायं पडिहत्थपओहरी कुरंगच्छी ।
सयणम्मि नाहगूहइ रमणं भण केण कज्जेण ॥ ९ ॥

हृदयेऽन्या निवसति, तस्याः पादप्रहारमसौ सहिष्यते नो वेति, यावदुत्थापयति प्रहर्तुं पादं तावच्छिरसि प्रत्यैच्छत् । ततस्तथेति नान्यथा मम शङ्का । इतः परं किं करोमीति स्थूलाश्रुभी रुरोद । यतः, रुदितमुचितमस्त्रं योषितां विग्रहेषु ॥ ६१६ ॥

617) [ तं दृष्ट्वा युवानं परिजनमध्ये प्रौढमहिलया । उत्फुल्लदलं कमलं करेण मुकुलीकृतं कस्मात् ॥ ] प्रौढयुवत्या परिजनमध्ये तं लोकोत्तरं युवानं दृष्ट्वा, उत्फुल्लदलं कमलं करेण मुकुलीकृतं कुतः कारणात् । भावोऽयम् । परिजनमध्यस्थितं पूर्वमेव याचितसुरतं वल्लभमवलोक्य कथं प्रत्युत्तरयामीति करेण कलितं लीलानलिनं मुकुलयामास । सूर्यास्तमनेऽमूनि मुकुलीभविष्यन्ति, ततः परं त्वया समागन्तव्यम् इति कमलमुकुलने हेतुः ॥ ६१७ ॥

618) [ हत्वा वरगजेन्द्रं व्याध एकेन केवलं बाणेन । धावति शरं पिबति जलं तज्जानीत केन कार्येण ॥ ] व्याध एकेनैव बाणेन वरगजेन्द्रं हत्वा शरं धावति, जलं[1] च पिबति, तज्जानीत केन कार्येण । अयं भावः । एकेनैव बाणेन वरगजेन्द्रहनने मम शक्तिरस्ति । मा जानातु कोऽपि विषाक्तेन शरेणामुं मत्तहस्तिनं जघानेति । शरप्रक्षालनपिबनं ( ? शरप्रक्षालनजलपानं ) प्रत्ययाय[2], विषाक्तशरजले पीते ममैवापि मृत्युर्भवतीति ॥६१८॥

619) [ कुङ्कुमकृताङ्गरागं परिपूर्णपयोधरा कुरङ्गाक्षी । शयने नावगूहति रमणं भण केन कार्येण ॥ ] कुंकुमकृताङ्गरागं रमणं शयने नावगूहति कुंभिकुंभपयोधरा कुरङ्गाक्षी, तद्भण केन कार्येण । कुंकुमरागोऽप्यङ्गस्पर्शसुखान्तराय आवयोर्मा भूदिति ॥ ६१९ ॥

1 I तज्जलम् , 2 I शरप्रक्षालनमपि जनप्रत्ययाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



620) सालत्तयं पयं ऊरुएसु तह कज्जलं च चलणेसु ।
पट्टीइ तिलयमालं वहंत कह से रयं पत्तो ॥ १० ॥

621) अहिणवपेम्मसमागमजोव्वणरिद्धीवसंतमासम्मि ।
पवसंतस्स वि पइणो भण कीस पलोइयं सीसं ॥ ११ ॥

622) जइ देवरेण भणिया खग्गं घेत्तूण राउले वच्च ।
ता कीस मुद्धमुही हसिऊण पलोअए सेज्जं ॥ १२ ॥

623) जइ सासुयाइ भणिया पियवसहिं पुत्ति दीवयं देहि ।
ता कीस मुद्धमुही हसिऊण पलोयए हिययं ॥ १३ ॥

---

620) [ सालक्तकं पदमूर्वोस्तथा कज्जलं च चरणयोः । पृष्ठे तिलकमालां वहन् कथं तस्या रतं प्राप्तः ॥ ] सालक्तकं पदं चरणविक्षेप-मूर्वोर्वहन् , तथा कज्जलं च चरणयोः, पृष्ठयां तिलकमालां वहंस्तस्या रतं सुरतं कथं प्राप्तोऽसि । एतेन तस्याः सर्वबन्धवेत्तृत्वं व्यज्यते ॥ ६२० ॥

621) [ अभिनवप्रेमसमागमयौवनर्द्धिवसन्तमासे । प्रवसतोऽपि पत्युर्भण कस्मात् प्रलोकितं शीर्षम् ॥ ] अभिनवप्रेमसमागमे यौवनर्द्धौ वसन्तमासे, एषु सत्सु प्रवसतः प्रियस्य तया प्रलोकितं शिर इति कुतो भण । उच्यते । अभिनवप्रेमसमागमो द्वयोरपि यौवनर्द्धिर्वसन्तमासे सति कथमसौ वृषभो न, यदेवंविधां मां परित्यज्य याति देशान्तरमिति शृंगे अस्य शिरसि स्तो नो वा, इति शिरोऽवलोकनम् ॥ ६२१ ॥

622) [ यदि देवरेण भणिता, खड्गं गृहीत्वा राजकुले व्रज । तत् कस्मान्मुग्धमुखी हसित्वा प्रलोकयति शय्याम् ॥ ] यदि देवरेण " खड्गं गृहीत्वा राजकुले व्रज हे प्रजावति " इति भणिता, ततः किमिति सा मुग्धमुखी हसित्वा शय्यामालुलोके । इदमुत्तरमत्र । कौचिद् राजपुत्रौ विद्येते । तयोः कनिष्ठेन, प्रजावती " राजकुले राजसेवार्थं मम भ्रातुःस्थाने व्रज " इत्युक्ता सती, अथामुना देवरेण विपरीतरतं मम शय्याप्रच्छादनपट-स्थितचरणकुङ्कुमलाञ्छनेन ज्ञात्वा मद्भ्रातुः कार्यं त्वया कृतम् इत्यज्ञासीत् ( ? ) । ( मद्भ्रातुः कार्यं त्वया क्रियतामित्याज्ञापितम् । ) ॥ ६२२ ॥

623) [ यदि श्वश्र्वा भणिता प्रियवसतौ पुत्रि दीपकं देहि । तत् कस्मान्मुग्धमुखी हसित्वा प्रलोकयति हृदयम् ॥ ] यदि " हे पुत्रि प्रियवसतौ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



624) जइ सा सहीहि भणिया तुज्झ पई सुन्नदेउलसमाणो।
ता कीस मुद्धमुही अहिययरं गव्वमुव्वहइ ॥ १४ ॥

## ६५. ससयवज्जा [ शशकपद्धतिः ]

625) हुरुहुल्लंतो रच्छामुहेसु वरमहिलियाण हत्थेसु।
खंधारहारिससओ व्व पुत्ति दइओ न छुट्टिहिइ ॥ १ ॥

626) तिलतुसमेत्तेण वि विप्पिएण तह होइ गरुयसंतावो।
सुहय विवज्जइ ससओ चम्मच्छेएण वि वराओ ॥ २ ॥

---

दीपकं देहि " इति श्वश्र्वा भणिता, ततः किमिति सा मुग्धमुखी हसित्वा प्रलोकयति हृदयम् । इयं श्वश्रूर्मम हृदये दीपकं दापयति । प्रियस्य वासस्तावन्मम हृदये । तस्मिंश्च दीपकः कथं दीयत इति हृदयावलोकनम् ॥ ६२३ ॥

624) [ यदि सा सखीभिर्भणिता तव पतिः शून्यदेवकुलसमानः । तत् कस्मान्मुग्धमुखी अधिकतरं गर्वमुद्वहति ॥ ] यदि " तव पतिः शून्यदेवकुलतुल्यः" इति सखीभिर्भणिता, ततः किमिति सा मुग्धमुखी अधिकतरं गर्वमुद्वहति । इदमत्र बीजम् । आभिर्मम भर्ता रन्तुं याचितः । ततस्ताः सुभगाः अहं नपुंसकोऽस्मीत्युत्तरयामास । ततो धन्याहं यस्या भर्तान्या न कामयत इति गर्वमुवाह ॥ ६२४ ॥

625) [ परिभ्रमन् रथ्यामुखेषु वरमहिलानां हस्तेषु । स्कन्धावारहारिशशक इव पुत्रि दयितो न मोक्ष्यते ॥ ] रथ्यामुखेषु वरमहिलियाण हत्थेसु वरस्त्रीणां हस्तेषु परिभ्रमन् हे पुत्रि दयितो न छुट्टिहिइ । किंविशिष्टः । खंधारहारिससओ व्व स्कन्धावारमध्यगतशशक इव । यथा कटकमध्य आगतः शशकः क्वापि न छुट्टति, तथा वरवनितादृष्टिगोचरीभूतस्तव भर्तापीति ॥ ६२५ ॥

626) [ तिलतुषमात्रेणापि विप्रियेण तथा भवति गुरुसंतापः । सुभग विपद्यते शशकश्चर्मच्छेदेनापि वराकः ॥ ] तिलतुषमात्रेणापि विप्रियेण तथा भवति संतापः । हे सुभग शशकश्चर्मच्छेदेनापि विपद्यते । विप्रियेणापि विनाशकत्वात् ॥ ६२६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



627) इह इंदधणू इह मेहगज्जियं इह सिहीण उल्लावो।
पहिओ हारी ससओ व्व पाउसे कह न मालेइ¹ ॥ ३ ॥

628) जा इच्छा का वि मणोपियस्स तग्गय मणम्मि पुच्छामो²।
ससय वहिल्लो सि तुमं जीविज्जइ अन्नहा कत्तो ॥ ४ ॥

629) अलिएण व सच्चेण व गेण्हसि नामं पि दड्ढगमणस्स।
सुहय विवज्जइ ससओ चम्मच्छेएण वि वराओ ॥ ५ ॥

६६. वसंतवज्जा [ वसन्तपद्धतिः ]

630) वणयतुरयाहिरूढो अलिउलझंकारतूरणिग्घोसो।
पत्तो वसंतराओ परहुयवरघुट्ठजयसद्दो ॥ १ ॥

627) [ इहेन्द्रधनुरिह मेघगर्जितमिह शिखिनामुल्लापः। पथिको हारी शशक इव प्रावृषि कथं न पश्यति ॥ ] अत्रेन्द्रधनुरत्र मेघगर्जितम् अत्र शिखिनामुल्लापः। पथिको हारी शशक इव प्रावृट्काले कथं नु पश्यति। प्रावृट्काले शशकपथिकौ दुःखिनौ भवतः॥ ६२७ ॥

628) [ येच्छा कापि मनःप्रियस्य तद्गतं मनसि पृच्छामः। शशक शीघ्रोऽसि त्वं जीव्यतेऽन्यथा कुतः ॥ ] येच्छा कापि मनःप्रियस्य तद्गतं मनसि पृच्छामः। हे शशक त्वरितोऽसि त्वं, जीव्यतेऽन्यथा कुतः ॥६२८॥

629) [ अलीकेन वा सत्येन वा गृह्णासि नामापि दग्धगमनस्य। सुभग विपद्यते शशकश्चर्मच्छेदेनापि वराकः॥ ] अलीकेन वा सत्येन वा गृह्णासि नामापि दग्धगमनस्य। हे सुभग शशकश्चर्मच्छेदेनापि विपद्यते वराकः। प्रेमारूढं वचनेनैव कमलनालवत् त्रुट्यति, अतिकोमलत्वात्॥ ६२९ ॥

630) [ वनकतुरगाधिरूढोऽलिकुलझङ्कारतूर्यनिर्घोषः। प्राप्तो वसन्तराजः परभृतवरघुष्टजयशब्दः ॥ ] वसन्तराजः प्राप्तः। राजत्वमेव विशेषणैर्विशिनष्टि। वनतुरगाधिरूढः। अन्योऽपि यो राजा भवति स तुरगाधिरूढो भवति। अलिकुलझङ्कारतूर्यनिर्घोषः। परभृतवरघुष्टजयशब्दः परभृतेन वरो घुष्टो जयशब्दो यस्य सः। अन्योऽपि यो राजा भवति स बन्दिभिः शब्दितजयशब्दो भवति॥ ६३० ॥

1 G, I कह णु मालेइ 2 G, I पेच्छामो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



631) परिधूसरा वि सहयारमंजरी वहउ मंजरीणामं।
नीसेसपसूणपरम्मुहं कयं जीइ भमरउलं ॥ २ ॥

632) उब्भिज्जइ सहयारो वियसइ कुंदो य वियसइ असोओ।
सिसिरपरिणामसुहियं¹ उम्मीलं² पंकयं सहसा ॥ ३ ॥

633) हंसारविंदमंदिरमयरंदाणंदियालिरिंछोली।
रणझणइ कसणमणिमेहल व्व महुमासलच्छीए ॥ ४ ॥

634) संधुक्किज्जइ हियए परिमलआणंदियालिमालाहिं।
उल्लाहि वि दिसिमणिमंजरीहि लोयस्स मयणग्गी ॥ ५ ॥

631) [ परिधूसरापि सहकारमञ्जरी वहतु मञ्जरीनाम। निःशेष-प्रसूनपराङ्मुखं कृतं यया भ्रमरकुलम् ॥ ] सहकारमंजरी आम्रमंजरी परिधूसरापि मंजरीनाम वहतु, यया भ्रमरकुलं षट्पदवृन्दं निःशेषप्रसूनपराङ्मुखं कृतम्। यावत् सहकारमंजरी संजाता तावत् सकलमपि पुष्पजातं परित्यज्य तस्यामेव पतति ( भ्रमरकुलम् ) ॥ ६३१ ॥

632) [ उद्भिद्यते सहकारो विकसति कुन्दश्च विकसत्यशोकः। शिशिरपरिणामसुखितम् उन्मीलितं पङ्कजं सहसा ॥ ] उद्भवति³ सहकारो विकसति कुन्दो विकसति चाशोकः, शिशिरपरिणामसुखितमुन्मीलितं पङ्कजं सहसा। अन्योऽपि यः शिशिरमतिक्रामति स विकसति ॥६३२॥

633) [ विशालारविन्दमन्दिरमकरन्दानन्दितालिपङ्क्तिः। रण-झणति कृष्णमणिमेखलेव मधुमासलक्ष्म्याः ॥ ] विस्तीर्णकमलमन्दिरमकरन्दानन्दिता भ्रमरपङ्क्तिः रणझणति। उत्प्रेक्षते। मधुमासलक्ष्म्याः कृष्णमणिमेखलेव ॥ ६३३ ॥

634) [ संधुक्ष्यते हृदये परिमलानन्दितालिमालाभिः। आर्द्राभिरपि दिक्षणिमञ्जरीभिर्लोकस्य मदनाग्निः ॥ ] लोकस्य हृदये मदनाग्निः संधुक्ष्यते। काभिः। परिमलानन्दितालिमालाभिः। दिक्षणिमंजरीभिरार्द्राभिः ॥ ६३४ ॥

1 G °सुहियं, 2 G उम्मिल्लं, 3 G, I उद्गच्छति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



635) गहिऊण चूयमंजरि कीरो परिभमइ पत्तलाहत्थो।
ओसरसु सिसिरणरवर लद्धा पुहवी वसंतेण ॥ ६॥

636) किं करइ तुरियतुरियं अलिउलघणवभलो य सहयारो।
पहियाण विणाससंकिय[1] व्व लच्छी वसंतस्स ॥ ७ ॥

637) लंकालयाण पुत्तय वसंतमासम्मि लद्धपसराणं।
आवीयलोहियाणं बीहेइ जणो पलासाणं ॥ ८ ॥

---

635) [ गृहीत्वा चूतमञ्जरीं कीरः परिभ्रमति प्रतीहारः। अपसर शिशिरनरवर लब्धा पृथिवी वसन्तेन ॥ ] कीरः शुकश्चूतमञ्जरीं गृहीत्वा, अत एव पत्रलाहस्तो प्रतीहाररूपी परिभ्रमतीव। किमर्थम्? हे शिशिरनरपतेऽपसर वसन्तेन लब्धा पृथ्वी। अधुना तवानवसरः। वसन्तो गलगर्जितं[2] करिष्यतीति ॥ ६३५ ॥

636) [ किं करोति त्वरितत्वरितमलिकुलघनशब्दश्च सहकारः। पथिकानां विनाशाशङ्कितेव लक्ष्मीर्वसन्तस्य ॥ ] किं त्वरितत्वरितम् अलिकुलघनशब्दः सहकारः करोति। पथिकानां जीवविनाशाशङ्कितेव लक्ष्मीर्वसन्तस्य ॥ ६३६ ॥

637) [ लङ्कालयेभ्यः पुत्रक वसन्तमासे ( वसान्त्रमासे ) लब्धप्रसरेभ्यः। आपीतलोहितेभ्यो बिभेति जनः पलाशेभ्यः ॥ ] हे पुत्रक, जनः पलाशेभ्यः पलाशकुसुमेभ्यो बिभेति। केभ्य इव। पलाशानां, पलमश्नन्तीति पलाशा राक्षसास्तेभ्यः ( इव )। किंविशिष्टेभ्य उभयेभ्यः। लंकालयाणं — लङ्कायां शाखायाम् आलयो येषां तेभ्यः। पक्षे,लङ्कायां रावणपुर्यामालयो येषां ते तथा ( तेभ्यः )। " नगरीशाखयोर्लङ्का " इति विश्वप्रकाशः। पुनः किंविशिष्टेभ्यः। वसन्तमासे लब्धप्रसरेभ्यः। पक्षे, वसान्त्रमासे लब्धप्रसरेभ्यः। राक्षसा हि वसान्त्रमांसानि जग्ध्वा पुष्टा भवन्ति। पुनरपि किंविशिष्टेभ्यः। आपीतलोहितेभ्यः। आ समन्तात् पीतानि लोहितानि यैः, तेभ्यः। पक्षे, आ समन्ततोभावेन पीतम् आस्वादितं रुधिरं यैस्ते, तेभ्य इति। वसन्ते हि पलाशानि पलाशकुसुमानि दृष्ट्वा पलाशेभ्यः ( राक्षसेभ्यः ) इव पलाशेभ्यः ( पलाशकुसुमेभ्यः ) बिभ्यतीति ॥ ६३७ ॥

---

1 G, I जियविणाससंकिय व्व   2 G omits गल

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



638) एक्को च्चिय दुव्विसहो विरहो मारेइ गयवई भीमो।
किं पुण गहियसिलीमुहसमाहवो फग्गुणो पत्तो ॥ ९ ॥

639) होसइ किल साहारो साहारे अंगणम्मि वड्ढंते[1] ॥
पत्ते वसंतमासे वसंतमासाइ सोसेइ ॥ १० ॥

640) किंकरि करि म अजुत्तं जणेण जं बालओ त्ति भणिओ सि।
धवलत्तं देंतो कंटयाण साहाण मलिणत्तं ॥ ११ ॥

638) [ एक एव दुर्विषहो विरहो ( विरथो ) मारयति गतपतिकाः (गजपतीन् ) भीमः । किं पुनर्गृहीताशिलीमुखसमाधवः फाल्गुनः प्राप्तः ॥ ] एक एव विरहो वियोगस्तावन्मारयति गतपतीर्गतपतिकाःस्त्रीः । किंविशिष्टः । दुर्विषहः, पुनर्भीमो रौद्रः । किं पुनः फाल्गुनमासः प्राप्तः । किंविशिष्टः । गहियसिलीमुहसमाहवो गृहीताः शिलीमुखा भ्रमरा येन स गृहीतशिलीमुखः । माधवेन चैत्रेण सह वर्तत इति समाधवः । गृहीतशिलीमुखश्चासौ समाधवश्च गृहीतशिलीमुखसमाधवः । फाल्गुनः प्राप्तः । विरहस्तावन्मारयति प्रोषितपतिकाः । तत्रापि चेत् स मधुकरसहितः सचैत्रमासः फाल्गुनमासः । तस्मिन्नत्युद्दीपनत्वाद्विरहस्य । अथ च एक एव विरथो रथरहितो दुःसहो भीमो वृकोदरस्तावन्मारयति गजपतीन् हस्तिराजान् । किं पुनः फाल्गुनोऽर्जुनः प्राप्तो न मारयति । किंविशिष्टः । गहियसिलीमुहसमाहवो । गृहीताः शिलीमुखा बाणा येन । तथा सह माधवेन वर्तत इति समाधवः । गृहीतशिलीमुखश्चासौ समाधवश्च स तथा । भीमो वृकोदरो गजपतीन् मारयत्येकः। तत्रापि धृतकाण्डकोदण्डो भगवत्सारथिरर्जुनश्चेत् प्राप्तो भवेदिति श्लेषः ॥६३८॥

639)[ भविष्यति किल साधारः सहकारेऽङ्गणे वर्धमाने । प्राप्ते वसन्तमासे वसान्त्रमांसानि शोषयति ॥ ] काचिद्विरहिणी आम्रवृक्षमुप्त्वा पश्चात्तस्मिन्वर्धमाने प्रलपति । किलेति संभावनायाम् । सहकारेऽङ्गणविषये वर्धमाने सति किल कोऽपि साधारः सहधारोऽयं[2] भविष्यति । वसन्तमासे प्राप्तेऽसौ सहकारो वसान्त्रमांसानि शोषयति मम ॥ ६३९ ॥

640) [ किंकरि कुरु मायुक्तं जनेन यद्बालक इति भणितोऽसि । धवलत्वं ददानः कण्टकानां शाखानां मलिनत्वम् ॥ ] किंकरि मा कार्षीर-

1 G, I वड्ढंते, 2 G, I सहाधारश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



641) मा रज्ज[1] सुहंजणए सोहंजणए य दिट्ठमत्तम्मि ।
भज्जिहिसिय साहसिया सा हसिया सव्वलोएण ॥ १२ ॥

६७. गिम्हवज्जा [ ग्रीष्मपद्धतिः ]

642) अवरेण तवइ सूरो सूरेण य ताविया तवइ रेणू ।
सूरेणपरेण पुणो दोहिं पि हु ताविया पुहवी ॥ १ ॥

643) गिम्हे दवग्गिमसिमइलियाइ दीसंति विंझसिहराइं ।
आससु पउत्थवइए न हुंति नवपाउसब्भाइं ॥ २ ॥

युक्तम् । जनेन त्वं यद् बालक इति भणितोऽसि । किं कुर्वंस्त्वम् । कण्टकानां धवलत्वं ददानः पत्राणां च मलिनत्वम् ॥ ६४० ॥

641) [ मा रज्य शुभंजनके शोभाञ्जनके च दृष्टमात्रे । भङ्क्ष्यस इति साहसिका सा हसिता सर्वलोकेन ॥ ] मा रज्य शुभंजनके शोभाञ्जनके[2] च दृष्टमात्रे । अस्मिन् दृष्टेऽपि त्वं भंक्ष्यस इति सा साहसिका सर्वलोकेन हसिता ॥ ६४१ ॥

642) [ अपरेण तपति सूर्यः सूर्येण च तापिता तपति रेणुः । सूर्येणापरेण पुनर्द्वाभ्यामपि खलु तापिता पृथिवी ॥ ] अपरेण उत्तरायणेन[3] सूर्यस्तपति । सूर्येण तापिता रेणुस्तपति । सूर्येण अपरेण ग्रीष्मेण च द्वाभ्यामपि तापिता पृथ्वी तपति ॥ ६४२ ॥

643) [ ग्रीष्मे दवाग्निमषीमलिनीकृतानि दृश्यन्ते विन्ध्यशिखराणि । आश्वसिहि प्रोषितपतिके न भवन्ति नवप्रावृडभ्राणि ॥ ] हे प्रोषितपतिके आश्वसिहि । न भवन्ति नवप्रावृडभ्राणि प्रावृट्कालीनमेघाः । तर्हि किमेतदित्याह । ग्रीष्मे दवाग्निमषीमलिनीकृतानि दृश्यन्ते विन्ध्यशिखरिशिखराणि । काचित्प्रोषितपतिका ग्रीष्मोद्भवदवह्निदग्धविन्ध्यशिखराणि दृष्ट्वा प्रावृट्कालो मम कालरूपी अयं समाजगिमवानिति श्वासधौताधरा सख्या " न भवन्ति घनाघना एते " इत्यूचे ॥ ६४३ ॥

1 G, I Laber रज्च 2 G, I सौभाग्यजनके
3 G, I omit उत्तरायणेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



644) डहिऊण निरवसेसं ससावयं सुक्खरुक्खमारूढो।
किं सेसं ति दवग्गी पुणो वि रण्णं पलोएइ॥ ३॥

645) मूलाहिंतो साहाण निग्गमो होइ सयलरुक्खाणं।
साहाहि मूलबंधो जेहि कओ ते तरू धन्ना॥ ४॥

## ६८. पाउसवज्जा [ प्रावृट्पद्धतिः ]

646) भग्गो गिम्हप्पसरो[1] मेहा गज्जंति लद्धसंमाणा।
मोरेहि वि उग्घुट्ठं पाउसराया चिरं जयउ॥ १॥

647) कसायपिंगलच्छो कसणंगो चडुलविज्जुजीहालो।
पहियघरिणीइ दिट्ठो मेहो उक्कापिसाओ व्व॥ २॥

644) [ दग्ध्वा निरवशेषं सश्वापदं शुष्कवृक्षमारूढः। किं शेषमिति दवाग्निः पुनरप्यरण्यं प्रलोकयति॥ ] दवाग्निः पुनरप्यरण्यं प्रलोकयतीव। कथमिति। किं शेषमिति। किंविशिष्टः। शुष्कवृक्षमारूढः। किं कृत्वा। सश्वापदं सजीवं वनं निरवशेषं दग्ध्वा। मया तावदशेषजीवसहितं वनं भस्मीकृतम्। इदानीं शेषं किमिति वर्तत इत्युच्चैः शुष्कं तरुमारूढ इति प्रतीयते स्म वनवह्निरिति॥ ६४४॥

645) [ मूलेभ्यः शाखानां निर्गमो भवति सकलवृक्षाणाम्। शाखाभिर्मूलबन्धो यैः कृतस्ते तरवो धन्याः॥ ] सकलतरूणां मूलात् ( ! मूलेभ्यः ) शाखानिर्गमो भवति। शाखाभिरेव मूलबन्धो यैः कृतस्ते तरवो धन्याः। अपूर्व इत्यर्थः ( ! )॥ ६४५॥

646) [ भग्नो ग्रीष्मप्रसरो मेघा गर्जन्ति लब्धसंमानाः। मयूरैरप्युद्घुष्टं प्रावृड्राजश्चिरं जयतु॥ ] भग्नो ग्रीष्मप्रसरो मेघा गर्जन्ति लब्धसंमानाः। मयूरैरप्युद्घुष्टं चुकूजे एवं, प्रावृड्राजश्चिरं जयतु॥ ६४६॥

647) [ कषायपिङ्गलाक्षः कृष्णाङ्गश्चटुलविद्युज्जिह्वः। पथिकगृहिण्या दृष्टो मेघ उल्कापिशाच इव॥ ] पथिकगृहिण्या मेघ उल्कयोपलक्षितः पिशाच इव दृष्टो ददृशे। किंविशिष्टो मेघः। कषायपिङ्गलाक्षः, कृष्णाङ्गः। चटुलविद्युदेव जिह्वा विद्यते यस्य सः॥ एवंविधो मेघः। पिशाचपक्षे, चटुला विद्युदिव जिह्वा यस्येति॥ ६४७॥

1 I गिंभप्पसरो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



648) गज्जंति घणा भग्गा य पंथया पसरियाउ सरियाओ ।
अज्ज वि उज्जुयसीले पियस्स पंथं पलोएसि ॥ ३ ॥

649) अणुझिज्जिरीउ आलोइऊण पहियस्स पहियजायाओ ।
धारामोक्खणिहेणं मेहाण गलंति अंसूणि ॥ ४ ॥

650) उच्चं उन्नावियकंधरेण भणियं व पाउसे सिहिणा ।
के के इमे पउत्था मोत्तूण घरेसु घरिणीओ ॥ ५ ॥

651) जा नीलजलहरोद्दार[1]गज्जिए मरइ नेय तुह जाया ।
ता पहिय तुरियतुरियं वह वह उल्लवइ कलकंठी ॥ ६ ॥

648) [ गर्जन्ति घना भग्नाश्च पन्थानः प्रसृताः सरितः । अद्यापि ऋजुशीले प्रियस्य पन्थानं प्रलोकयसि ॥ ] काचिन्मुग्धविरहिणी निरन्तरं वर्षति वारिदे, सरित्सूभयकूलंकषासु सतीषु, आत्मीयप्राणेश्वरस्यागमनं वाञ्छन्ती कयाचित् सख्यैवमुच्यते । अद्यापि ऋजुशीले प्रियस्य पन्थानमवलोकयसि, यतो गर्जन्ति घनाः पन्थानश्च भग्नाः, सरितो दूरं प्रसृताः[2] ॥ ६४८ ॥

649) [ अनुक्षयणशीला आलोक्य पथिकस्य पथिकजायाः । धारामोक्षनिभेन मेघानां गलन्त्यश्रूणि ॥ ] मेघानां गलन्त्यश्रूणि । केन कृत्वा । धारामोक्षनिभेन धारामोक्षणव्याजेन । किं कृत्वा । अवलोक्य । काः । पथिकजायाः प्रोषितभर्तृकाः । किंविशिष्टा दृष्ट्वा । अणुझिज्जिरीओ अनुक्षीण( ? अनुक्षयण )शीलाः । यथा यथा वयं धारा मुञ्चामस्तथा तथामू रोदनधारा मुञ्चन्ति । अस्माननुकुर्वन्ति चक्षुर्भ्याम् अमूर्वराक्यः किल । दयया जलधाराच्छलेन घनाघना अपि घनं रुरुदुः ॥ ६४९ ॥

650) [ उच्चैरुच्चीकृतकन्धरेण भणितमिव प्रावृट्काले शिखिना । के क इमे प्रोषिता मुक्त्वा गृहेषु गृहिणीः ॥ ] इमे के के गृहिणीगृह एव परित्यज्य प्रोषिता इति शिखिना मयूरेण भणितमिव । किंविशिष्टेन । उच्चमत्यर्थमूर्ध्वीकृतकन्धरेण ॥ ६५० ॥

651) [ यावन्नीलजलधरोदारगर्जिते म्रियते नैव तत्र जाया । तावत्पथिक त्वरितत्वरितं वह वहेत्युल्लपति कलकण्ठी ॥ ] हे पथिक,

1 I °जलहरोराल° 2 G, I पूरप्रसृताः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



652) अमुणियपयसंचारा दीसंति भयंकरा भुयंग व्व।
विसविसमा दुल्लंघा मेहा महिमंडले लग्गा ॥ ७ ॥

## ६९. सरयवज्जा [ शरत्पद्धतिः ]

653) सुसइ व पंकं न वहंति निज्झरा बरहिणो न नच्चंति।
तणुआयंति नईओ अत्थमिए पाउसणरिंदे ॥ १ ॥

654) उयह[1] तरुकोडराओ गच्छंती पूसयाण[2] रिंछोली।
सरए जरिओ व्व दुमो पित्तं व सलोहियं वमइ ॥ २ ॥

---

यावत्तत्र जाया न म्रियते। क सति। नीलजलधरोदारगर्जिते सति। तावत् त्वरितत्वरितं वह वहेत्युल्लपति कलकण्ठी ॥ ६५१ ॥

652) [ अज्ञातपदसंचारा दृश्यन्ते भयंकरा भुजङ्गा इव। विषविषमा दुर्लङ्घ्या मेघा महीमण्डले लग्नाः ॥ ] अज्ञातपदसंचारा दृश्यन्ते मेघा भुजंगा इव भयंकराः। न ज्ञातः पदानां संचारो येषु। अहिपक्षे, ( न ज्ञातः पदानां संचारो ) येषां ते। किंविशिष्टाः। महीमण्डले लग्ना जलप्राग्भार-भरितत्वात् पृथ्वीस्पृशः ॥ ६५२ ॥

653) [ शुष्यतीव पङ्को, न वहन्ति निर्झरा, बर्हिणो न नृत्यन्ति। तनूभवन्ति नद्योऽस्तमिते प्रावृट्कालनरेन्द्रे ॥ ] प्रावृड्नरेन्द्रेऽस्तमित एवं जातम्। कीदृगित्याह। शुष्यतीव पङ्कम्। निर्झरा न वहन्ति। बर्हिणो न नृत्यन्ति। नद्यश्च तनुकायन्ते। यथा कस्मिंश्चित् प्रधानपुरुषे विनष्टे शोक-तनुतनुकृशादयो ( ? शोकात्तनुकृशत्वादयो ) भवन्ति तत्परिवारस्य ॥ ६५३ ॥

654) [ पश्यत तरुकोटराद्गच्छन्ती शुकानां पङ्क्तिः। शरदि ज्वरित इव द्रुमः पित्तमिव सलोहितं वमति ॥ ] पश्यत तरुकोटरान्निर्गच्छन्ती शुकानां पङ्क्तिः। उत्प्रेक्षते। शरदि ज्वरितो द्रुमः पित्तं सलोहितं वमति। शुकशरीरहरितत्वेन चंच्वाश्च लौहित्येन सलोहितं पित्तमिवोत्प्रेक्षते ( ? सलोहितं पित्तमुत्प्रेक्ष्यते ) ॥ ६५४ ॥

---

1 C, I उवह, 2 I पूसयाण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ७०. हेमंतवज्जा [ हेमन्तपद्धतिः ]

655) जाणिज्जइ न उ पियमप्पियं पि लोयाण तम्मि हेमंते।
सुयणसमागम वग्गी निच्चं निच्चं सुहावेइ ॥ १ ॥

## ७१. सिसिरवज्जा [ शिशिरपद्धतिः ]

656) डज्झंतु सिसिरदियहा पियमप्पियं जणो वहइ।
दहवयणस्स व हियए सीयायवणक्खओ जाओ ॥ १ ॥

657) अवधूयअलक्खणधूसराउ दीसंति फरुसलुक्खाओ।
उय सिसिरवायलइया[1] अलक्खणा दीणपुरिस व्व ॥ २ ॥

658) चोराण कामुयाण य पामरपहियाण कुक्कुडो रडइ।
रे पलह रमइ वाहयह[2] वहह तणुइज्जए रयणी ॥ ३ ॥

---

655) [ ज्ञायते न तु प्रियमप्रियमपि लोकानां तस्मिन्हेमन्ते। सुजनसमागम इवाग्निर्नित्यं नित्यं सुखयति ॥ ] ज्ञायते न प्रियमप्रियं तस्मिन् हेमन्ते लोकानाम्। सुजनसमागम इवाग्निर्नित्यं नित्यमधिकं सुखयति ॥६५५॥

656) [ दह्यन्तां शिशिरदिवसाः प्रियमप्रियं जनो वहति। दशवदनस्येव हृदये सीतातपनक्षयो जातः ॥ ] शिशिरदिवसा दह्यन्ताम्। प्रियमप्रियं जनो वहति। दशवदनस्येव हृदये सीतातपनक्षयो जातः ॥६५६॥

657) [ अवधूतालक्षणधूसरा दृश्यन्ते परुषरूक्षाः। पश्य शिशिरवातगृहीता अलक्षणा दीनपुरुषा इव ॥ ] शिशिरवातगृहीता दीनपुरुषस्येव अलक्षणानीव। उय पश्य। किंविशिष्टाः। अवधूतलक्षणधूसरा दृश्यन्ते परुषाः स्निग्धाः ॥ ६५७ ॥

658) [ चौराणां कामुकानां पामरपथिकानां च कुक्कुटो रटति। रे पलायध्वं, रमध्वं, वाहयत, वहत, तनूभवति रजनी ॥ ] कुक्कुटो रटत्येवम्। केषामित्याह। चौराणां, कामुकानां, पामराणां,[3] पथिकानां च। रे चौराः पलायध्वं, तनूभवति रजनी। रमध्वं कामुकाः। वाहयत क्षेत्राणि

---

1 I G सिसिरवायलइया 2 I वाहह 3 G, I add कर्षुकाणां after पामराणाम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ७२. जरावज्जा [ जरापद्धतिः ]

659) ता धणरिद्धी ता सुंदरत्तणं ता वियड्ढिमा लोए।
जा तरुणीयणकडुयत्तणाइ न हु हुंति पलियाई ॥ १ ॥

660) न तहा लोयम्मि कडक्खियम्मि न हु जंपियं तह च्चेय।
जह जह' तरुणीयणलोयणेसु सीसे पडंताणं ॥ २ ॥

661) रमियं जहिच्छियाए धूलीधवलम्मि गाममज्झम्मि।
डिंभत्तणस्स दियहा य णं कया जरयदियह व्व ॥ ३ ॥

662) संकुइयकंपिरंगो ससंकिरो दिन्नसयलपयमग्गो।
पलियाण लज्जमाणो न गणेइ अइत्तए दिन्नं ॥ ४ ॥

---

पामराः। हे पथिका वहत मार्गम्। तनुकायते रजनीति पदं पदं प्रति योज्यम् ॥ ६५८ ॥

659) [ तावद्धनऋद्धिस्तावत्सुन्दरत्वं तावद्विदग्धता लोके। यावत्तरुणीजनकटुकत्वानि न खलु भवन्ति पलितानि ॥ ] ॥ ६५९ ॥

660) [ न तथा लोके कटाक्षिते न खलु जल्पितं तथैव। यथा यथा तरुणीजनलोचनेषु शीर्षे पतत्सु ॥ ] न तथा लोके कटाक्षितेन न खलु जल्पितं तथा, यथा तरुणीजनलोचनेषु शीर्षे पतताम् ॥ ६६० ॥

661) [ रमितं यथेप्सितं धूलीधवले ग्राममध्ये। डिम्भत्वस्य दिवसाश्च ननु कृता जरादिवसा इव ॥ ] डिम्भत्वस्य दिवसा ननु कृता जरदिवसैः[2] ( ? जरादिवसा इव )। धूलिधवले ग्राममध्ये यथेप्सितं रमितं क्रीडितम् ॥ ६६१ ॥

662) [संकुचितकम्पनशीलाङ्गः शङ्कनशीलो दत्तसकलपदमार्गः। पलितेभ्यो लज्जमानो न गणयति अतीते दत्तम् ॥ ] संकुचितकम्पनशीलाङ्गः, शङ्कनशीलो[3], दत्तसकलपदमार्गः पलितेभ्यो लज्जमानो न गणयति। अयि इति आमन्त्रणे। दत्तमिति न गणयति ॥ ६६२ ॥

---

1 G omits जह 2 I जरदिवसैः 3 I सशङ्कनशीलः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



663) वम्महभक्खणदिव्वोसहीइ अंगं च कुणइ जरराओ।
पेच्छह निट्‌ठुरहियओ एण्हि सेवेइ तं कामो ॥ ५ ॥

664) उज्झसु विसयं परिहरसु दुक्कयं कुणसु नियमणे धम्मं।
ठाऊण कण्णमूले इट्ठं सिट्ठं व पलिएण ॥ ६ ॥

665) जीयं जलबिंदुसमं उप्पज्जइ जोव्वणं सह जराए।
दियहा दियहेहि समा न हुंति किं निट्‌ठुरो लोओ ॥ ७ ॥

666) वरिससयं नरआऊ तस्स वि अद्धेण हुंति राईओ।
अद्धस्स य अद्धयरं हरइ जरा बालभावो य ॥ ८ ॥

667) को एत्थ सया सुहिओ कस्स व लच्छी थिराइ पेम्माइं।
कस्स व न होइ पलियं भण को न हु खंडिओ विहिणा ॥ ९ ॥

---

663) [ मन्मथभक्षणदिव्यौषध्याङ्गं च करोति जराराजः। प्रेक्षध्वं निष्ठुरहृदय इदानीं सेवते तं कामः ॥ ६६३ ॥ ]

664) [ उज्झ विषयं परिहर दुष्कृतं कुरु निजमनसि धर्मम्। स्थित्वा कर्णमूल इष्टं कथितमिव पलितेन ॥ ] कर्णमूले स्थित्वा, इष्टं कथितमिव पलितेन वार्द्धकेन। इति कथम्। विषयम् उज्झ त्यज, दुष्कृतं परिहर परित्यज, निजमनसि धर्मं कुरु। इति कर्णमूले लगित्वा कथितमिव। पूर्वं हि जरा कर्णमूल एव समागच्छति ॥ ६६४ ॥

665) [ जीवितं जलबिन्दुसममुत्पद्यते यौवनं सह जरया। दिवसा दिवसैः समा न भवन्ति, किं निष्ठुरो लोकः ॥ ] जीवितं जलबिन्दुसममुत्पद्यते यौवनं जरया समम्। दिवसा दिवसैः समा न भवन्ति। किं लोको निष्ठुरः ॥ ६६५ ॥

666) [ वर्षशतं नरायुस्तस्याप्यर्धेन भवन्ति रात्रयः। अर्धस्य चार्धतरं हरति जरा बालभावश्च ॥ ] वर्षशतं नरायुस्तस्याप्यर्धेन भवन्ति रात्रयः। अर्धस्यार्धतरं हरति जरा बालभावश्च ॥ ६६६ ॥

667) [ कोऽत्र सदा सुखितः कस्य वा लक्ष्मीः स्थिराणि प्रेमाणि। कस्य वा न भवति पलितं भण को न खलु खण्डितो विधिना ॥ ] कोऽत्र जगति सदा सुखितः, कस्य लक्ष्मीः स्थिरा, कस्य प्रेमाणि स्थिराणि। कस्य च न भवति पलितं, भण कः खलु न खण्डितो विधिना ॥६६७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ७३. महिलावज्जा [ महिलापद्धतिः ]

668) गहचरियं देवचरियं ताराचरियं चराचरे चरियं ।
जाणंति सयलचरियं महिलाचरियं न याणंति[1] ॥ १ ॥

669) बहुकूडकवडभरिया मायारूवेण रंजए हिययं ।
महिलाए सब्भावं अज्ज वि बहवो न याणंति[1] ॥ २ ॥

670) घेप्पइ मच्छाण पए आयासे पक्खिणो य पयमग्गो ।
एक्कं नवरि न घेप्पइ दुल्लक्खं कामिणीहिययं ॥ ३ ॥

## ७४. पुव्वकयकम्मवज्जा [ पूर्वकृतकर्मपद्धतिः ]

671) इह लोए च्चिय दीसइ सग्गो नरओ य किं परत्तेण ।
धणविलसियाण सग्गो नरओ दालिद्दिय[2]जणाणं ॥ १ ॥

668) [ ग्रहचरितं देवचरितं ताराचरितं चराचरे चरितम् । जानन्ति सकलचरितं महिलाचरितं न जानन्ति ॥ ] ग्रहचरित्रं, देवचरित्रं, ताराचरित्रं, चराचरचरित्रं, जानन्ति सकलचरित्रं, महिलाचरित्रं न जानन्ति बुधाः ॥ ६६८ ॥

669) [ बहुकूटकपटभृता मायारूपेण रञ्जयति हृदयम् । महिलायाः सद्भावमद्यापि बहवो न जानन्ति ॥ ६६९ ॥ ]

670) [ गृह्यते मत्स्यानां पयस्याकाशे पक्षिणश्च पदमार्गः । एकं केवलं न गृह्यते दुर्लक्ष्यं कामिनीहृदयम् ॥ ] गृह्यते मत्स्यानां पदमार्गः । क्व । पयसि जले । तथा पक्षिणः पदमार्ग आकाशे गगने गृह्यते । एकं न परं गृह्यते । किं तत् । दुर्लक्ष्यं कामिनीहृदयम् । जलचरस्य मत्स्यस्य पयसि चरणविक्षेपोऽपि, आकाशे पक्षिणोऽपि ग्रहीतुं शक्यते । न पुनः कूटकपट-चित्तायाः स्त्रियो हृदयम् ॥ ६७० ॥

671) [ इह लोक एव दृश्यते स्वर्गो नरकश्च किं परलोकेन । धन-विलसितानां स्वर्गो नरको दरिद्रजनानाम् ॥ ] इह लोक एव दृश्यते स्वर्गो नरकश्च किं परत्रेण । कथं, तदेव दर्शयति । धनविलसनशीलानां स्वर्गो, दारिद्र्यमुद्रितजनानां नरकः । ये धनिनो धर्मादिषु पदार्थेषु धनं नियुञ्जते

1 I जाणंति 2 G दालिद्द°

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



672) विहडंति सुया विहडंति बंधवा विहडेइ संचिओ अत्थो।
एक्कं नवरि न विहडइ नरस्स पुव्वक्कयं कम्मं ॥ २ ॥

673) अवहरइ जं न विहियं जं विहियं तं पुणो न नासेइ।
अइणिउणो नवरि विही सित्थं पि न वड्ढिउं देइ ॥ ३ ॥

674) जं च्चिय विहिणा लिहियं तं चिय परिणमइ सयललोयस्स।
इय जाणिऊण धीरा विहुरे वि न कायरा हुंति ॥ ४ ॥

675) पाविज्जइ जत्थ सुहं पाविज्जइ मरणबंधणं जत्थ।
तेण तहिं चिय निज्जइ नियकम्मगलत्थिओ जीवो ॥ ५ ॥

---

त एव स्वर्गिणः। ये च प्रत्यहं देहीत्यक्षरवदनचुंचवस्त एव नारकिकाः। स्वर्गनरकौ हि नामरूपिणौ ॥ ६७१ ॥

672) [ विघटन्ते सुता विघटन्ते बान्धवा विघटते संचितोऽर्थः। एकं केवलं न विघटते नरस्य पूर्वकृतं कर्म ॥ ] विघटन्ते सुता, विघटन्ते बान्धवा, विघटते संचितोऽप्यर्थो, नवरि केवलम् एकं पूर्वकृतं कर्म नरस्य न विघटते ॥ ६७२ ॥

673) [ अपहरति यन्न विहितं यद्विहितं तत्पुनर्न नाशयति। अतिनिपुणः केवलं विधिः सिक्थमपि न वर्धितुं ददाति ॥ ] विधिर्यन्न कृतं तन्नापहरति ( ? विधिर्यन्न कृतं तदपहरति )। यत् कृतं तत् पुनर्न नाशयति। अत एवातिनिपुणः सिक्थमपि वर्धितुं न ददाति ॥ ६७३ ॥

674) [ यदेव विधिना लिखितं तदेव परिणमति सकललोकस्य। इति ज्ञात्वा धीरा विधुरेऽपि न कातरा भवन्ति ॥] यदेव विधिना पूर्वकृतकर्मणा लिखितं तदेव परिणमति सकललोकस्य, इति ज्ञात्वा धीरा विधुरेऽपि न कातरा भवन्ति ॥ ६७४ ॥

675) [ प्राप्यते यत्र सुखं प्राप्यते मरणबन्धनं यत्र। तेन तत्रैव नीयते निजकर्मगलहस्तितो जीवः ॥ ] यत्र सुखं प्राप्यते यत्र मरणबन्धनं प्राप्यते तेन तत्रैव निजकर्मणा गलहस्तितो नीयते। यत्र मरणं भवति तत्र किं कोऽपि याति। परं निजकर्मणा बलात्कारेण अवशः संस्तत्रैव नीयते ॥ ६७५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



676) ता किं भएण किं चिंतिएण किं जूरिएण बहुएण ।
जइ सो चेव वियंभइ पुव्वकओ पुण्णपरिणामो ॥ ६ ॥

677) को दाऊण समत्थो को वा हरिऊण जस्स जं विहियं ।
परिणमइ फलं पुत्तय पुव्वकम्माणुसारेण ॥ ७ ॥

## ७५. ठाणवज्जा [ स्थानपद्धतिः ]

678) रायंगणम्मि परिसंठियस्स जह कुंजरस्स माहप्पं ।
विंझसिहरम्मि न तहा ठाणेसु गुणा विसट्टंति[1] ॥ १ ॥

679) अज्झाकवोलपरिसंठियस्स जह चंदणस्स माहप्पं ।
मलयसिहरे वि न तहा ठाणेसु गुणा विसट्टंति ॥ २ ॥

---

676) [ तत् किं भयेन किं चिन्तितेन किं खिन्नेन बहुना । यदि स एव विजृम्भते पूर्वकृतः पुण्यपरिणामः ॥ ] ततः किं भयेन, किं चिन्तितेन, किं खिन्नेन बहुना, यदि पूर्वपुण्यपापकृतः[2] परिणामो विजृम्भते स एव ॥ ६७६ ॥

677) [ को दातुं समर्थः को वा हर्तुं यस्य यद्विहितम् । परिणमति फलं पुत्रक पूर्वकर्मानुसारेण ॥ ] यस्य यद्विहितं तत् को वा दातुं वा हर्तुं समर्थः । हे पुत्रक पूर्वकर्मानुसारेण फलं परिणमति ॥ ६७७ ॥

678) [ राजाङ्गणे परिसंस्थितस्य यथा कुञ्जरस्य माहात्म्यम् । विन्ध्यशिखरे न तथा स्थानेषु गुणाः प्रसरन्ति ॥ ] राजाङ्गणे परिसंस्थितस्य कुञ्जरस्य यथा माहात्म्यं तथा विन्ध्यशिखरे न । यत्रोत्पन्नं वस्तु तत्र तथा न शोभते यथान्यत्र स्थाने शोभतेतराम् । अत एव स्थानेष्वाकरेषु गुणा विसट्टंति विघटन्ते ॥ ६७८ ॥

679) [ प्रौढयुवतिकपोलपरिसंस्थितस्य यथा चन्दनस्य माहात्म्यम् । मलयशिखरेऽपि न तथा स्थानेषु गुणाः प्रसरन्ति ॥ ] प्रौढयुवतीकपोलस्थितस्य श्रीचन्दनस्य यथा माहात्म्यं, तथा मलयाचलशिखरे न । स्थानेषु गुणा विघटन्ते विजृम्भन्ते ॥ ६७९ ॥

---

1 C विवड्ढंति 2 I पूर्वकृतः पुण्यकृतः पुण्यपरिणामः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



680) वरतरुणिणयणपरिसंठियस्स जह कज्जलस्स माहप्पं।
दीवसिहरे वि न तहा ठाणेसु गुणा विसट्टंति ॥ ३ ॥
681) केसाण दंतणहठक्कुराण वहुयाण वहुयणे तह य।
थणयाण ठाणचुक्काण मामि को आयरं कुणइ ॥ ४ ॥
682) ठाणं न मुयइ धीरो ठक्कुरसंघस्स दुट्ठवग्गस्स।
ठंतं पि[1] देइ जुज्झं ठाणे ठाणे जसं लहइ ॥ ५ ॥
683) गहियविमुक्का तेयं जणंति[2] सामाइणो नरिंदाणं।
दंडो तह च्चिय ट्ठिय आमूलं हणइ टंकारो ॥ ६ ॥
684) उयहिवडवाणलाणं परोप्परुल्हवणसोसणमणाणं।
अमुणियमज्झपजलणाण वइयरो जिणइ जियलोए ॥ ७ ॥

680) [ वरतरुणीनयनपरिसंस्थितस्य यथा कज्जलस्य माहात्म्यम्। दीपशिखरेऽपि न तथा स्थानेषु गुणाः प्रसरन्ति ॥ ] वरतरुणीनयनस्थितस्य कज्जलस्य यथा माहात्म्यं, तथा न दीपशिखरे। स्थानेषु गुणा विजृम्भन्ते ॥ ६८० ॥

681) [ केशानां दन्तनखठक्कुराणां वधूकानां वधूजने तथा च। स्तनानां स्थानभ्रष्टानां सखि क आदरं करोति ॥ ] हे मामि सखि, केशानां, दन्तानां, नखानां, ठक्कुराणां वधूनां बहुजने ( ? वधूजने ) तथा च स्तनानां सर्वेषामपि स्थानभ्रष्टानां को नामादरं करोति। अपि तु न कोऽपि ॥ ६८१ ॥

682) [ स्थानं न मुञ्चति धीरष्ठक्कुरसंघस्य दुष्टवर्गस्य। तिष्ठदपि ददाति युद्धं स्थाने स्थाने यशो लभते ॥ ] धीरः स्थानं न मुञ्चति। कस्य। ठक्कुरसंघस्य दुष्टवर्गस्य। तिष्ठदपि युद्धं ददाति, स्थाने स्थाने यशो लभते ॥ ६८२ ॥

683) [ गृहीतविमुक्तास्तेजो जनयन्ति सामाजिका नरेन्द्राणाम्। दण्डस्तथैव स्थित आमूलं हन्ति टणत्कारः ॥ ६८३ ॥ ]

684) [ उदधिवडवानलयोः परस्परनिर्वापणशोषणमनसोः। अज्ञात-मध्यप्रज्वलनयोर्व्यतिकरो जयति जीवलोके ॥ ६८४ ॥ ]

1 G तिट्ठं पि 2 I जिणंति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ७६. गुणवज्जा [ गुणपद्धतिः ]

685) जइ नत्थि गुणा ता किं कुलेण गुणिणो कुलेण न हु कज्जं ।
कुलमकलंकं गुणवज्जियाण गरुयं चिय कलंकं ॥ १ ॥

686) गुणहीणा जे पुरिसा कुलेण गव्वं वहंति ते मूढा ।
वंसुप्पन्नो वि धणू गुणरहिए नत्थि टंकारो ॥ २ ॥

687) जम्मंतरं न गरुयं गरुयं पुरिसस्स गुणगणारुहणं ।
मुत्ताहलं हि गरुयं न हु गरुयं सिप्पिसंपुडयं ॥ ३ ॥

688) खरफरुसं सिप्पिउडं रयणं तं होइ जं अणग्घेयं ।
जाईइ किं व किज्जइ गुणेहि दोसा फुसिज्जंति ॥ ४ ॥

---

685) [ यदि न सन्ति गुणास्तत् किं कुलेन, गुणिनः कुलेन न खलु कार्यम् । कुलमकलङ्कं गुणवर्जितानां गुरुक एव कलङ्कः ॥ ] यदि न सन्ति गुणास्ततः किं कुलेन । गुणिनो गुणवतः कुलेन न खलु कार्यम् । गुणवर्जितानां नराणाम् अकलङ्कमपि कुलं गुरुतरः कलङ्कः । निर्गुणस्य कुलीनस्यापि कुलं कलङ्काय भवतीत्यर्थः ॥ ६८५ ॥

686) [ गुणहीना ये पुरुषाः कुलेन गर्वं वहन्ति ते मूढाः । वंशोत्पन्नमपि धनुः गुणरहितं नास्ति टणत्कारः ॥ ] गुणहीना ये पुरुषाः कुलेन " अहं कुलीनोऽस्मि " इति गर्वं वहन्ति ते मूढा मूर्खाः । कथमेवं ज्ञायत इत्याह । तदेव पश्य । वंशोत्पन्नेऽपि धनुषि गुणरहिते नास्ति टणत्कारः । यद्यपि कुलोत्पन्नस्तथापि गुणरहितस्तृणाय भवति । यथा गुणरहितं धनुः पिंजनादतिरिच्यते ( ? ) ॥ ६८६ ॥

687) [ जन्मान्तरं न गुरु गुरु पुरुषस्य गुणगणारोहणम् । मुक्ताफलं हि गुरु न खलु गुरु शुक्तिसंपुटकम् ॥ ] जन्मान्तरं न गुरु, पुरुषस्य गुणगणारोहणं गुरु । अमुमेवार्थमर्थान्तरेण विवृणोति । मुक्ताफलं स्फुटं गुरु, न पुनस्तदुत्पत्तिस्थानं शुक्तिसंपुटम् ॥ ६८७ ॥

688) [ खरपरुषं शुक्तिपुटं रत्नं तद्भवति यदनर्घ्यम् । जात्या किमिव क्रियते गुणैर्दोषाः प्रोञ्छ्यन्ते ॥ ] अतिशयेन परुषं शुक्तिपुटं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



689) जं जाणइ भणइ जणो गुणाण विहवाण अंतरं गरुयं।
लब्भइ गुणेहि विहवो विहवेहि गुणा न घेप्पंति ॥ ५ ॥

690) ठाणं गुणेहि लब्भइ ता गुणगहणं अवस्स कायव्वं।
हारो वि नेय पावइ गुणरहिओ तरुणिथणवट्टं ॥ ६ ॥

691) पासपरिसंठिओ वि हु गुणहीणे किं करेइ गुणवंतो।
जायंधयस्स दीवो हत्थकओ निप्फलो च्चेय ॥ ७ ॥

692) परलोयगयाणं पि हु पच्छत्तावो न ताण पुरिसाणं।
जाण गुणुच्छाहेणं जियंति वंसे समुप्पन्ना ॥ ८ ॥

भवति। तदुत्पन्नं च रत्नं च तद्भवति यदनर्घ्यम्[1]। जात्या किमिव क्रियते, गुणैर्दोषाः प्रोञ्छयन्ते ॥ ६८८ ॥

689) [ यज्जानाति भणति जनो गुणानां विभवानामन्तरं गुरुकम्। लभ्यते गुणैर्विभवो विभवैर्गुणा न गृह्यन्ते ॥ ] यज्जानाति भणति जनो गुणानां विभवानां च महदन्तरम्। विभवो गुणैर्लभ्यते, विभवेन गुणा न गृह्यन्ते, न लभ्यन्त इति ॥ ६८९ ॥

690) [ स्थानं गुणैर्लभ्यते तद्गुणग्रहणमवश्यं कर्तव्यम्। हारोऽपि नैव प्राप्नोति गुणरहितस्तरुणीस्तनपट्टम् ॥ ] स्थानं गुणैर्लभ्यते, ततो गुणग्रहणमवश्यमेव कर्तव्यम्। एतदेव दृष्टान्तेनोपोद्बलयति। हारोऽपि —आस्तां तावत् सचेतनः पुरुषः—नैव प्राप्नोति गुणरहितस्तरुणीस्तनपट्टम् ॥ ६९० ॥

691) [ पार्श्वपरिसंस्थितोऽपि खलु गुणहीने किं करोति गुणवान्। जात्यन्धकस्य दीपो हस्तकृतो निष्फल एव ॥ ] पार्श्वे परिसंस्थितोऽपि गुणहीने किं करोति गुणवान्। जात्यन्धस्य दीपो हस्तकृतो निष्फल एव ॥ ६९१ ॥

692) [ परलोकगतानामपि खलु पश्चात्तापो न तेषां पुरुषाणाम्। येषां गुणोत्साहेन जीवन्ति वंशे समुत्पन्नाः ॥ ] येषां गुणोत्साहेन कुलोत्पन्ना अपि पुरुषा जीवन्ति, तेषां पुरुषाणां परलोकगतानामपि खलु न पश्चात्तापः।

---
1] यदनर्घ्यम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ७७. गुणणिंदावज्जा [ गुणनिन्दापद्धतिः ]

693) मुत्ताहलं व पहुणो गुणिणो किं करइ वेहरहियस्स।
जत्थ न पविसइ सूई तत्थ गुणा बाहिर च्चेय ॥ १ ॥

694) पियकेलिसंगमोसारिएण हारेण चिंतियं एयं।
अवसररहिया गुणवंतया वि दूरे धरिज्जंति ॥ २ ॥

695) ता निग्गुण च्चिय वरं पहुणवलंभेण जाण परिओसो।
गुणिणो गुणाणुरूवं फलमलहंता किलिस्संति ॥ ३ ॥

696) निग्गुण गुणेहि नियणिग्गुणत्तणं देहि अम्ह सद्धीए।
कलिकाले किं कीरइ गुणेहि पहुणो न घेप्पंति ॥ ४ ॥

---

ये गुणवन्तस्ते मृता अपि जीवन्ति। अहो धन्या एते पुरुषा येषां पूर्वजा गुणगणालंकृता अभूवन्निति ॥ ६९२ ॥

693) [ मुक्ताफलमिव प्रभोर्गुणिनः किं करोति वेधरहितस्य। यत्र न प्रविशति सूची तत्र गुणा बहिरेव ॥ ] वेधरहितस्य प्रभोर्गुणिनः किं कुर्वन्ति( ? करोति ) यथा मुक्ताफलस्य वेधरहितस्य। यत्र न प्रविशति सूची तत्र गुणा बहिरेव ॥ ६९३ ॥

694) [ प्रियकेलिसंगमोत्सारितेन हारेण चिन्तितमेतत्। अवसररहिता गुणवन्तोऽपि दूरे ध्रियन्ते ॥ ] प्रियकेलिसंगमे सुरतक्रीडाप्रस्तावे उत्सारितेन हारेण चिन्तितम्। किमित्याह। अवसररहिता गुणवन्तोऽपि दूरे ध्रियन्ते। यद्येवं नास्ति तर्हि कथं यैरस्माभिस्तरुणीकुचकलशयोर्मुधा जनिता ते वयमपि गुणिनो दूरे ध्रियामहे ॥ ६९४ ॥

695) [ तन्निर्गुणा एव वरं प्रभुनवलम्भेन येषां परितोषः। गुणिनो गुणानुरूपं फलमलभमानाः क्लिश्यन्ति ॥ ] ततो निर्गुणा एव वरं प्रधानं, येषां निर्गुणानां प्रभुनवलम्भेन परितोषः। गुणिनः पुनर्गुणानुरूपं फलमलभमानाः क्लिश्यन्ति ॥ ६९५ ॥

696) [ निर्गुण गुणैर्निजनिर्गुणत्वं देह्यस्मभ्यं विनिमयेन। कलिकाले किं क्रियते गुणैः प्रभवो न गृह्यन्ते ॥ ] हे निर्गुण गुणैर्निजनिर्गुणत्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



697) सव्वत्तो वसइ घरा संति नरिंदा गुणा वि अग्घंति।
ता किं सहंति गुणिणो अणायरं अत्थवंताणं ॥ ५ ॥

७८. गुणसलाहावज्जा [ गुणश्लाघापद्धतिः ]

698) जस्स न गेण्हंति गुणा सुयणा गोट्ठीसु रणमुहे सुहडा।
नियजणणिजोव्वणुक्खणेण किं तेण जाएण ॥ १ ॥

699) किं तेण जाइएण वि पुरिसेँ पयपूरणे वि असमत्थेँ।
जेण न जसेण भरियं सरि व्व भुवणंतरं सयलं ॥ २ ॥

700) देसे गामे नयरे रायपहे तियचउक्कमग्गे वा।
जस्स न पसरइ कित्ती धिरत्थु किं तेण जाएण ॥ ३ ॥

701) किं तेण आइएण व किं वा पसयच्छि तेण व गएण।
जस्स कए रणरणयं नयरे न घराघरं होइ ॥ ४ ॥

---

मह्यम्यं देहि । कया । सड्ढीए द्रव्यविनिमयेन । यतः कलिकाले किं क्रियते, गुणैः प्रभवो न गृह्यन्ते ॥ ६९६ ॥

697) [ सर्वतो वसति धरा सन्ति नरेन्द्रा गुणा अर्घ्यन्ति। तत् किं सहन्ते गुणिनोऽनादरमर्थवताम् ॥ ] सर्वतो धरा वसति, नरेन्द्राः सन्ति, गुणा अर्घ्यन्ते । ततः किं सहन्ते गुणिनोऽनादरमर्थवताम् । यदि सर्वत्र वासः, सर्वत्र नरेन्द्राः, सर्वत्र गुणाः पूज्यन्ते ॥ ६९७ ॥

698) [ यस्य न गृह्णन्ति गुणान् सुजना गोष्ठीषु रणमुखे सुभटाः। निजजननीयौवनोच्छेदकेन किं तेन जातेन ॥ ६९८ ॥ ]

699) [ किं तेन जातेनापि पुरुषेण पदपूरणेऽप्यसमर्थेन । येन न यशसा भृतं सरिदिव भुवनान्तरं सकलम् ॥ ] किं तेन जातेनापि पुरुषेण पदपूरणेऽप्यसमर्थेन, येन यशसा सकलं सरिदिव भुवनान्तरं न भृतम् ॥ ६९९ ॥

700) [ देशे ग्रामे नगरे राजपथे त्रिकचतुष्कमार्गे वा । यस्य न प्रसरति कीर्तिर्धिगस्तु किं तेन जातेन ॥ ७०० ॥ ]

701) [ किं तेनागतेन वा किं वा प्रसृताक्षि तेन वा गतेन । यस्य कृते रणरणको नगरे न गृहे गृहे भवति ॥ ] किं तेनागतेन वा किं वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ७९. पुरिसणिंदावज्जा [ पुरुषनिन्दापद्धतिः ]

702) उड्ढं वच्चंति अहो वयंति मूलंकुर व्व भुवणम्मि ।
विज्जाहियए कत्तो कुलाहि पुरिसा समुप्पन्ना ॥ १ ॥

703) नियकम्मेहि वि नीयं उच्चं पुरिसा लहंति संठाणं ।
सुरमंदिरकूवयरा उड्ढहमुहा य वच्चंति ॥ २ ॥

704) एक्कम्मि कुले एक्कम्मि मंदिरे[1] एक्ककुक्खिसंभूया ।
एक्को नरसयसामी अन्नो एक्कस्स असमत्थो ॥ ३ ॥

705) सज्जणसलाहणिज्जे पयम्मि अप्पा न ठाविओ जेहिं ।
सुसमत्था जे न परोवयारिणो तेहि वि न किं पि[2] ॥ ४ ॥

प्रसृताक्षि तेन गतेन (वा)। यस्य कृते रणरणको न गृहे गृहे भवति ॥ ७०१ ॥

702) [ ऊर्ध्वं व्रजन्त्यधो व्रजन्ति मूलाङ्कुरा इव भुवने । विद्याधिके कुतः कुलात् पुरुषाः समुत्पन्नाः ॥] पुरुषा ऊर्ध्वं व्रजन्ति अधो व्रजन्ति मूलाङ्कुरा इव भुवनतले। विद्याधिके कुतः कुलात् पुरुषाः समुत्पन्नाः ॥७०२॥

703) [ निजकर्मभिरपि नीचमुच्चं पुरुषा लभन्ते संस्थानम् । सुरमन्दिरकूपकरा ऊर्ध्वाधोमुखाश्च व्रजन्ति ॥ ] निजकर्मभिरेव पुरुषा नीचमुच्चं संस्थानं लभन्ते । क इव । सुरमन्दिरकूपकरा ऊर्ध्वाधोमुखा व्रजन्ति। कूपस्थिततुला रिक्तभृता सती नीचोच्चं स्थानं प्राप्नोति ॥ ७०३ ॥

704) [ एकस्मिन् कुल एकस्मिन् मन्दिर एककुक्षिसंभूतौ । एको नरशतस्वाम्यन्य एकस्यासमर्थः ॥ ] एकस्मिन् गृहे, एकस्मिन् कुले, एकस्यां कुक्षौ समुद्भूतौ द्वौ भवतः । तन्मध्य एको नरशतस्वामी, अन्यश्चैकस्यापि भर्तुं न समर्थः ॥ ७०४ ॥

705) [ सज्जनश्लाघनीये पद आत्मा न स्थापितो यैः । सुसमर्था ये न परोपकारिणस्तैरपि न किमपि ॥ ] सज्जनश्लाघनीये पद आत्मा यैर्नारोपितस्तैः किमपि प्रयोजनं नास्ति । ते निरर्थका इत्यर्थः । न केवलमेते । सुष्ठु समर्था अपि ये न परोपकारिणो भवन्ति, तैश्चापि किम् । परोपकारं

1 G, [ एक्कम्मि घरे एक्कम्मि कुले 2 G कि चि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ८०. कमलवज्जा [ कमलपद्धतिः ]

706) हिट्ठकयकंटयाणं पयडियकोसाण मित्तसमुहाणं ।
मामि गुणवंतयाणं कह कमले वसउ न हु कमला ॥ १ ॥

707) अन्नन्न[1]लग्गकयपत्तपरियणे निहयगुरुजडाजाले ।
मित्तालोयणसुहिए कह कमले वसउ न हु कमला ॥ २ ॥

708) पयडियकोसगुणड्ढे तह य कुलीणे सुपत्तपरिवारे ।
एवंविहे वसंती कमले कमले कयत्था सि ॥ ३ ॥

709) जडसंवाहियफरुसत्तणस्स निण्हवियणियगुणोहस्स ।
रे कमल तुज्झ कमला निवसइ रत्ताण पत्ताण ॥ ४ ॥

कर्तुमलंकर्मीणा ये न कुर्वन्ति ( परोपकारं ) तैरपि न किमपि । तेषामजननिरेव भवतु ॥ ७०५ ॥

706) [ अधःकृतकण्टकानां प्रकटितकोशानां मित्रसंमुखानाम् । सखि गुणवतां कथं कमले वसतु न खलु कमला ॥ ] अधःकृतकण्टकानां प्रकटितकोशानां — कोशोऽत्र कमलान्तर्वर्तिनी कर्णिका — सूर्यसंमुखानां गुणवतां, हे मामि सखि, एवंविधे कमले कथं कमला न वसति । अपि तु वसत्येव । अयमर्थः । अधःकृतदुर्जने, प्रकटितमाण्डागारे, सुहृत्संमुखे गुणवति पुंसि कथं न श्रीर्वसति । अपि त्वलंकरोत्येव ॥ ७०६ ॥

707) [ अन्योन्यलग्नकृतपत्र( पात्र )परिजने निहतगुरुजटाजाले । मित्रालोकनसुखिते कथं कमले वसतु न खलु कमला ॥ ७०७ ॥]

708) [ प्रकटितकोशगुणाढ्ये तथा च कुलीने सुपत्रपरिवारे । एवंविधे वसन्ती कमले कमले कृतार्थासि ॥ ] प्रकटितकोशगुणाढ्ये तथा च कुलीने पृथ्वीलीने सुपत्रपरिवारे, एवंविधे कमले वसन्ती हे कमले लक्ष्मि कृतार्थासि ॥ ७०८ ॥

709) [ जडसंवाहितपरुषत्वस्य निह्नुतगुणौघस्य । रे कमल तव कमला निवसति रक्तानां पत्राणाम् ॥ ७०९ ॥ ]

---

1 C, G, I Laber अन्नाण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



710) जइ पलहिगुणा परच्छिद्दछायणे¹ तह नु कमल जइ तुज्झ।
ता इह सयले लोए का उवमा तव ठविज्जंति ॥ ५ ॥

८१. कमलणिंदावज्जा ( कमलनिन्दापद्धतिः )

711) अलियालावे वियसंत कमल कलिओ सि रायहंसेहिं।
ता सुंदरं न होही तुज्झ फलं कालपरिणामे ॥ १ ॥

712) अप्पं² परं न याणसि नूणं सउण्णो सि लच्छिपरियरिओ।
उज्जलसमुहो पेच्छह ता वयणं पि हु न ठावेइ ॥ २ ॥

713) लच्छीए परिगहिया उड्ढमुहा जइ न हुंति ता पेच्छ।
जेहिं चिय उड्ढविया तं च्चिय नालं न पेच्छंति ॥ ३ ॥

710) [ यथा कर्पासगुणाः परच्छिद्रच्छादने तथा नु कमल यदि तव। तद् इह सकले लोके का उपमास्तव स्थाप्यन्ते ॥ ] यथा पलहिगुणा कर्पासगुणाः परच्छिद्राच्छादने, तथा अहो यदि तव भवन्ति, तत इह अस्मिन् सकले लोके का उपमास्तव स्थाप्यन्ते। अपि तु सर्वोपमापात्रं भवसि ॥ ७१० ॥

711) [ अल्यालापे विकसत् कमल कलितमसि राजहंसैः। तत् सुन्दरं न भविष्यति तव फलं कालपरिणामे ॥ ] अल्यालापे विकसद्वे कमल कलितोऽसि ( ? कलितमसि ) राजहंसैः। ततस्तव फलं परिणामे काल-परिणामे सुन्दरं न भविष्यति ॥ ७११ ॥

712) [ आत्मानं परं न जानासि नूनं सगुणोऽसि लक्ष्मीपरिचरितः। उज्ज्वलसंमुखः प्रेक्षध्वं तद्वदनमपि खलु न स्थापयति ॥ ] आत्मानं परं च न जानीषे। नूनं सपुण्योऽसि लक्ष्म्या परिकरितः। उज्ज्वलसमुहः ( ? उज्ज्वलसंमुखः ) पश्यत, तद्वदनमपि न खलु स्थापयसि ॥ ७१२ ॥

713) [ लक्ष्म्या परिगृहीता ऊर्ध्वमुखा यदि न भवन्ति तत्प्रेक्षस्व। यैरेवोर्ध्वीकृतानि तान्येव नालानि न प्रेक्षन्ते ॥ ] हे पंकज, लक्ष्मीपरि-गृहीता यद्यूर्ध्वमुखा न भवन्ति ततः पश्यैतानि कमलानि यैरेवोर्ध्वीकृतानि तान्येव नालानि न पश्यन्ति ॥ ७१३ ॥

1 G परछिद्दछायणा 2 C, G, I अप्पा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



714) लच्छिणिलयसमुत्ताणवयण गुणिणो सयाणुलग्गस्स ।
नियणालस्स वि विमुहो ता पंकय कस्स समुहो सि ॥ ४ ॥

715) वड्ढावियकोसो जं सि कमल परिसोसिएहि पत्तेहिं ।
अच्छउ ता लच्छिपओ तं चिय नामं पि हारिहिसि ॥ ५ ॥

716) मित्तो सूरो कयपत्तपरियरो लच्छिआलओ कमलो ।
पयहीणस्स सहारो केणावि न सक्किओ निमिसं ॥ ६ ॥

717) सरसाण सूरपरिसंठियाण कमलाण कीस उवयारो ।
उक्खयमूला सुक्खंतपंकया कह न संठविया ॥ ७ ॥

---

714) [ लक्ष्मीनिलयनत्थोत्तानवदन गुणिनः सदानुलग्नस्य । निज-नालस्यापि विमुखं तत् पङ्कज कस्य संमुखमसि ॥ ] हे पंकज, लक्ष्मी-निलयनोत्तानवदन, गुणिनः सदानुलग्नस्य, एवंविधस्य निजनालस्यापि विमुखस्ततोऽन्यस्य कस्य संमुखो भविष्यसि । अपि तु न कस्यापि । यः खलु लक्ष्म्यालिङ्गितः स यथात्मीयानपि प्रति निष्फलः, स परान् प्रति कथं सफलो भविष्यतीति ॥ ७१४ ॥

715) [ वर्धितकोशं यदसि कमल परिशोषितैः पत्रैः । आस्तां तावल्लक्ष्मीपदं तदेव नामापि हारयिष्यसि ॥ ] यद् हे कमल वर्धितकोशोऽसि । कैः । परिशोषितैः पत्रैः । आस्तां तावल्लक्ष्मीस्थानं, तदेव नामापि हारिष्यसि (? हारयिष्यसि ) ॥७१५॥

716) [ मित्रं सूर्यः, कृतपत्रपरिकरं लक्ष्म्यालयः कमलम् । पयोहीनस्य (पदहीनस्य ) साधारः केनापि न शक्तो निमिषम् ॥ ] कमलस्य किल सूर्यो मित्रम् । तच्च कृतपत्रपरिग्रहम् । लक्ष्म्यालयम् (? लक्ष्म्यालयः ) । पयोहीनस्य सधारः (? साधारः ) केनापि वर्तुं न शेके निमिषमात्रमपि ॥ ७१६ ॥

717) [ सरसानां सूर्यपरिसंस्थितानां कमलानां कीदृगुपकारः । उत्खातमूलानि शुष्यत्पङ्कानि कथं न संस्थापितानि ॥ ] सरसानां सूरपरि-संस्थितानां कमलानां कीदृगुपकारः । जानामि यदि सूर्य उत्खातमूलानि शुष्यत्पङ्कानि संस्थापयति ॥ ७१७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ८२. हंसमाणसवज्जा ( हंसमानसपद्धतिः )

718) छंडिज्जइ हंस सरं कत्तो वासो परम्मुहे दिव्वे ।
जाव न ठवेइ चलणे कूडबओ मत्थए एण्हिं ॥ १ ॥

719) पढमं चिय जे विगया घणागमे साहु ताण हंसाणं ।
जेहिं न दिट्ठं उच्चासणट्ठियं खलबयकुडुंबं ॥ २ ॥

720) इयरविहंगमपयपंतिचित्तला जत्थ पुलिणपेरंता ।
तत्थ सरे न हु जुत्तं वसियव्वं रायहंसाणं ॥ ३ ॥

721) विविहविहंगमणिवहेण मंडियं पेच्छिऊण कमलवणं ।
मुक्कं माणब्भरिएहि माणसं रायहंसेहिं ॥ ४ ॥

718) [ त्यज्यते हंस सरः कुतो वासः पराङ्मुखे दैवे । यावन्न स्थापयति चरणौ कूटबको मस्तक इदानीम् ॥ ] हे हंस सरस्त्यज्यते । यतः कुतो वासः पराङ्मुखे दैवे । यावन्न स्थापयति चरणौ मस्तके कूटबक इदानीम् । अयं भावः । कश्चिन्मनस्वी क्वापि मूर्खप्रधाने ग्रामे वसन् केनचिदेवमुच्यते ॥ ७१८ ॥

719) [ प्रथममेव ये विगता घनागमे साधु तेषां हंसानाम् । यैर्न दृष्टमुच्चासनस्थितं खलबककुटुम्बम् ॥ ] प्रथममेव ये गता मानसं घनागमे, साधु तेषां हंसानाम् । किमित्येवमुच्यते । यैर्न दृष्टं खलबककुटुम्बकम् उच्चासनस्थितम् । वरमन्यत्र गमनं विदुषां[1], न तु मूर्खस्य मूर्खैः क्रियमाणः सत्कारो दृष्टः ॥ ७१९ ॥

720) [ इतरविहङ्गमपदपङ्क्तिचित्रिता यत्र पुलिनपर्यन्ताः । तत्र सरसि न खलु युक्तं वसितव्यं राजहंसानाम् ॥ ] इतरविहङ्गमपदपङ्क्तिचित्रिता यत्र पुलिनपर्यन्ताः, तस्मिन्नेवंविधे सरसि न खलु युक्तं राजहंसानामुषितुम्[2] ॥ ७२० ॥

721) [ विविधविहङ्गमनिवहेन मण्डितं प्रेक्ष्य कमलवनम् । मुक्तं मानभृतैर्मानसं राजहंसैः ॥ ] राजहंसैर्मानसं सरो मुक्तम् । किंविशिष्टैः । मानभृतैर्मनस्विभिः । किं कृत्वा । प्रेक्ष्य । किंविशिष्टम् । विविधविहङ्गमनिवहमण्डितं कमलवनम् ॥ ७२१ ॥

1 G, I विदुषः 2 I उषितम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ८३. चक्कवायवज्जा ( चक्रवाकपद्धतिः )

722) अद्धत्थमिए सूरे जं दुक्खं होइ चक्कवायस्स।
तं होउ तुह रिऊणं अहवा ताणं पि मा होउ ॥ १ ॥

723) भूमीगयं न चत्ता सूरं दट्ठूण चक्कवाएण।
जीयग्गल व्व दिन्ना मुणालिया विरहभीएण ॥ २ ॥

724) अग्गि व्व पउमसंडं चिय व्व नलिणी मडो व्व अप्पा णं।
चक्केण पियाविरहे मसाणसरिसं सरं दिट्ठं ॥ ३ ॥

725) आसासिज्जइ चक्को जलगयपडिबिंबदंसणासाए।
तं पि हरंति तरंगा पेच्छह निउणत्तणं विहिणो ॥ ४ ॥

---

722) [ अर्धास्तमिते सूर्ये यद् दुःखं भवति चक्रवाकस्य। तद्भवतु तव रिपूणामथवा तेषामपि मा भवतु ॥ ] अर्धास्तमिते सूर्ये यद् दुःखं भवति चक्रवाकस्य, तद्भवतु तव रिपूणाम् अथवा तेषामपि मा भवतु। सूर्यास्तमने किल चक्रवाक्या सह वियोगप्रारम्भः। इतः परं सकलामपि रात्रिं जीवितेश्वर्या सह वियोगदुःखमनुभविष्यामीति चिन्तागृहीतस्य चक्रवाकस्य दुःखमिति ॥ ७२२ ॥

723) [ भूमिगतं न त्यक्ता सूर्यं दृष्ट्वा चक्रवाकेण। जीवार्गलेव दत्ता मृणालिका विरहभीतेन ॥ ] भूमिगतं सूर्यं दृष्ट्वा विरहभीतेन चक्रवाकेण मृणालिका न त्यक्ता। तर्हि किं कृता इत्याह। जीवार्गला दत्तेव। अयमर्थः। मृणालिकां भक्षयंश्चक्रवाकः सूर्यास्तमनमालोक्य कथं प्रियाविरहवेदनाव्यतिकरं सोढास्मीति चञ्चूस्थितामपि मृणालिकामर्गलाप्रायां जीवगमनभयादिव न मुमोचेति ॥ ७२३ ॥

724) [ अग्निरिव पद्मषण्डं चितेव नलिनी मृतक इवात्मा खलु। चक्रेण प्रियाविरहे श्मशानसदृशं सरो दृष्टम् ॥ ] चक्रेण चक्रवाकेण सरः श्मशानसदृशं दृष्टम्। श्मशानसादृश्यमाह। श्मशाने किल अग्न्यादयो भवन्ति। अग्निरिव पद्मषण्डं, चितेव नलिनी, मृतकमिव आत्मानं ( ? मृतक इव आत्मा )। दृष्टमिति सर्वत्र संबध्यते ॥ ७२४ ॥

725) [ आश्वास्यते चक्रो जलगतप्रतिबिम्बदर्शनाशया। तामपि हरन्ति तरङ्गाः प्रेक्षध्वं निपुणत्वं विधेः ॥ ] आश्वास्यते चक्रो जलगत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



726) आसंति संगमासा गमंति रयणि सुहेण चक्काया ।
दियहा न य हुंति विओयकायरा कह नु वोलंति ॥ ५ ॥

727) अलियं जंपेइ जणो जं पेम्मं होइ अत्थलोहेण ।
सेवालजीवियाणं कओ धणं चक्कवायाणं ॥ ६ ॥

## ८४. चंदणवज्जा ( चन्दनपद्धतिः )

728) सुसिएण निहसिएण वि तह कह वि हु चंदणेण महमहियं ।
सरसा वि कुसुममाला जह जाया परिमलविलक्खा ॥ १ ॥

प्रतिबिम्बदर्शनाशया, तानपि हरन्ति तरङ्गाः कल्लोलाः । अत एव पश्यत निपुणत्वं विधेः । चक्रवाकः किल 'इयं मम प्राणवल्लभा' इति स्वकीयं प्रतिबिम्बं जलस्थितमवलोक्य उदश्वसीत् । तत्रापि हतविधिपरिणामेन[1] तदात्मप्रतिबिम्बम् अम्बुनि गतम् ऊर्मय एव विनाशयन्ति ॥ ७२५ ॥

726) [ आसते संगमाशया गमयन्ति रजनीं सुखेन चक्रवाकाः । दिवसा न च भवन्ति वियोगकातराः कथं नु व्यतिक्रामन्ति ॥ ] चक्रवाकाः संगमाशया आसते, रजनीं गमयन्ति सुखेन, दिवसा न च भवन्ति वियोगकातराः कथम् नु अतिक्रामन्ति ॥ ७२६ ॥

727) [ अलीकं जल्पति जनो यद् प्रेम भवत्यर्थलोभेन । शैवालजीविकानां कुतो धनं चक्रवाकाणाम् ॥ ] जनोऽलीकं मृषा जल्पति, यत् प्रेम अर्थलोभेन भवति । अर्थनिमित्तं स्नेहो भवतीति यद् कथयति तन्मृषा । तदेव दृष्टान्तेन साधयति । शैवालजीविकानां चक्रवाकाणां कुतो धनम् ॥ ७२७ ॥

728) [ शोषितेन निघर्षितेनापि तथा कथमपि खलु चन्दनेन प्रसृतम् । सरसापि कुसुममाला यथा जाता परिमलविलक्षा ॥ ] तथा कथमपि चन्दनेन महमहितम् । किंविशिष्टेन । शोषितेन निघर्षितेनापि । यथा सरसापि सुगन्धापि कुसुममाला पुष्पस्रक् परिमलविलक्षा जाता ॥ ७२८ ॥

1 G °परिणमने, I °परिणमनेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



729) परसुच्छेयपहरणेण निहसणे[1] नेय उज्झिया पयई ।
चंदण संनयसीसो तेण तुमं वंदए लोओ ॥ २ ॥

730) उत्तमकुलेसु जम्मं तुह चंदण तरुवराण मज्झम्मि ।
दुज्जीहाण खलाण य निच्चं चिय तेण अणुरत्तो ॥ ३ ॥

731) एक्को च्चिय दोसो तारिसस्स चंदणदुमस्स विहिघडिओ ।
जीसे दुट्ठभुयंगा खणं पि पासं न मेल्लंति ॥ ४ ॥

732) बहुतरुवराण मज्झे चंदणविडवो भुयंगदोसेण ।
छिज्जइ निरावराहो साहु व्व असाहुसंगेण ॥ ५ ॥

## ८५. वडवज्जा ( वटपद्धतिः )

733) जाओ सि कीस पंथे अहवा जाओ सि कीस फलिओ सि ।
अह फलिओ सि महादुम ता सउणविडंबणं सहसु ॥ १ ॥

---

729) [ परशुच्छेदप्रहरणेन निघर्षणेन नैवोज्झिता प्रकृतिः । चन्दन संनतशीर्षस्तेन त्वां वन्दते लोकः ॥ ] परशुच्छेदप्रहरणनिघर्षणैर्नैव त्यक्ता प्रकृतिः । हे चन्दन संनतशिरास्तेन त्वां वन्दते लोकः[1] ॥ ७२९ ॥

730) [ उत्तमकुलेषु जन्म तव चन्दन तरुवराणां मध्ये । द्विजिह्वानां खलानां च नित्यमेव तेनानुरक्तः ॥ ] हे चन्दन तरुवराणां मध्ये तवोत्तमकुलेषु जन्म । द्विजिह्वानां खलानां च तेन हेतुना त्वमनुरक्तोऽसि । प्रकारान्तरेणोपालम्भः ॥ ७३० ॥

731) [ एक एव दोषस्तादृशस्य चन्दनद्रुमस्य विधिघटितः । यस्य दुष्टभुजङ्गाः क्षणमपि पार्श्वं न मुञ्चन्ति ॥ ] तादृशस्य चन्दनद्रुमस्यैक एव दोषो विधिकृतो, यस्य दुष्टभुजङ्गाः क्षणमपि पार्श्वं न मुञ्चन्ति ॥ ७३१ ॥

732) [ बहुतरुवराणां मध्ये चन्दनविटपो भुजङ्गदोषेण । छिद्यते निरपराधः साधुरिवासाधुसङ्गेन ॥ ] बहुतरुवराणां मध्ये चन्दनवृक्षो भुजङ्गदोषेण छिद्यते निरपराधः साधुरिवासाधुसङ्गेन ॥ ७३२ ॥

733) [ जातोऽसि कस्मात्पथि, अथवा जातोऽसि कस्मात्फलितोऽसि । अथ फलितोऽसि महाद्रुम तच्छकुनविडम्बनां सहस्व ॥ ] हे

---

1 G I add : छेदनेऽपि निघर्षणेऽपि नतशिरस्त्वम् , अतो भवन्तं लोको वन्दते ।

For Private And Personal Use Only

734) नीरस-करीर-खरखइरसंकुले विसमसमिमरुदेसे।
का होज्ज गई पहियाण जं सि वडपायव न होंतो ॥ २ ॥
735) भूमीगुणेण वडपायवस्स जइ तुंगिमा हदं होइ।
तह वि हु फलाण रिद्धी होसइ बीयाणुसारेण ॥ ३ ॥

## ८६. तालवज्जा ( तालपद्धतिः )

736) किं ताल तुज्झ तुंगत्तणेण गयणद्धरुद्धमग्गेण।
छुहजलणताविएहि वि उवहेप्पसि जं न पहिएहिं ॥ १ ॥
737) छायारहियस्स निरासयस्स दूरयरदावियफलस्स।
दोसेहि समा जा का वि तुंगिमा तुज्झ रे ताल ॥ २ ॥

---

महाद्रुम किमिति पथि जातोऽसि। यदि जातस्तदा किमिति फलितोऽसि। अथ चेत्फलितस्तदा शकुनविडम्बनां सहस्व ॥ ७३३ ॥

734) [ नीरसकरीर-खर-खदिरसंकुले विषमशमीमरुदेशे। का भवेद्गतिः पथिकानां यदसि वटपादप न भवन् ॥ ] नीरसा ये करीराः खराश्च ये खदिरास्तैः संकुले। तथा विषमाः शम्यो यत्रासौ विषमशमिः ( ? विषमशमीकः )। एवंविधो यो मरुदेशस्तस्मिन् नीरसकरीरतीक्ष्णखदिरसंकुले विषमशमीमरुदेशे। तत्र हे वटपादप का गतिर्भवेत् पथिकानां यदि त्वं नाभविष्यः ॥ ७३४ ॥

735) [ भूमिगुणेन वटपादपस्य यदि तुङ्गत्वमिह भवति। तथापि खलु फलानामृद्धिर्भविष्यति बीजानुसारेण ॥ ] भूमिगुणेन वटपादपस्य यदि तुंगिमा तुङ्गत्वं भवति, तथापि फलानामृद्धिर्बीजानुसारेण भवित्री। यद्यपि भूमिगुणेन वटवृक्षो ह्रस्वः संजातस्तथापि फलप्राचुर्यं तथा भविष्यति येन सर्वेऽपि प्राणिनः सुखिता[1] भविष्यन्ति ॥ ६३५ ॥

736) [ किं ताल तव तुङ्गत्वेन गगनार्धरुद्धमार्गेण। क्षुधाज्वलनतापितैरप्युपगृह्यसे यन्न पथिकैः ॥ ] हे ताल तव तुंगत्वेन किं गगनार्धरुद्धमार्गेण[2]। क्षुधाज्वलनतापितैरुपगृह्यसे यन्न पथिकैः ॥ ७३६ ॥

737) [ छायारहितस्य निराश्रयस्य दूरतरदर्शितफलस्य। दोषैः समं यत् किमपि तुङ्गत्वं तव रे ताल ॥ ] रे ताल या[3] कापि तव तुंगिमा

---

1 I सुहिताः 2 G गगनावरुद्धमार्गेण which presupposes the reading गयणावरुद्धमग्गेण 3 I यः कोऽपि तुंगिमा तुंगत्वं स दोषैः समस्तुल्यः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



738) जेहिं नीओ वड्ढिं तालो सयसालिलदाणसेवाए।
तस्सेव जो न फलिओ सो फलिओ कह नु अन्नस्स ॥ ३ ॥

८७. पलासवज्जा ( पलाशपद्धतिः )

739) मउलंतस्स य मुक्का तुज्झ पलासा पलास सउणेहिं।
जेण महुमाससमए नियवयणं झत्ति सामलियं ॥ १ ॥

740) अच्छउ ता फलणिवहं फुल्लणदियहम्मि कलुसियं वयणं।
इय कलिऊण पलासो झड त्ति मुक्को सपत्तेहिं ॥ २ ॥

741) दहूण किंसुया साहा तं बालाइ कीस वेलविओ।
अहवा न तुज्झ दोसो को न हु छलिओ पलासेहिं ॥ ३ ॥

---

तुझत्वं, सा दोषैः समा तुल्या। छायारहितस्य, निराश्रयस्य दूरतरदर्शित-फलस्य ॥ ७३७ ॥

738) [ यैर्नीतो वृद्धिं तालः शतसलिलदानसेवया। तस्यैव यो न फलितः स फलितः कथं न्वन्यस्य ॥ ] यैर्वृद्धिं नीतस्तालः शतसलिलदान-सेवया, तस्यैव यो न फलितः स फलितः कथं न्वन्यस्य ॥ ७३८ ॥

739) [ मुकुलयतश्च मुक्तास्तव पलाशाः पलाश शकुनैः। येन मधुमाससमये निजवदनं झटिति श्यामलितम् ॥ ] मुकुलयतोऽपि रे पला-शवृक्ष शकुनैस्तव पलाशा मुक्ताः। येन हेतुना त्वया मधुमाससमये वसन्ते निजं वदनं श्यामलितम्। अयं भावः। यः कोऽपि धनी भवति, स वृद्धिं व्रजन् याच्यमानश्चेद् वदनचन्द्रं कोपकलङ्कितं विधत्ते तस्याशां याच-कास्त्यजन्ति ॥ ७३९ ॥

740) [ आस्तां तावत्फलनिवहः पुष्पणदिवसे कलुषितं वदनम्। इति कलयित्वा पलाशो झटिति मुक्तः स्वपत्रैः ॥ ] आस्तां तावत् फल-निवहः। फुल्लनदिवसेऽपि कलुषितं वदनमिति कलयित्वा पलाशो झटिति मुक्तः स्वपत्रैर्निजच्छदैरेव। अयमर्थः। यः कोऽपि मुखं कलुषितं विधत्ते शुभवचनदानेऽपि, आस्तां दानप्रस्तावः,स स्वकीयैरेव पात्रैस्त्यज्यते ॥७४०॥

741) [ दृष्ट्वा किंशुक शाखास्त्वं बालया कस्माद् वञ्चितः। अथवा न तव दोषःको न खलु च्छलितः पलाशैः ॥ ] दृष्ट्वा हा इति खेदे ( ? )।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



742) गुरुविहववित्थरुत्थंभिरे वि किविणम्मि अत्थिणो विहला।
भण फलिए वि पलासे मणोरहा कस्स जायंति ॥ ४ ॥

743) सच्चं पलास जं फुल्लिओ सि फलिओ सि रहणिउंजेसु।
जइ होज्ज सुखज्जफलो मणं पि ता तुज्झ को मुल्लो ॥ ५ ॥

## ८८. वडवाणलवज्जा (वडवानलपद्धतिः)

744) सोसणमई उ निवससु वडवाणल मुणइ जाव न समुद्दो।
जाव य जाणिहिइ फुडं ता न तुमं नेय भुवणयलं ॥ १ ॥

त्वं बाल्या किमिति प्रतारितः। अथवा न तव दोषः, को नाम न च्छलितः पलाशैः'[1] ॥ ७४१ ॥

742) [ गुरुविभवविस्तरोत्तम्भनशीलेऽपि कृपणेऽर्थिनो विफलाः। भण फलितेऽपि पलाशे मनोरथाः कस्य जायन्ते ॥ ] गुरुविभवविस्तरोत्तम्भनशीलेऽपि कृपणेऽर्थिनो याचका विफला निष्फला एव। भण कथय फलितेऽपि पलाशे मनोरथाः कस्य जायन्ते, मह्यं दास्यतीति। गुरुलक्ष्मीलक्षितोऽपि कृपणः कमपि न कृतार्थिनं करोति ॥ ७४२ ॥

743) [ सत्यं पलाश यत्पुष्पितोऽसि फलितोऽसि रहोनिकुञ्जेषु। यदि भवेः सुखाद्यफलो मनागपि, तत् तव किं मूल्यम् ॥ ] हे पलाश रहोनिकुञ्जे पुष्पितोऽसि फलितोऽसि सत्यं, यदि त्वं सुखाद्यफलो भवेर्मनागपि, ततस्तव किं मूल्यम्। अपि तु अनर्घ्योऽसि ॥ ७४३ ॥

744) [ शोषणमतिस्तु निवस वडवानल जानाति यावन्न समुद्रः। यावत्समुद्रो ज्ञास्यति स्फुटं तावन्न त्वं नैव भुवनतलम् ॥ ] हे वडवानल, और्वाग्ने, तावत्त्वं शोषणमतिरेव निवस, यावत्समुद्रो न जानाति। यावत् समुद्रो ज्ञास्यति, तावत् त्वं नैव भुवनतलमिदम्। अयमाशयः। कश्चिद् दुष्टो दौष्ट्यं तावत्करोति यावदन्यः सत्पुरुषस्तद् निगृहीतकोपाटोपभ्रुकुटिलताऽलंकृतललाटो न जानाति। तेन च ज्ञातेन तदानीं (न) दुष्टो न चान्यः कोऽपि ॥ ७४४ ॥

1 G, I add : कल्याण पुत्तय इत्यादिवसन्तवर्णनेनैव व्याख्याता गाथा (Gatha No. 637) अत्र द्रष्टव्या।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



745) का समसीसी तियसिंदयाण वडवाणलस्स सरिसम्मि ।
उवसमियसिहिप्पसरो मयरहरो इंधणं जस्स ॥ २ ॥

८९. रयणायरवज्जा ( रत्नाकरपद्धतिः )

746) रयणायरेण रयणं परिमुक्कं जइ वि अमुणियगुणेण ।
तह वि हु मरगयखंडं जत्थ गयं तत्थ वि महग्घं ॥ १ ॥

747) जलणिहिमुक्केण वि कुत्थुहेण पत्तं मुरारिवच्छयलं ।
तेण पुण तस्स ठाणे न याणिमो को परिट्ठविओ ॥ २ ॥

748) मा दोसं चिय गेण्हह विरले वि गुणे पसंसह जणस्स ।
अक्खपउरो वि उवही भण्णइ रयणायरो लोए ॥ ३ ॥

745) [ का समशीर्षिका त्रिदशेन्द्राणां वडवानलस्य सदृशे । उपशमितशिखिप्रसरो मकरालय इन्धनं यस्य ॥ ] वडवानलस्य त्रिदशेन्द्राणां का स्पर्धा । यस्य वडवानलस्य इन्धनं समिद् मकरगृहं समुद्र उपशमित-शिखि-प्रसरः । वडवाग्निना सह स्पर्धां कथम् आदधताम् इन्द्रादयो देवाः, यस्योपशमितशिखिप्रसरः समुद्र एवेन्धनम् । सकलवह्निविध्यापकस्तावत्समुद्रस्तमपि यो ज्वालयतीति ॥ ७४५ ॥

746) [ रत्नाकरेण रत्नं परिमुक्तं यद्यप्यज्ञातगुणेन । तथापि खलु मरकतखण्डं यत्र गतं तत्रापि महार्घम् ॥ ] रत्नं रत्नाकरेणाज्ञातगुणेन यदि त्यक्तं, तथापि मरकतखण्डं यत्र गतं तत्रापि महार्घम् । अयमाशयः । यदि केनापि मूर्खशिरोमणिना ग्रामीणग्रामणिना कश्चिद् विपश्चित्प्रकाण्डस्त्यक्तः, सोऽन्यत्र गतः सकलनरनाथमूर्धवन्दनीयचरणः किं न भविष्यतीति॥७४६॥

747) [ जलनिधिमुक्तेनापि कौस्तुभेन प्राप्तं मुरारिवक्षःस्थलम् । तेन पुनस्तस्य स्थाने न जानीमः कः प्रतिष्ठापितः ॥ ] जलनिधिमुक्तेनापि कौस्तुभेन प्राप्तं मुरारिवक्षःस्थलम् । तेन समुद्रेण पुनस्तस्य स्थाने को नाम परिस्थापित इति वयं न विद्मः ॥ ७४७ ॥

748) [ मा दोषमेव गृह्णीत विरलानपि गुणान् प्रशंसत जनस्य । अक्षप्रचुरोऽप्युदधिः भण्यते रत्नाकरो लोके ॥ ] मा दोषमेव गृह्णीत, स्तोकानपि गुणान् जनस्य प्रशंसत । कथम् । यथा अक्षः कपर्दकभेदः,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



749) वेलामहल्लकल्लोलपेल्लियं जइ वि गिरिणइं पत्तं ।
अणुसरइ मग्गलग्गं पुणो वि रयणायरे रयणं ॥ ४ ॥

750) लच्छीइ विणा रयणायरस्स गंभीरिमा तह च्चेव ।
सा लच्छी तेण विणा भण कस्स न मंदिरं पत्ता ॥ ५ ॥

751) वडवाणलेण गहिओ महिओ य सुरासुरेहि सयलेहिं ।
लच्छीइ उवहि मुक्को पेच्छह गंभीरिमा तस्स ॥ ६ ॥

752) जलणं जलं च, अमियं[1] विसं च, कण्हो सदाणवो च्चेव ।
खीरोयहि तुज्झ तहा परमहिमा अहियअहिययरो ॥ ७ ॥

---

तत्प्रचुरोऽपि यद्यप्युदधिः, अक्षाः प्रचुरा यस्मिन् सोऽस्त्युदधिः, तथापि लोके रत्नाकर इति बध्यते ॥ ७४८ ॥

749) [ वेलामहाकल्लोलप्रेरितं यद्यपि गिरिणदीं प्राप्तम । अनुसरति मार्गलग्नं पुनरपि रत्नाकरे रत्नम् ॥ ] वेलामहदूर्मिप्रेरितं यद्यपि गिरिणदीं प्राप्तं तथा ( ? तथापि ) मार्गलग्नं पुनरपि रत्नाकरे रत्नमनुसरति । यद्यपि केनापि मुहूर्तवशेन कुतोऽपि नगरात् क्वापि पल्ल्यादौ विद्वान् पात्रम् आगच्छति तथापि मार्गलग्नस्तत्रैवायाति ॥ ७४९ ॥

750) [ लक्ष्म्या विना रत्नाकरस्य गम्भीरता तथैव । सा लक्ष्मीस्तेन विना भण कस्य न मन्दिरं प्राप्ता ॥ ] लक्ष्म्या विना रत्नाकरस्य तथैव गम्भीरिमा । सा च लक्ष्मीस्तेन विना कस्य न मन्दिरं प्राप्ता । अपि तु शुनीव गृहे गृहे परिबभ्रामेति रत्नाकरस्य महत्त्वकथनम् ॥ ७५० ॥

751) [ वडवानलेन गृहीतो मथितश्च सुरासुरैः सकलैः । लक्ष्म्योदधिर्मुक्तः प्रेक्षध्वं गम्भीरता तस्य ॥ ] उदधिः समुद्रस्तावद् वडवानलेन गृहीतः, तथा सुरासुरैर्मथितः, अन्यच्च लक्ष्म्या विमुक्तः, तथापि तस्योदधेर्गम्भीरिमाणं पश्यत । अयमाशयः । यः कोऽपि पुरुषसिंहः कष्टां दशां प्राप्तः केनापि याच्यमानः संपत्त्यक्तोऽपि भवति, स आत्मीयं गाम्भीर्यं न त्यजतीति ॥ ७५१ ॥

752) [ ज्वलनो जलं चामृतं विषं च कृष्णः सदानवश्चैव । क्षीरोदधे तव तथा परमहिमाधिकाधिकतरः ॥ ] हे क्षीरोदधे, ज्वलनं

---

1 G अमयं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



753) रयणेहि निरंतरपूरिएहि रयणायरस्स न हु गव्वो ।
करिणो मुत्ताहलसंसए वि मयविब्भला[1] दिट्ठी ॥ ८ ॥

754) अणवरयं देंतस्स वि तुट्टंति न सायरे वि रयणाई ।
पुण्णक्खएण खिज्जइ न हु लच्छी चायभोएहिं ॥ ९ ॥

755) रयणायरस्स न हु होइ तुच्छिमा निग्गएहि रयणेहिं ।
तह वि हु चंदसरिच्छा विरला रयणायरे रयणा ॥ १० ॥

756) रयणायरचत्तेण वि पत्तं चंदेण हरइ तिलयत्तं ।
तेण उण तस्स ठाणे न याणिमो को परिट्ठविओ ॥ ११ ॥

(? ज्वलन: ) तत्रैव जलम्, अमृतं विषं च, कृष्णः सदानवः । तव महिमा तथापि अधिको अधिकतर[2] एव । कोऽप्येकत्र वैरिसंघान् परस्परं स्थापयितुं किं कोऽपि शक्नोति त्वाम् ऋते ।। ७५२ ।।

753) [ रत्नैर्निरन्तरपूरितै रत्नाकरस्य न खलु गर्वः । करिणो मुक्ताफलसंशयेऽपि मदविह्वला दृष्टिः ।। ] रत्नैर्निरन्तरपूरितै रत्नाकरस्य न खलु गर्वोऽस्ति । करिणो हस्तिनः पुनर्मुक्तानां संशयेऽपि–सन्ति नो वा मुक्ताफलानीति संशये सति–मदविह्वला दृष्टिः ।। ७५३ ।।

754) [ अनवरतं ददतोऽपि न खलु त्रुट्यन्ति सागरेऽपि रत्नानि । पुण्यक्षयेण क्षीयते न खलु लक्ष्मीस्त्यागभोगाभ्याम् ।। ] अनवरतं ददतोऽपि रत्नाकरस्य न खलु क्षीयन्ते रत्नानि । पुण्यक्षयेण क्षीयते लक्ष्मीर्न खलु त्यागभोगाभ्याम् ।। ७५४ ।।

755) [ रत्नाकरस्य न खलु भवति तुच्छत्वं निर्गतै रत्नैः । तथापि खलु चन्द्रसदृक्षाणि विरलानि रत्नाकरे रत्नानि ।। ] रत्नाकरस्य न खलु भवति तुच्छत्वं निर्गतै रत्नैः । यद्यप्येवमस्ति, तथापि चन्द्रसदृक्षाणि विरलानि रत्नाकरे रत्नानि । अयं ग्रन्थः प्रायेण अपभ्रंशभाषानुसारी । अत्र च अपभ्रंशभाषायां क्वचिन्नपुंसकेऽपि पुंस्त्वमिति ।। ७५५ ।।

756) [ रत्नाकरत्यक्तेनापि प्राप्तं चन्द्रेण हरस्य तिलकत्वम् । तेन पुनस्तस्य स्थाने न जानीमः कः प्रतिष्ठापितः ।। ] रत्नाकरपरित्यक्तेनापि

---

1 G, I मयभिभला 2 G अधिकाधिकतर एव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



757) जइ वि हु कालवसेणं ससी समुद्दाउ कह वि विच्छुडिओ।
तह वि हु तस्स पयावं( ? पयासो )आणंदं कुणइ दूरे वि॥१२॥
758) रयणाइ सुराण समप्पिऊण वडवाणलस्स छुहियस्स।
अप्पा ( ? अप्पं ) देंतेण तए समुद्द मुद्दंकियं भुवणं ॥ १३ ॥
759) अत्थि असंखा संखा धवला रयणायरस्स संभूया।
न हु ताण सद्दलद्धी जा जाया पंचजण्णस्स ॥ १४ ॥
760) जाएण तेण धवलीकओ सि नूणं समुद्द संखेण।
अत्थित्तणेण हत्थं पसारियं जस्स कण्हेण ॥ १५ ॥

प्राप्तं चन्द्रेण हरस्य तिलकत्वम्। तेन पुनस्तस्य स्थाने को नाम परिस्थापित इति वयं न विद्मः ॥ ७५६ ॥

757) [ यद्यपि खलु कालवशेन शशी समुद्रात् कथमपि वियोजितः। तथापि खलु तस्य प्रतापः ( ? प्रकाशः ) आनन्दं करोति दूरेऽपि ॥ ] यद्यपि शशी चन्द्रः समुद्रात् कालवशेन कथमपि विच्छुटितः, तथापि तस्य प्रतापम् ( ? प्रतापः, प्रकाशः ) आनन्दं दूरेऽपि करोति ॥ ७५७ ॥

758) [ रत्नानि सुरेभ्यः समर्प्य वडवानलाय क्षुधिताय। आत्मानं ददता त्वया समुद्र मुद्राङ्कितं भुवनम् ॥ ] रत्नानि चन्द्रलक्ष्मीकौस्तुभपारिजातमदिरोच्चैःश्रवऐरावणधन्वन्तरिप्रभृतीनि सुरासुरेभ्यः[1] समर्प्य वडवानलस्य क्षुधितस्यात्मानं ददता हे समुद्र त्वया भुवनं जगत् मुद्राङ्कितम्। अयमर्थः। यथा कोऽपि वदान्यः पात्रेभ्यः सर्वमपि वसुजातं[2] विश्राण्य, कस्मैचन विशिष्टाय[3]च्छेकायात्मानमर्पयन् सकलजगन्मण्डलमात्मयशसा पूरयति, जीमूतवाहनवत् ॥ ७५८ ॥

759) [ सन्ति असंख्याः शंखा धवला रत्नाकरस्य संभूताः। न खलु तेषां शब्दलब्धिर्या जाता पाञ्चजन्यस्य ॥] सन्ति असंख्याताः शंखाः। किंविशिष्टाः। धवलाः। पुनः किंविशिष्टाः। संभूताः। क। रत्नाकरे। न खलु तेषां शब्दलब्धिर्या जाता पाञ्चजन्यस्य श्रीविष्णुकरवदनपवित्रितस्य॥७५९॥

760) [ जातेन तेन धवलीकृतोऽसि नूनं समुद्र शंखेन। अर्थित्वेन हस्तः प्रसारितो यस्य कृष्णेन ॥ ] हे समुद्र तेन शंखेन जातेन धवली-

1 I पुरासुरेभ्यः 2 I वस्तुजातम् 3 G I मनशिष्टाय याचकाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ९०. समुद्दणिंदावज्जा ( समुद्रनिन्दापद्धतिः )

761) साहीणामयरयणो अमरमरोरं च भुवणमकरंतो ।
उल्लसिरीहि न लज्जसि लहरीहि तरंगिणीणाह ॥ १ ॥

762) रयणायर त्ति नामं वहंत ता उवहि किं न सुसिओ सि ।
मज्झे न जाणवत्ती अत्थत्थी जं गया पारे ॥ २ ॥

763) उवहि लहरीहि गव्विर गज्जंतो किं न दीह सुसिओ सि ।
जीसे गिम्हपिवासा वलंति वि परम्मुहा पहिया ॥ ३ ॥

764) सायर लज्जाइ कहं न मुओ चिंताइ कह न वीसण्णो ।
पइ हुंते वोहित्थियहि कओ जलसंगहो अन्नो ॥ ४ ॥

---

कृतोऽसि । नूनं निश्चयेन । यस्यार्थित्वेन कृष्णेन हस्तः प्रसारितः, हे समुद्र, अमुं शंखं मह्यं वितरेति॥ ७६० ॥

761) [ स्वाधीनामृतरत्नोऽमरमदरिद्रं च भुवनमकुर्वन् । उल्लसनशीलाभिर्न लज्जसे लहरीभिस्तरङ्गिणीनाथ ॥ ] हे तरङ्गिणीनाथ, उल्लसनशीलाभिर्लहरीभिरूर्मिभिरुपलक्षितो न लज्जसे । किं कुर्वन् । अमरं देवसमूहं ( ? ) भुवनम् अदरिद्रं चाकुर्वन् । किंविशिष्टः । स्वाधीनामृतरत्नः । यः कश्चिद् विभवप्राचुर्यनिर्जितधनदः परम् अददानः किमपि, स एवमुच्यते ॥ ७६१ ॥

762) [ रत्नाकर इति नाम वहंस्तद् उदधे किं न शुष्कोऽसि । मध्ये न यानवर्तिनोऽर्थार्थिनो यद्गताः पारे ॥ ] रत्नाकर इति नाम वहन् तत उदधे किं न शुष्कोऽसि । मध्ये न यानवर्तिनो अर्थार्थिनो यद्गताः पारे ॥ ७६२ ॥

763) [ उदधे लहरीभिर्गर्वोद्वहनशील गर्जन् किं न दीर्घं शुष्कोऽसि । यस्माद् ग्रीष्मपिपासा वलन्तेऽपि पराङ्मुखाः पथिकाः । ] उदधे लहरीभिर्गर्वोद्वहनशील, गर्जन् किं न शुष्कोऽसि । कथम् । दीर्घम् अत्यर्थम् । यस्माद् ग्रीष्मपिपासायाः पराङ्मुखाः पथिका व्याघुटन्ते ॥७६३॥

764) [ सागर लज्जया कथं न मृतश्चिन्तया कथं न विषण्णः । त्वयि सति प्रवहणस्थितैः कृतो जलसंग्रहोऽन्यः ॥ ] हे सागर लज्जया कथं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



765) बद्धो सि तुमं पीओ सि पुव्वयं लंघिओ सि तं उयहि[1]।
किं गज्जसि अलियजए न लज्जसे उयहि किं भणिमो॥ ५॥

766) निद्धोयउदयकंखिर पंथिय मा वच्च सायरो एस।
जत्थ नियत्तइ तण्हा अन्न च्चिय ते सरुद्देसा॥ ६॥

## ९१. सुवण्णवज्जा ( सुवर्णपद्धतिः )

767) जलणपवेसो चामीयरस्स कह सहि न जुज्जए काउं।
हद्धी जस्स परिक्खंति पत्थरा नवरि गुणणिवहं॥ १॥

न मृतोऽसि। कथं च चिन्तया न विषण्णोऽसि। यतस्त्वयि पानीयनिधौ सत्यपि बोहित्थियहि यानपात्रस्थितैर्जलसंग्रहोऽन्यश्चक्रे। यो जलानां निधिर्भवति तस्मिन् विद्यमाने को नाम जलसंग्रहं विधत्ते॥ ७६४॥

765) [ बद्धोऽसि त्वं पीतोऽसि पूर्वं लङ्घितोऽसि त्वमुदधे। किं गर्जस्यलीकजये न लज्जसे उदधे किं भणामः॥ ] बद्धोऽसि त्वं पर्वतैः। पीतोऽसि त्वम् अगस्तिना। तथा लङ्घितोऽसि वानरादिभिः। एवंविधस्त्वम् उदधेऽलीकजगति ( ? अलीकजये ) किं गर्जसि। उदधे त्वं न लज्जसे। किं पुनः पुनर्भणामः॥ ७६५॥

766) [ निर्धौतोदककांक्षणशील पथिक मा व्रज सागर एषः। यत्र निवर्तते तृष्णान्य एव ते सरउद्देशाः॥ ] हे पथिक, उदकाकांक्षणशील मा व्रज, अयं सागरः। यत्र निवर्तते तृष्णा, अन्य एव ते सरउद्देशाः। कश्चित्पथिकः पिपासाकुलो जलं वाञ्छन् समुद्रस्य जलं पश्यन् उत्तालः ( ? ) समायातः। तं तथाविधमागच्छन्तमवलोक्य केनचिदुच्यत इति॥ ७६६॥

767) [ ज्वलनप्रवेशश्चामीकरस्य कथं सखि न युज्यते कर्तुम्। हा धिग्यस्य परीक्षन्ते प्रस्तराः केवलं गुणनिवहम्॥ ] ज्वलनप्रवेशश्चामीकरस्य कथं सखि न युज्यते कर्तुं, हा धिग् यस्य नवरि केवलं गुणनिवहं प्रस्तराः परीक्षयन्ति। तस्य तादृग्विधस्य सुवर्णस्य पाषाणाः कथं परीक्षां विदधत इति कृत्वा ज्वलनमेव प्रविवेश लज्जामज्जद्वदनो मानी॥ ७६७॥

1 I तह उयहे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



768) जलणडहणेण न तहा पत्थरघसणेण खंडणे तह य।
गुंजाहलसमतुलणे जं दुक्खं होइ कणयस्स ॥ २ ॥

769) जूरिज्जइ किं न जए किं न जरा आवए अकालम्मि।
जह सक्खर तुलइ खली निरक्खरो कंचणं खंडं ॥ ३ ॥

770) नाराय निरक्खर लोहवंत दोमुह[1] य तुज्झ किं भणिमो।
गुंजाइ समं कणयं[2] तोलंतो कह न लज्जेसि ॥ ४ ॥

771) जह कणयं तह पडिमाणपत्थरं पेच्छ तुलइ नाराओ।
अहवा निरक्खराणं गुणदोसवियारणा कत्तो ॥ ५ ॥

---

768) [ ज्वलनदहनेन न तथा प्रस्तरघर्षणेन खण्डने तथा च। गुञ्जाफलसमतुलने यद् दुःखं भवति कनकस्य ॥ ] कनकस्य ज्वलनदहनेन तथा प्रस्तरघर्षणेन खण्डनेन तथा दुःखं न भवति, गुंजाफलसमतुलने यद् दुःखं ( भवति )। मानी जनश्छेदनदाहनिघर्षणादिकं परं सहते। न पुनरसमानजनेन सह साम्यम् ॥ ७६८ ॥

769) [ खिद्यते किं न जगति किं न जरागच्छत्यकाले। यथा साक्षरस्तुलयति खटिकां निरक्षरः काञ्चनं खण्डम् ॥ ] कथं न खिद्यते जगति किं न जरागच्छत्यकाले, यथा साक्षरस्तुलयति खटिकां, निरक्षरश्च काञ्चनं खण्डम् ॥ ७६९ ॥

770) [ नाराच निरक्षर लोहवन् द्विमुख च तव किं भणामः। गुञ्जाफलेन समं कनकं तोलयन् कथं न लज्जसे ॥ ] हे नाराच, निरक्षर, लोभवन्, दुर्मुख, निरक्षर, लोहवन्, दुर्मुख तव किं भणामः। [ हे नाराच निरक्षर, लोहवन् ( लोभवन् ) द्विमुख तव किं भणामः। ] गुंजाफलेन समं कनकं तोलयन् कथं न लज्जसे। यथा कश्चिदसमीक्ष्यकारी निरक्षरो लोभवान् दुर्मुखो ( ? द्विमुखो ) मूर्खेण नीचेन समं सत्पुरुषं विद्वांसं करोति स एवमुच्यते, असमंजसमसहमानेन ॥ ७७० ॥

771) [ यथा कनकं तथा प्रतिमानप्रस्तरं पश्य तोलयति नाराचः। अथवा निरक्षराणां गुणदोषविचारणा कुतः ॥ ] यथा कनकं तथा मान-

---

1 G, I दुम्मुहय 2 I गुंजाहलसमकणयं

For Private And Personal Use Only

## ९२. आइच्चवज्जा (आदित्यपद्धतिः)

772) भमिओ सि भमसि भमिहिसि अणुदिणु[1] पासम्मि मेरुसिहरस्स।
जइ पावसि कंचणमासयं पि ता सूर सूरो सि ॥ १ ॥
773) वियलियतेएण वि ससहरेण जह दंसिओ दिणे अप्पा।
तह जइ रयणीइ तुमं ता सच्चं सूर सूरो सि ॥ २ ॥
774) उयणं भुवणक्कमणं अत्थमणं एक्कदिवसमज्झम्मि[2]।
सूरस्स वि तिन्नि दसा[3] का गणणा इयरलोयस्स ॥ ३ ॥

## ९३. दीवयवज्जा (दीपकपद्धतिः)

775) सउणो नेहसउण्णो लोयल्लो लोयलोयणाणंदो।
नासियतमोहपसरो किं सुयणो नेह[4] जोइक्खो ॥ १ ॥

प्रस्तरं पश्य तोलयति नाराचः। अथवा निरक्षराणां मूर्खाणां गुणदोषविचारणा कुतः ॥ ७७१ ॥

772) [भ्रान्तोऽसि भ्रमसि भ्रमिष्यस्यनुदिनं पार्श्वे मेरुशिखरस्य। यदि प्राप्नोषि काञ्चनमाषकमपि तत् सूर्य शूरोऽसि ॥] भ्रान्तोऽसि, भ्रमसि भ्रमिष्यसि। क। मेरुशिखरस्य पार्श्वे। यदि प्राप्नोषि कांचनमाषकमपि, तदा हे सूर सूर्य, शूरोऽसि। अमुष्मान्मेरोर्लवमपि सुवर्णं न लप्स्यसे ॥ ७७२ ॥

773) [विगलिततेजसापि शशधरेण यथा दर्शितो दिने आत्मा। तथा यदि रजन्यां त्वं तत्सत्यं सूर्य शूरोऽसि ॥] विगलिततेजसापि शशधरेण यथात्मा दर्शितो दिने, तथा यदि रजन्यां त्वं दर्शयसि, तदा हे सूर्य सत्यं शूरोऽसि ॥ ७७३ ॥

774) [उदयनं भुवनाक्रमणमस्तमनमेकदिवसमध्ये। सूर्यस्यापि तिस्रो दशाः का गणनेतरलोकस्य ॥] उदयो भुवनाक्रमणं तथा चास्तमनमेवं तिस्रो गतयो यत्र सूर्यस्य, तत्रेतरलोकस्य कीटतुल्यस्य का गणना ॥ ७७४ ॥

775) सगुणः स्नेहसंपूर्ण आलोकवाँल्लोकलोचनानन्दः। नाशिततमओघप्रसरः किं सुजनो नेह ज्योतिष्कः ॥] सगुणः सवर्तिकः, तैल-

1 G, I अणुदिण 2 G, I तह य एक्कदियहम्मि 3 I गई 4 I नेय (= नैव)

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



776) जोइक्खो गिलइ तमं तं चिय उग्गिलइ कज्जलमिसेणं ।
अहवा सुद्धसहावा हियए कलुसं न धारेंति[1] ॥ २ ॥

777) नियमालएसु मलिणा कुणंति मलिणत्तणं जइच्छाए ।
गुणणेहकंतिजुत्तय न जुज्जए तुज्झ जोइक्ख ॥ ३ ॥

778) नियगुणणेहखयंकर मलिणं नियमालयं कुणंतस्स ।
जोइक्ख तुज्झ छाया परिचत्ता तेण सुयणेहिं ॥ ४ ॥

---

संपूर्णः, आलोकवान्,[2] लोकलोचनानन्दनः, नाशिततमओघप्रसरः, एवंविधः किं सुजनः, नहि नहि ज्योतिष्कः । ज्योतिर्विद्यते यस्मिन्निति ज्योतिष्को दीपः । सुजनोऽप्येवंविधो भवति । सगुणः, प्रेमसंपूर्णः, आलोकवान्, लोकलोचनानन्दनः, नाशिततमओघप्रसरः ॥ ७७५ ॥

776) [ ज्योतिष्को गिलति तमस्तदेवोद्गिरति कज्जलमिषेण । अथवा शुद्धस्वभावा हृदये कलुषं न धारयन्ति ॥ ] ज्योतिष्को गिलति तमस्तदेवोद्गिरति कज्जलमिषात् । अथवा शुद्धस्वभावा हृदि कलुषं न धारयन्ति ॥ ७७६ ॥

777) [ निजालयेषु मलिनाः कुर्वन्ति मलिनत्वं यथेच्छम् । गुणस्नेहकान्तियुक्त न युज्यते तव ज्योतिष्क ॥ ] मलिना निजालयेषु मलिनत्वं यदृच्छया कुर्वते । न तु स्वच्छचित्ताः । अत एव ज्योतिष्क उद्द्योतकर हे दीप गुणस्नेहकान्तियुक्त, तव निजालये मलिनत्वं कर्तुं न युज्यते ॥ ७७७ ॥

778) [ निजगुणस्नेहक्षयंकर मलिनं निजालयं कुर्वतः । ज्योतिष्क तव च्छाया परित्यक्ता तेन सुजनैः ॥ ] निजगुणस्नेहक्षयंकर ज्योतिष्क निजालयं निजस्थानं मलिनं कुर्वतस्तव च्छाया तेन हेतुना सुजनैः परित्यक्ता । विद्वांसः किल दीपच्छायां न गृह्णन्ति । दीपच्छाया गजच्छाया[3] खरच्छाया[4] तथैव चेति ॥ ७७८ ॥

---

1 G, I धारेंति  2 I लोइल्लो आलोकयुक्त ज्योतियुक्त इति याक्त
3 G निजच्छाया,  4 G, I खङ्गच्छाया।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



779) किं तुज्झ पहाए किं गुणेण किं दीव तुज्झ नेहेण।
छायं जस्स विसिट्ठा दूरे वि चयंति निंदंता[1] ॥ ५॥

## ९४. पियोल्लावपद्धा (प्रियोल्लापपद्धतिः)

780) एक्केण विणा पियमाणुसेण बहुयाइ हुंति दुक्खाई।
आलस्सो रणरणओऽणिद्दा पुलओ ससज्झसओ[2] ॥ १॥
781) एक्केण विणा पियमाणुसेण सब्भावणेहभरिएणं[3]।
जणसंकुला वि पुहवी अव्वो रण्णं व पडिहाइ ॥ २॥
782) सो कत्थ गओ सो सुयणवल्लहो सो सुहाण सयखाणी।
सो मयणग्गिविणासो सो सो सोसेइ मह हिययं ॥ ३॥

---

779) [ किं तव प्रभया किं गुणेन किं दीप तव स्नेहेन। छायां यस्य विशिष्टा दूरेऽपि त्यजन्ति निन्दन्तः ॥ ] किं तव प्रभया, किं गुणेन किं स्नेहेन, छायां यस्य विशिष्टा दूरेऽपि त्यजन्ति निन्दन्तः[4] ॥ ७७९ ॥

780) [एकेन विना प्रियमानुषेण बहूनि भवन्ति दुःखानि। आलस्यं रणरणकोऽनिद्रा पुलकः ससाध्वसः ॥ ] एकेन प्रियमानुषेण विना बहूनि दुःखानि भवन्ति। आलस्यं, रणरणकः, अनिद्रा, पुलकः, ससाध्वसः। सह साध्वसेन वर्तत इति तथा ॥ ७८० ॥

781) [ एकेन विना प्रियमानुषेण सद्भावस्नेहभृतेन। जनसंकुलापि पृथ्वी, अहो अरण्यमिव प्रतिभाति ॥ ] एकेनापि विना प्रियमानुषेण सद्भावस्नेहमयेन जनसंकुलापि पृथ्वी अहो अरण्यमिव प्रतिभाति ॥७८१॥

782) [ स कुत्र गतः स सुजनवल्लभः स सुखानां शतखनिः। स मदनाग्निविनाशः स स शोषयति मम हृदयम् ॥ ] स प्रियः कुत्र गतः। स सुजनवल्लभः[5]। सुजनश्चासौ वल्लभश्च सुजनवल्लभः। स सुखानां शतस्य खानिः। स च मदनाग्निविनाशकः। स स एवंविधो मम वल्लभो विरहे मम हृदयं शोषयति ॥ ७८२ ॥

---

1 G निंदंति 2 I ससज्झो य 3 I °मयएण, I °मइएण
4 G निन्दन्ति 5 I adds सुजनानां वल्लभः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



783) सो होहिइ को वि दिणो जत्थ पिओ बाहुपंजरविलीणो।
रइरहसखेयखिन्नो निज्झरइ पवासदुक्खाइं ॥ ४ ॥

784) आविहिइ पिओ चुंबिहिइ निद्दुरं[1] चुंबिऊण पुच्छिहिइ।
दइए कुसल त्ति तुमं नमो[2] नमो ताण दिवसाणं ॥ ५ ॥

785) धन्नं तं चेव दिणं सा रयणी सयललक्खणसउण्णा।
अमयं[3] तं पि मुहुत्तं जत्थ पिओ झत्ति दीसिहिइ ॥ ६ ॥

786) दूरयरदेसपरिसंठियस्स पियसंगमं महंतस्स।
आसाबंधो च्चिय माणुसस्स अवलंबए जीवं[4] ॥ ७ ॥

783) [ तद्भविष्यति किमपि दिनं यत्र प्रियो बाहुपञ्जरविलीनः। रतिरभसखेदखिन्नो निःक्षरति प्रवासदुःखानि ॥ ] स भविष्यति कोऽपि दिवसो यत्र प्रियो बाहुपञ्जरे विलीनः, रतिरभसखेदखिन्नः प्रवासदुःखानि निर्झरतीव प्रक्षरतीव ॥ ७८३ ॥

784) [ एष्यति प्रियश्चुम्बिष्यति निष्ठुरं चुम्बित्वा प्रक्ष्यति। दयिते कुशलेति त्वं नमो नमस्तेभ्यो दिवसेभ्यः ॥ ] आगमिष्यति प्रियश्चुम्बिष्यति मुखं, चुम्बित्वा प्रक्ष्यति। कथमिति। हे दयिते कुशलिनी त्वं वर्तसे। येषु दिवसेषु, नमो नमस्तेभ्यो दिवसेभ्यः ॥ ७८४ ॥

785) [ धन्यं तदेव दिनं सा रजनी सकललक्षणसंपूर्णा। अमृतं सोऽपि मुहूर्तो यत्र प्रियो झटिति द्रक्ष्यते ॥ ] तदेव दिनं धन्यं, सा रजनी सकललक्षणसंपूर्णा। अमृतं सोऽपि मुहूर्तो यत्र प्रियो झटिति द्रक्ष्यते[5] ॥ ७८५ ॥

786) [ दूरतरदेशपरिसंस्थितस्य प्रियसंगमं काङ्क्षतः। आशाबन्ध एव मानुषस्यावलम्बते जीवम् ॥ ] दूरतरदेशपरिसंस्थितस्य प्रियसंगममभिलषत आशाबन्ध एव मानुषकस्य स्त्रीलोकस्य जीवमवलम्बते। स्त्रीजनस्य विरहिण आशाबन्ध एव जीवं निर्गच्छन्तमवलम्बते ॥ ७८६ ॥

1 G, I मुहं 2 I जिहि दिवसेहि णमो णमो ताणं 3 G, I अमियं
4 G हिययं 5 G, I add मयेति शेषः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



787) हियथट्ठिओ वि सुहवो तह वि हु नयणाण होइ दुप्पेच्छो।
पेच्छइ विहिणा न कया[1] मह हियए जालयगवक्खा ॥ ८ ॥

## ९५. दोसियवज्जा (दौषिकपद्धतिः)

788) दीहं लण्हं बहुसुत्तरुंदयं कडियलम्मि सुहजणयं।
तह वासं च महग्घं दोसिय कडिल्लमह पडिहाइ ॥ १ ॥

789) माणविहूणं रुंदीइ छोडयं सिलधोयगयछायं।
जं वसणं न सुहावइ मुय दूरं नम्मयाडे तं ॥ २ ॥

790) पम्मुहसुत्तं अट्ठीसुहावहं जणियरायपुलइल्लं।
दोसिय दिज्जंतं पि हु नारंगं अम्ह पडिहाइ ॥ ३ ॥

787) [ हृदयस्थितोऽपि सुभगस्तथापि खलु नयनयोर्भवति दुष्प्रेक्षः। प्रेक्षध्वं विधिना न कृता मम हृदये जालकगवाक्षाः ॥ ] हृदयस्थितोऽपि सुभगस्तथापि लोचनयोर्भवति दुष्प्रेक्ष्यः, प्रेक्षत (प्रेक्षध्वं) विधिना स्रष्ट्रा न कृता मम हृदये जालकगवाक्षाः। विरहिणीप्रलापत्वान्न शब्दपौनरुक्त्यम् ॥ ७८७ ॥

788) [ दीर्घं श्लक्ष्णं बहुसूत्रविशालं कटितले सुखजनकम्। तथा वासश्च महार्घं दौषिक कटिवस्त्रं मम प्रतिभाति ॥ ] हे दोसिय[2] तथाविधं कडिल्लं अधोवस्त्रम् अस्मभ्यं प्रतिभाति, रोचते। किंविशिष्टम्। दीर्घं तथा श्लक्ष्णं मृदु, बहुसूत्रविस्तीर्णं, कटितटे सुखजनकम्। तथा वासश्च महार्घम्। अयमाशयः। एवंविधां स्त्रियमस्मभ्यं योजयेति गम्यम् ॥७८८॥

789) [ मानविहीनं विस्तारेण त्यक्तं शिलाधौतगतच्छायम्। यद्वसनं न सुखयति मुञ्च दूरं नर्मदातटे तत् ॥ ] मानविहीनं रुंदत्वेन ह्रस्वं, शिलाधौतं गतच्छायं गतशोभं, यद् वसनं वस्त्रं न सुखयति तद्दूरं मुञ्च नर्मदातटे। अयमाशयः यत्, कश्चन कामी एवंविधं स्त्रीरत्नमलभमानो यदि न प्राप्नोति, तदैवं वक्ति ॥ ७८९ ॥

790) [ प्रमुखसूत्रमस्थिसुखावहं जनितरागपुलकवत्। दौषिक दीयमानमपि खलु नारङ्गं मम प्रतिभाति ॥ ] हे दोसिय वसनविक्रेतः,

1 I किया 2 I adds वसनविक्रेतः after दोसिय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



791) जं पक्खालियसारं जं गरुयं चेव खममहग्घं च।
तं दोसिय अम्हाणं दंसिज्जउ किं वियारेण ॥ ४ ॥

792) दोसिय घणगुणसारं सुविणीयं सुट्ठु सोहसंजणयं।
दंसहि मा कुण खेयं तं अम्हं जणइ परिओसं ॥ ५ ॥

793) जह पढमे तह दीसइ अवसाणे साडयस्स निव्वहणं।
तं फुडु अम्ह नियंबे दोसिय फुट्टं पि पडिहाइ ॥ ६ ॥

पम्मुहसुत्तं पराङ्मुखसूत्रम् ( ? प्राङ्मुखसूत्रम् ) अस्थिसुखजनकं जनित-रागपुलकितम्, एवंविधं दीयमानमपि अरङ्गं[1] रङ्गरहितं चेत् तदा कस्यापि न प्रतिभाति, न रोचते। अयमाशयः। सुसूत्रमस्थिस्पर्शसुखकारि जनित-प्रीतिपुलकितं दीयमानमपि क्षीरत्नं रंगरहितं चेत् तदा यथा कस्यापि न रोचते तद्वदिदमपि ॥ ७९० ॥

791) [ यत्प्रक्षालितसारं यद् गुरुकं चैव क्षममहार्घं च। तद् दौषिकास्माकं दर्श्यतां किं विचारेण ] यत् सारं, यद् गुरुकं, महन् महार्घं च। हे दोसिय ( दौषिक ), तद् दर्श्यतां किं विचारेण ॥ ७९१ ॥

792) [ दौषिक घनगुणसारं सुविनीतं सुष्ठु शोभासंजनकम्। दर्शय मा कुरु खेदं तदस्माकं जनयति परितोषम् ॥ ] हे दोसिय ( दौषिक ), घनगुणसारं सुविनीतं सुष्ठुशोभाजनकं यद् वस्त्रं तद् दर्शय। मा अन्य-दर्शनेन खेदं कार्षीः। यतस्तादृग्विधमस्माकं जनयति परितोषम् ॥७९२॥

793) [ यथा प्रथमे तथा दृश्यतेऽवसाने शाटकस्य निर्वहणम्। तद् स्फुटं मम नितम्बे दौषिक स्फुटितमपि प्रतिभाति ॥ ] यथा प्रथमे तथा-वसाने यस्य शाटकस्य निर्वहणं दृश्यते, तद् शाटकं स्फुटितमपि स्फुटं निश्चितम् अस्मन्नितम्बे प्रतिभाति॥ ७९३ ॥

1 G I अरंगं रंगरहितम् अमांसिकमिति यावद्, न प्रतिभाति न रोचते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ९६. पज्जंतगाहाजुयलं ( पर्यन्तगाथायुगलम् )

अह पज्जंतगाहाजुयलं भण्णइ[1]।

794) इय कइयणेहि रइए वज्जालए सयललोयहिट्ठिए[2]।
पत्थावे गोट्ठिट्ठिय इच्छियगाहा पढिज्जंति ॥ १ ॥

795) एयं वज्जालग्गं ठाणं गहिऊण पढइ जो को वि।
नियठाणे पत्थावे गुरुत्तणं लहइ सो पुरिसो ॥ २ ॥

794)] [ अथ पर्यन्तगाथायुगलं व्याख्यायते। ] [ इति कविजनै रचिते व्रज्यालये सकललोकाभीष्टे। प्रस्तावे गोष्ठीस्थित ईप्सितगाथाः पठ्यन्ते ।। इति पूर्वोक्तप्रकारेण, कविजनैर्विरचिते वज्जालये सकललोकाभीष्टे, प्रस्तावे गोष्ठीस्थित[3] ईप्सितगाथाः पठ्यन्ते ।। ७९४ ।।

795) [ एतद् व्रज्यालग्नं स्थानं गृहीत्वा पठति यः कोऽपि। निजस्थाने प्रस्तावे गुरुत्वं लभते स पुरुषः ।। ] एतद् वज्जालग्गं पद्यालयं, स्थानं गृहीत्वा पठति यः कोऽपि निजस्थाने प्रस्तावे, गुरुत्वं लभते स पुरुष इति ।। ७९५ ।।

इति पद्यालयच्छाया समाप्ता[4] ।

1 B, G, I omit this sentence

2 B, C, I सयललोयरमणीए 3 G I गोष्ठीस्थितैः

4 G adds विद्यालयस्तुतिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# APPENDIX

## Additional gāthās found in MS. C.

( N. B. The first Arabic figure at the left hand shows the serial number of the gāthā after which the additional gāthā is found in Ms. C. The second Arabic figure with a prefixed star shows the serial number of the additional gāthā itself. )

### गाहावज्जा ।

15*1) गाहा रुअइ अणाहा सीसे काऊण दो वि हत्थाओ ।
सुकईहि दुक्खरइया सुहेण मुक्खो विणासेइ ॥ १ ॥

16*1) कुप्पाढएहि कुल्लेहएहि अत्थं अयाणमाणेहिं ।
नयरि व्व छत्तभंगे लुंचपलुंचीकिया गाहा ॥ १ ॥

16*2) वाससएण वि बद्धा एक्का वि मणोहरा वरं गाहा ।
लक्खणरहिया न उणो कोडी वि खणद्धमेत्तेण ॥ २ ॥

~~~~~~~~~~~~~~~~~~~~

15*1) [ गाथा रोदित्यनाथा शीर्षे कृत्वा द्वावपि हस्तौ । सुकविभिर्दुःखरचिता सुखेन मूर्खो विनाशयति ] ॥ १५*१ ॥

16*1) [ कुपाठकैः कुलेखकैरर्थमजानद्भिः । नगरीव छत्रभङ्गे लुञ्चप्रलुञ्चीकृता गाथा ॥ ] कुपाठकैः कुलेखकैरर्थमजानानैर्गाथा लुण्ट्यते । केव । नगरीव । यथा नगरी छत्रभङ्गे सति लुञ्चप्रलुञ्चीक्रियते लुण्टयते इत्यर्थः ॥ १६*१ ॥

16*2) [ वर्षशतेनापि बद्धा एकापि मनोहरा वरं गाथा । लक्षणरहिता न पुनः कोटिरपि क्षणार्धमात्रेण ॥ ] एकापि गाथा वरम् । किंविशिष्टा गाथा । वर्षशतेनापि बद्धा । पुनः किंविशिष्टा । मनोहरा । विशेषां मनो हरतीति मनोहरा । लक्षणरहिता गाथाकोट्यपि क्षणार्धमात्रेण बद्धा न वरं न श्रेष्ठा । किंविशिष्टा गाथा । लक्षणरहिता । लक्षणं व्याकरणं तेन रहिता । अथवा छन्दोऽलंकारविरुद्धा ॥ १६*२ ॥

For Private And Personal Use Only
~~~~~~~~~~~~~~~~~~~~

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



18*1) गाहाहि को न हीरइ पियाण मित्ताण को न संभरइ।
दूमिज्जइ को न वि दूमिएण सुयणेण रयणेण ॥ १ ॥

कव्ववज्जा।

31*1) सरसा वि हु कव्वकहा परिओसं जणइ कस्स वि मणम्मि।
वियसंति न सयलतरू वरतरुणीचरणफासेण ॥ १ ॥

31*2) अणुसरइ मग्गलग्गं अज्ज वि कइमहुयराण रिंछोली।
ताण छइल्लाण नमो पाइयकइगंधहत्थीणं ॥ २ ॥

31*3) डज्झउ सक्कयकव्वं सक्कयकव्वं च निम्मियं जेण।
वंसहरम्मि पलित्ते तडयडतट्टत्तणं कुणइ ॥ ३ ॥

---

18*1) गाथाभिः को न ह्रियते प्रियाणां मित्राणां को न संस्मरति।
दूयते को नापि दूनेन सुजनेन रत्नेन ॥ ] गाथाभिः को न ह्रियते। गाथाः कस्य मनो न हरन्तीत्यर्थः। प्रियाणां मित्राणां को न स्मरति। सुजनेन दूनेनापि पुनः को वा न दूयते। किंप्रकारेण सुजनेन। रत्नेन। रत्नभूतेन सर्वगुणाधारेणेत्यर्थः ॥ १८*१ ॥

31*1) [ सरसापि खलु काव्यकथा परितोषं जनयति कस्यापि मनसि। विकसन्ति न सकलतरवो वरतरुणीचरणस्पर्शेन ॥ ] हु निश्चि-मत। सरसापि काव्यकथा कस्यापि स्वल्पस्य मनसि परितोषं जनयति। अमुमेवार्थं कविर्दृष्टान्तेन द्रढयति। सकलतरवः समस्तवृक्षा वरतरुणीचरण-स्पर्शेन न विकसन्ति। यतः "पादाहतः प्रमदया विकसत्यशोकः" न त्वपरे ॥ ३१*१ ॥

31*2) [ अनुसरति मार्गलग्नमद्यापि कविमधुकराणां पङ्क्तिः। तेषां छेकानां नमः प्राकृतकविगन्धहस्तिनाम् ॥ ] तेभ्यश्छेकेभ्यो नमो नमस्का-रोऽस्तु। प्राकृतत्वाच्चतुर्थीस्थाने षष्ठी। किंप्रकारेभ्यश्छेकेभ्यः। प्राकृत-कविगन्धहस्तिभ्यः। गन्धहस्तित्वादद्यापि कविमधुकराणां रिंछोली श्रेणि-र्मार्गलग्नं यथा भवति तथानुसरति ॥ ३१*२ ॥

31*3) [ दह्यतां संस्कृतकाव्यं संस्कृतकाव्यं च निर्मितं येन। वंश-गृहे प्रदीप्ते तडतडशब्दं करोति ॥ ] संस्कृतकाव्यं दह्यतु प्रज्वलतु।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



31*4) पाइयकव्वुल्लावे पडिवयणं सक्कएण जो देइ ।
सो कुसुमसत्थरं पत्थरेण दलिउं विणासेइ ॥ ४ ॥

31*5) छंदेण विणा कव्वं लक्खणरहियम्मि सक्कयालावं ।
रूवं विणा मरट्टो तिण्णि वि सोहं न पावंति ॥ ५ ॥

31*6) तं किं वुच्चइ कव्वं तेण कएणावि विणडिओ अप्पा ।
एक्कसुय व्व कुडुंबे हत्था हत्थे न जं भमइ ॥ ६ ॥

31*7) अइचंपियं विणस्सइ दंतच्छेएण होइ विच्छायं ।
ढलहलयं चिय मुच्चइ पाइयकव्वं च पेम्मं च ॥ ७ ॥

---

संस्कृतकाव्यं येन निर्मितं सोऽपि दह्यतु । यतो वंशगृहे प्रदीप्ते सति, प्रज्वलिते सति त्रिटत् त्रिटत् त्राटकं ( ? ) शब्दं करोति । एतावता संस्कृतकाव्यं न किमपि प्राकृतकवित्वाग्रतः ॥ ३१*३ ॥

31*4) [ प्राकृतकाव्योल्लापे प्रतिवचनं संस्कृतेन यो ददाति । स कुसुमस्रस्तरं प्रस्तरेण दलित्वा विनाशयति ॥ ] यः पण्डितः प्राकृतकाव्योल्लापे सति प्रतिवचनं संस्कृतेन ददाति, स कुसुमस्रस्तरं कुसुमसंस्तारकं प्रस्तरेण दृषदा दलितुं भङ्क्तुं ( ? दलित्वा भङ्क्त्वा ) विनाशयति ॥३१*४॥

31*5) [ छन्दसा विना काव्यं लक्षणराहित्ये संस्कृतालापः । रूपं विना गर्वस्त्रीण्यपि शोभां न प्राप्नुवन्ति ॥ ] एते त्रयोऽपि शोभां न प्राप्नुवन्ति । एते के के । छन्दसा विना काव्यम् । लक्षणरहिते संस्कृतालापः । रूपं विना मरट्टः ॥ ३१*५ ॥

31*6) [ तत् किमुच्यते काव्यं तेन कृतेनापि विनटित आत्मा । एकसुत इव कुटुम्बे हस्ताद्धस्ते न यद् भ्रमति ॥ ] तत् काव्यं किम् उच्यते । तेन कविनापि आत्मा विनटितो विडम्बितः । यस्य काव्यं हस्ताद्धस्तं न भ्रमति ॥ ३१*६ ॥

31*7) [ अतिनिपीडितं विनश्यति दन्तच्छेदेन भवति विच्छायम् । शिथिलं चैव मुच्यते प्राकृतकाव्यं च प्रेम च ॥ ] अतिचम्पितं विनश्यति । दन्तच्छेदेन विच्छायं भवति । अतः कारणात् प्राकृतकाव्यं च प्रेम स्नेहश्च ढलहलं शिथिलमेव मुच्यते ॥ ३१*७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## सज्जणवज्जा ।

48*1) खुहइ न कडुयं जंपइ लेइ न दोसे गुणे पयासेइ ।
रूसंताण न रूसइ दक्खिण्णमहोयही सुयणो ॥ १ ॥

48*2) सुयणस्स होइ सुक्खं न तेत्तियं जेत्तियं दुहं होइ ।
जं जं पिच्छइ दुहियं तं तं अणुसोयमाणस्स ॥ २ ॥

48*3) होंति परकज्जणिरया नियकज्जपरंमुहा फुडं सुयणा ।
चंदो धवलेइ महिं न कलंकं अत्तणो फुसइ ॥ ३ ॥

48*4) सच्चुच्चरणा पडिवन्नपालणा गरुयभारणिव्वहणा ।
धीरा पसन्नवयणा सुयणा चिरजीवणा होंतु ॥ ४ ॥

---

48*1) [ क्षुभ्यति न कटुकं जल्पति लाति न दोषान् गुणान्प्रकाशयति । रुष्यतां न रुष्यति दाक्षिण्यमहोदधिः सुजनः ॥ ] सुजनः सहते[1] कटु न जल्पति, दोषान् न लाति गुणान् प्रकाशयति, रोषयतामुपरि रोषं न कुरुते सुजनो दाक्षिण्यमहोदधिः ॥ ४८*१ ॥

48*2) [ सुजनस्य भवति सौख्यं न तावद्यावद् दुःखं भवति । यं यं प्रेक्षते दुःखितं तं तमनुशोचतः ॥ ] सुजनस्य तावत् सौख्यं न भवति यावद् दुःखं भवति । सुजनस्य दुःखं कुतः । यं यं दुःखितं पश्यति तं तम् अनुशोचमानस्य ॥ ४८*२ ॥

48*3) [ भवन्ति परकार्यनिरता निजकार्यपराङ्मुखाः स्फुटं सुजनाः । चन्द्रो धवलयति महीं न कलङ्कमात्मनः प्रोञ्छति ॥ ] सुजनाः परकार्यनिरता भवन्ति निजकार्यपराङ्मुखा भवन्ति । अमुमेवार्थं कविर्दृष्टान्तेन द्रढयति । चन्द्रो महीं पृथ्वीं धवलयति, आत्मकलङ्कं न स्फेटयति ॥ ४८*३ ॥

48*4) [ सत्योच्चरणाः प्रतिपन्नपालना गुरुकभारनिर्वहणाः । धीराः प्रसन्नवदनाः सुजनाश्चिरजीवना भवन्तु ॥ ] एवंविधाः सुजनाश्चिरजीवना भवन्तु, चिरकालं नन्दन्तु । के ते । सत्योच्चरणाः । सत्यमुद्गारो विद्यते येषां ते सत्योच्चरणाः । पुनः किंप्रकारास्ते । प्रतिपन्नपालनाः । प्रतिपन्नम् अङ्गीकृतं पालयन्ति इति प्रतिपन्नपालनाः । पुनरपि किंप्रकाराः । गुरुकभारनिर्वहणाः । गुरुकं भारं निर्वहन्तीति गुरुकभार-

---

1. The commentator seems to have read सहइ for खुहइ in the text.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



48*5) विहवक्खए वि सुयणो सेवइ रण्णं न जंपए दीणं।
मरणे वि महग्घयरं न विक्कए माणमाणिक्कं[1] ॥ ५ ॥

सुज्जणवज्जा।

64*1) तं नत्थि घरं तं नत्थि देउलं राउलं पि तं नत्थि।
जत्थ अकारणकुविया दो तिन्नि खला न दीसंति ॥ १ ॥

64*2) खलसंगे परिचत्ते पेच्छह तिल्लेण जं फलं पत्तं।
मियणाहिसुरहिवासियपहुसीसं उवलहंतेण ॥ २ ॥

64*3) धन्ना बहिरंधलिया दो च्चिय जीवंति माणुसे लोए।
न सुणंति पिसुणवयणं खलस्स रिद्धी न पेच्छंति ॥ ३ ॥

निर्वहणाः। पुनरपि किंप्रकाराः। धीरा धृतिमन्तः। पुनरपि प्रसन्नवदनाः। प्रसन्नं वदनं येषां ते प्रसन्नवदनाः सदा प्रहसितवदनाः ॥४८*४॥

48*5) [ विभवक्षयेऽपि सुजनः सेवतेऽरण्यं न जल्पति दीनम्। मरणेऽपि महार्घतरं न विक्रीणीते मानमाणिक्यम् ॥ ] विभवक्षयेऽपि दरिद्रभावेऽपि अरण्यं सेवते परं दीनं न जल्पति। मरणेऽपि प्राणत्यागेऽपि सति मानमाणिक्यं न विक्रीणाति। किंप्रकारं मानमाणिक्यम्। महार्घतरम् अतीव बहुमूल्यम् ॥ ४८*५ ॥

64*1) [ तन्नास्ति गृहं तन्नास्ति देवकुलं राजकुलमपि तन्नास्ति। यत्राकारणकुपिता द्वौ त्रयः खला न दृश्यन्ते ॥ ] सुगमा ॥ ६४*१ ॥

64*2) [ खलसङ्गे परित्यक्ते प्रेक्षध्वं तैलेन यत् फलं प्राप्तम्। मृगनाभिसुरभिवासितप्रभुशीर्षम् उपलभमानेन ॥ ] पेच्छह अवलोकयत खलसङ्गे विप्रमुक्ते परित्यक्ते सति तैलेन यत् फलं प्राप्तम्। किंप्रकारेण तैलेन। मृगनाभिसुरभिवासितप्रभुशीर्षम् उपलभता प्राप्तवता। मृगनाभिः कस्तूरिका, तस्या यत् सौरभं, तेन सौरभेण वासितं यच्छीर्षं तत्प्राप्तवता। अन्येऽपि ये खलसङ्गं परित्यक्ष्यन्ति ते सर्वेषामपि मस्तकारूढा भविष्यन्ति। एतावता खलसङ्गः परिहर्तव्यः ॥ ६४*२ ॥

64*3) [ धन्यौ बधिरान्धौ द्वावेव जीवतो मानुषे लोके। न शृण्वन्ति पिशुनवचनं खलस्य ऋद्धीर्न प्रेक्षन्ते ॥ ] मनुष्यलोके बधिरान्धलौ धन्यौ।

1. Cf. Gātha No. 94.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



64*4) आरंभ च्चिय चडुयारयाण निप्पन्नकज्जविमुहाणं ।
मंडलसुरयाण व दुज्जणाण मग्गो च्चिय अउव्वो[1] ॥ ४ ॥

64*5) पयडियपयावगुणकित्तणेण लज्जंति जे महासत्ता ।
इयरा पुण अलियपसंसणे वि अंगे न मायंति ॥ ५ ॥

मित्तवज्जा ।

72*1) सुरसरिपूरं वडविडविर्तुगिमा सुयणलोयपडिवन्नं ।
पढमं चिय ते लहुया पच्छा जायंति गरुयाइं ॥ १ ॥

---

सन्तौ जीवतः । कथं बधिरान्धलौ क्वापि धन्यौ वर्ण्येते । यतः पिशुनवचनं न शृण्वन्ति, अत एव बधिरा धन्याः । तथा अन्धलाः खलस्य ऋद्धीर्न प्रेक्षन्ते । अत एव द्वावपि धन्यौ ॥ ६४*३ ॥

64*4) [ आरम्भ एव चाटुकारकाणां निष्पन्नकार्यविमुखानाम् । मण्डलसुरतानामिव दुर्जनानां मार्ग एवापूर्वः ॥ ] दुर्जनानां मार्ग एवापूर्वो विपरीतः । कथम् । आरम्भ एव चटुकारकाश्चटुवाक्यानि वदन्ति । चटुवाक्यपरतानामित्यर्थः । पुनः किंप्रकाराणां दुर्जनानाम् । निष्पन्नकार्यविमुखानाम् । निष्पन्ने कार्ये विमुखा निष्पन्नकार्यविमुखास्तेषां निष्पन्नकार्यविमुखानां दुर्जनानाम् । केषामिव । मण्डलसुरतानामिव श्वानमैथुनानामिव । किंप्रकाराणां मण्डलसुरतानाम् । आरम्भ एव चटुकारकाणाम् । आरम्भ एव चटुभावं कुर्वन्तीति आरम्भचटुकारकाः, तेषाम् । पुनरपि किंप्रकाराणां मण्डलसुरतानाम् । निष्पन्नकार्यविमुखानाम् । तेऽपि श्वानो निष्पन्ने कार्ये विमुखा भवन्ति । दुर्जना अपि निष्पन्ने कार्ये विमुखा भवन्ति ॥ ६४*४ ॥

64*5) [ प्रकटितप्रतापगुणकीर्तनेन लज्जन्ते ये महासत्त्वाः । इतरे पुनरलीकप्रशंसनेऽप्यङ्गे न मान्ति ॥ ] ये महासत्त्वास्ते प्रकटितप्रतापगुणकीर्तनेन लज्जन्ते । लज्जापरायणा भवन्ति । इतरे नीचा अलीकप्रशंसनेनापि अङ्गे न मान्ति पुनः ॥ ६४*५ ॥

72*1) [ सुरसरित्पूरं वटविटपितुङ्गता सुजनलोकप्रतिपन्नम् । प्रथमं चैव ते लघुकाः पश्चाद् गुरुकाणि ॥ ] सुगमेयम् ॥ ७२*१ ॥

---

1. Cf. Gātha No. 61.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



72*2) अद्दिट्ठे रणरणओ दिट्ठे ईसा अदिट्ठए माणो ।
दूरं गए वि दुक्खं पिए जणे सहि सुहं कत्तो[1] ॥ २ ॥

72*3) अज्जाहं पुप्फवई तुमं पि रे चुंबणसयण्हो ।
तह चुंब जह न छिप्पसि भणिऊण समप्पिओ अहरो ॥३॥

72*4) हत्थे ठियं कवालं न मुयइ वराई खणं पि खट्टंगं ।
सा निद्दय तुज्झ कए बाला कावालिणी जाया[1] ॥ ४ ॥

72*5) कीरइ समुद्दतरणं पविसिज्जइ हुयवहम्मि पज्जलिए ।
आयामिज्जइ मरणं नत्थि दुलंघं सिणेहस्स ॥ ५ ॥

72*2) [ अदृष्टे रणरणको दृष्ट ईर्ष्या अदृष्टे मानः । दूरं गतेऽपि दुःखं प्रिये जने सखि सुखं कुतः ॥ ] हे सखि प्रिये जने सुखं कुतः । अदृष्टे सति रणरणक औत्सुक्यम् । यतः श्रीहेमसूरियादेरौत्सुक्यम् । ( ? ) रणरणरणको.... ( ? ) दृष्टे सति ईषा वाञ्छा । दूरं गते सत्यपि दुखम् । अतः कारणात् प्रिये जने सौख्यं स्वल्पम् ॥ ७२*२ ॥

72*3) [ अद्याहं पुष्पवती त्वमपि रे चुम्बनसतृष्णः । तथा चुम्ब यथा न स्पृशसि भणित्वा समर्पितोऽधरः ॥ ] हे सुभग अद्याहं पुष्पवती ऋतुमती वर्ते । त्वमपि चुम्बनसतृष्णो वर्तसे । तथा चुम्ब यथा स्पर्शो न भवति ॥७२*३॥

72*4) [ हस्ते स्थितं कपालं न मुञ्चति वराकी क्षणमपि खट्वाङ्गम् । सा निर्दय तव कृते बाला कपालिनी जाता ॥ ] हे निर्दय तव कृते सा बाला कापालिनी जाता, योगिनी बभूव । कथम् । कपालं हस्ते स्थितम् । यतश्चिन्तातुरो गल्लकहस्तं ( ? कपाले हस्तं ) करोति । सा वराकी क्षणमपि खट्वाङ्गं न मुञ्चति । खट्वाया अङ्गं खट्वाङ्गम् । चिन्तातुरः प्राणी खट्वामवलम्बते । द्वितीयोऽर्थः । अन्यापि या कापालिनी योगिनी भवति सा हस्तस्थितं कपालं बिभर्ति । योगिनी अन्यापि क्षणमपि खट्वाङ्गं रक्षाकोलिकां न मुञ्चति । सा वियोगिनी तव स्त्री एवंविधा जाता ॥ ७२*४ ॥

72*5) [ क्रियते समुद्रतरणं प्रविश्यते हुतवहे प्रज्वलिते । आकाम्यते मरणं नास्ति दुर्लङ्घ्यं स्नेहस्य ॥ ] सुगमेयं गाथा ॥ ७२*५ ॥

1. Cf. Gātha No. 338.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



72*6) मा जाणसि[1] वीसरियं तुह मुहकमलं विदेसगमणम्मि।
सुन्नं भमइ करंकं जत्थ तुमं जीवियं तत्थ ॥ ६ ॥

72*7) रणरणइ घरं रणरणइ देउलं राउलं पि रणरणइ।
एक्केण विणा सुंदरि रणरणइ ससायरा पुहवी ॥ ७ ॥

72*8) बहले तमंधयारे विज्जुज्जोएण दीसए मग्गो।
अहिसारियाण नेहो अत्थि-अणत्थी पयासेइ ॥ ८ ॥

नेहवज्जा।

80*1) गुणवज्जिए वि नेहो अह नेहो होइ कस्स वि कहं पि[2]।
मोत्तूण मणहरदुमे निंबम्मि दिवायरो वसइ ॥ १ ॥

72*6) [ मा जानासि विस्मृतं तव मुखकमलं विदेशगमने। शून्यं भ्रमति करंको यत्र त्वं जीवितं तत्र ॥ ] सुगमेयं गाथा ॥ ७२*६ ॥

72*7) [ रणरणकं करोति गृहं रणरणकं करोति देवकुलं राजकुलमपि रणरणकं करोति। एकेन विना सुन्दरि रणरणकं करोति ससागरा पृथ्वी ॥ ] हे सुन्दरि, एकेन सभाग्येन विना गृहं रणरणति[3]....दीनं भवतीत्यर्थः। तथा तेन प्रकारेण देवकुलमपि रणरणति। राजकुलमपि रणरणति। एकेन विना पृथ्वी। ससागरा समुद्रसहिता समुद्रमर्यादा इत्यर्थः ॥७२*७॥

72*8) [ बहले तमोऽन्धकारे विद्युद्द्योतेन दृश्यते मार्गः। अभिसारिकाणां स्नेहोऽस्तिनास्ति प्रकाशयति ॥ ] स्वच्छन्दचारिणीनां स्नेहोऽस्ति नास्ति च प्रकाशयति। यथा बहलेऽन्धकारे विद्युद्द्योतेन मार्गो दृश्यते, तथा असतीनां स्नेहो अस्ति नास्ति च प्रकटयति। अयं भावः ॥ ७२*८ ॥

80*1) [ गुणवर्जितेऽपि स्नेहोऽथ स्नेहो भवति कस्यापि कथमपि। मुक्त्वा मनोहरद्रुमान् निम्बे दिवाकरो वसति ॥ ] गुणवर्जितेऽपि कस्यापि कथमपि स्नेहो भवति। अथवा स्नेहः कस्यापि क्वापि भवति। तदुपरि दृष्टान्तं दर्शयति कविः। मनोहरान् द्रुमान् मुक्त्वा वृक्षान् पूर्वान् परित्यज्य दिवाकरो निम्बे वसति ॥ ८०*१ ॥

1. We should read जाणसु (= जानीहि).
2. The commentator appears to have read कहिं पि (= क्वापि).
3. The commentary is illegible here.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



80*2) दूरयरदेसपरिसंठियस्स पियसंगमं वहंतस्स।
आसाबंधो च्चिय माणुसस्स परिरक्खए जीयं[1] ॥ २ ॥

80*3) एक्केण विणा पियमाणुसेण सब्भावणेहभरिएण।
जणसंकुला वि पुहवी अव्वो रण्णं व पडिहाइ[2] ॥ ३ ॥

नीइवज्जा।

90*1) लवणसमो नत्थि रसो विन्नाणसमो य बंधवो नत्थि।
धम्मसमो नत्थि निही कोहसमो वेरिओ नत्थि ॥ १ ॥

90*2) महिला जत्थ पहाणा डिंभो राया निरक्खरो मंती।
अच्छउ ता धणरिद्धी जीयं रक्खउ पयत्तेण ॥ २ ॥

90*3) जस्स न गिण्हंति गुणा सुयणा गोट्ठीसु रणमुहे सुहडा।
नियजणणिजोव्वणुल्लूरणेण जाएण किं तेण[3] ॥ ३ ॥

80*2) [ दूरतरदेशपरिसंस्थितस्य प्रियसङ्गमं वहतः। आशाबन्ध एव मानुषस्य परिरक्षति जीवितम् ॥ ] मनुष्यस्य आशाबन्ध एव जीवितव्यं रक्षति। किंप्रकारस्य मनुष्यस्य। दूरतरदेशपरिसंस्थितस्य। प्रकृष्टं दूरं दूरतरम्। दूरतरश्चासौ देशो दूरतरदेशः। तत्र परिसंस्थितो दूरतरदेशपरिसंस्थितः। तस्य। पुरुषस्य प्रियसंगमं वहतः। प्रियस्य संगमः प्रियसंगमः। प्रियसंगमं वहतीति प्रियसंगमं वहन्। (?) तस्य ॥ ८०*२॥

80*3) [ एकेन विना प्रियमानुषेण सद्भावस्नेहभृतेन। जनसङ्कुलापि पृथ्वी अहो अरण्यमिव प्रतिभाति ॥ ] सुगमेयं गाथा ॥ ८०*३ ॥

90*1) [ लवणसमो नास्ति रसो विज्ञानसमो बान्धवो नास्ति। धर्मसमो नास्ति निधिः क्रोधसमो वैरी नास्ति ॥ ] सुगमा ॥ ९०*१ ॥

90*2) [ महिला यत्र प्रधाना डिंभो राजा निरक्षरो मन्त्री। आस्तां तावद् धनऋद्धिर्जीवं रक्षतु प्रयत्नेन ॥ ] सुगमा ॥ ९०*२ ॥

90*3) [ यस्य न गृह्णन्ति गुणान् सुजना गोष्ठीषु रणमुखे सुभटाः। निजजननीयौवनोच्छेदकेन जातेन किं तेन ॥ ] सुजना

1. Cf. Gātha No. 786.
2. Cf. Gātha No. 780, 781
3. Cf. Gātha No. 698.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



90*4) कुपुत्तेहि कुलाइं गामणगराइ पिसुणसीलेहिं।
नासंति कुमंतीहि नराहिवा सुट्ठु वि समिद्धा ॥ ४ ॥

90*5) नासइ वाएण तुसं नासइ गेयं जणस्स सद्देणं।
अगुणिज्जंती विज्जा नासइ भज्जा पवासेणं ॥ ५ ॥

90*6) कज्जं पव्व पमाणं कह व तुलग्गेण कज्जकत्ताणं।
जइ तं अवहेरिज्जइ पच्छा उण दुलहं होइ ॥ ६ ॥

90*7) मा होसु सुयग्गाही मा पत्तीय जं न दिट्ठ पच्चक्खं।
पच्चक्खे वि य दिट्ठे जुत्ताजुत्तं वियारेह ॥ ७ ॥

90*8) धम्मो धणाण मूलं जाया मूलं सुहाण सयलाणं।
विणओ गुणाण मूलं दप्पो मूलं विणासस्स ॥ ८ ॥

गोष्ठीषु यस्य गुणान् न गृह्णन्ति, रणमुखे सुभटा न व्याख्यानयन्ति, तेन जातेन किम्। किंप्रकारेण तेन। निजजननीयौवनविदारणेन ॥९०*३॥

90*4) [ कुपुत्रैः कुलानि ग्रामनगराणि पिशुनशीलैः। नश्यन्ति कुमन्त्रिभिर्नराधिपाः सुष्ठु अपि समृद्धाः ॥ ] सुगमा ॥ ९०*४ ॥

90*5) [ नश्यति वातेन तुषं नश्यति गेयं जनस्य शब्देन। अगुण्यमाना विद्या नश्यति भार्या प्रवासेन ॥ ] सुगमा ॥ ९०*५ ॥

90*6) [ कार्यमेव प्रमाणं कथं वा तुलाग्रेण कार्यकर्तृणाम्। यदि तदवहेल्यते पश्चात् पुनर्दुर्लभं भवति ॥ ] कार्यकर्तृणां पुरुषाणां कथं वा कार्यमेतत् यद् तुलावत् प्रमाणं कार्यकृत्सु आस्थीयते ( ? )। नो वा। यदि तत् कार्यम् अवहेरिज्जइ अवहेल्यते पश्चात् तत् कार्यं दुर्लभं भवति ॥ ९०*६ ॥

90*7) [ मा भव श्रुतग्राही मा प्रत्येहि यन्न दृष्टं प्रत्यक्षम्। प्रत्यक्षेऽपि च दृष्टे युक्तायुक्तं विचारयत ॥ ] सुगमा ॥ ९०*७ ॥

90*8) [ धर्मो धनानां मूलं जाया मूलं सुखानां सकलानाम्। विनयो गुणानां मूलं दर्पो मूलं विनाशस्य ॥ ] सुगमा ॥ ९०*८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



90*9) नासइ जूएण धणं नासेइ कुलं असीलवंताणं ।
अइरूवेण वि महिला नासइ राया कुमंतीहिं ॥ ९ ॥

90*10) जम्मंतरं न गरुयं गरुयं पुरिसस्स गुणगणग्गहणं ।
मुत्ताहलं च गरुयं न हु गरुयं सिप्पिसंउडयं ॥ १० ॥[1]

90*11) जं जाणइ भणउ जणो गुणाण विहवस्स अंतरं गरुयं ।
लब्भइ गुणेहि विहवो विहवेण गुणा न लब्भंति[2] ॥ ११ ॥

90*12) बुद्धी सच्चं मित्तं चरंत नो महाकव्वं (?) ।
पुव्वं सव्वं पि सुहं पच्छा दुक्खेण निव्वहइ ॥ १२ ॥

90*13) किं वा गुणेहि कीरइ किं वा रूवेण किं च सीलेण ।
धणविरहियाण सुंदरि नराण को आयरं कुणइ[3] ॥ १३ ॥

90*14) ठाणं गुणेहि लब्भइ ता गुणगहणं अवस्स कायव्वं ।
हारो वि गुणविहूणो न पावए तरुणिथणवट्टं ॥ १४ ॥[4]

90*9) [ नश्यति द्यूतेन धनं नश्यति कुलमशीलवताम् । अतिरूपेणापि महिला नश्यति राजा कुमन्त्रिभिः ॥ ] सुगमा ॥ ९०*९ ॥

90*10) [ जन्मान्तरं न गुरु गुरु पुरुषस्य गुणगणग्रहणम् । मुक्ताफलं च गुरु न खलु गुरु शुक्तिसंपुटकम् ॥ ] सुगमा ॥९०*१०॥

90*11) [ यज्जानाति भणतु जनो गुणानां विभवानामन्तरं गुरु । लभ्यते गुणैर्विभवो विभवेन गुणा न लभ्यन्ते ॥ ] सुगमा ॥ ९०*११ ॥

90*12) [ बुद्धिः सत्यं मित्रं.... (?) नो महाकाव्यम् । पूर्वं सर्वमपि सुखं पश्चाद् दुःखेन निर्वहति ॥ ] सुगमा ॥ ९०*१२ ॥

90*13) [किं वा गुणैः क्रियते किं वा रूपेण किं च शीलेन । धनविरहितानां सुन्दरि नराणां क आदरं करोति ॥] सुगमा ॥ ९०*१३ ॥

90*14) [ स्थानं गुणैर्लभ्यते तद् गुणग्रहणमवश्यं कर्तव्यम् । हारोऽपि गुणविहीनो न प्राप्नोति तरुणीस्तनपट्टम् ॥ ] सुगमा ॥९०*१४॥

1 Cf. Gāthā No. 687 2 Cf. Gāthā 689
3 Cf. Gātha No. 143 4 Cf. Gāthā 690

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



90*15) देसे गामे नयरे रायपहे तियचउक्कमग्गे वा।
जस्स न वियरइ किसी धिरत्थु किं तेण जाएण[1] ॥ १५ ॥

## साहसवज्जा।

119*1) विहवक्खए वि दाणं माणं वसणे वि धीरिमा मरणे।
कज्जसए वि अमोहो पसाहणं धीरपुरिसाणं ॥ १ ॥

119*2) धीरा मया वि कज्जं निययं साहंति, पेच्छह हरस्स।
दड्ढेण वि अवरद्धं अवहरियं कुसुमबाणेण ॥ २ ॥

119*3) जह जह वायइ विही विसरिसकरणेहि निट्ठुरं पडहं।
धीरा पहसियवयणा नच्चंति य तह तह च्चेव ॥ ३ ॥

90*15) [ देशे ग्रामे नगरे राजपथे त्रिकचतुष्कमार्गे वा। यस्य न विचरति कीर्तिर्धिगस्तु किं तेन जातेन ॥ ] सुगमा ॥९०*१५॥

119*1) [ विभवक्षयेऽपि दानं मानो व्यसनेऽपि धैर्यं मरणे। कार्यशतेऽप्यमोहः प्रसाधनं धीरपुरुषाणाम् ॥ ] धीरपुरुषाणामेतावदेव प्रसाधनं मण्डनम्। किं किम्। विभवक्षयेऽपि क्षीणे धनेऽपि यद् दानं, व्यसने कष्टेऽपि यन् मानः, मरणेऽपि समायाते यद् धैर्यं, कार्यशतेऽपि अव्यामोहः; न क्षुद्रस्य त इत्यर्थः। सत्पुरुषाणामेतन् मण्डनम् ॥११९*१॥

119*2) [ धीरा मृता अपि कार्यं निजकं साधयन्ति, पश्यत हरस्य। दग्धेनापि अपराधम् अपहृतं कुसुमबाणेन ॥ ] धीरा मृता अपि निजकं कार्यं साधयन्ति। प्रेक्षध्वम् अवलोकयध्वम्। दग्धेन कुसुमबाणेन हरस्य महेशस्य अपराधं वामार्धम् अपहृतं मुषम् ॥ ११९*२ ॥

119*3) [ यथा यथा वादयति विधिर्विसदृशकरणैर्निष्ठुरं पटहम्। धीराः प्रहसितवदना नृत्यन्ति च तथा तथैव ॥ ] विधिर्निष्ठुरं विसदृशकरणैः पराङ्मुखकर्तव्यैः पटहं वादयति, धीरास्तथा तथैव नृत्यन्ति। किंविशिष्टा धीराः। प्रहसितवदना हर्षप्रकर्षेण युक्ताः ॥ ११९*३ ॥

---

1 Cf. Gatha No. 700

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



### सेवयवज्जा।

161*1) अप्पत्थियं न लब्भइ, पत्थिज्जंतो वि कुप्पसि नरिंद।
हद्धी कहं सहिज्जइ कयंतवसहिं गए संते ॥ १ ॥

### सुहडवज्जा।

178*1) चिरयालसंठियाइं सामियजणियाइ माणदुक्खाइं।
रिउगयदसणप्पेल्लणविवरेहि भडस्स गलियाइं॥ १ ॥

178*2) कद्दमरुहिरविलित्तो रणंगणे नेय निवडिओ सुहडो।
अइसाहसेण भीओ इंदो अमएण सिंचेइ ॥ २ ॥

178*3) एक्कत्तो रुयइ पिया अन्नत्तो समरतूरणिग्घोसा।
पेम्मेण रणरसेण य भडस्स दोलाइयं हिययं ॥ ३ ॥

161*1) [ अप्रार्थितं न लभ्यते प्रार्थ्यमानोऽपि कुप्यसि नरेन्द्र । हा धिक् कथं सहिष्यते कृतान्तवसतिं गते सति ॥ ] हे नरेन्द्र, अप्रार्थितं न लभ्यते । प्रार्थ्यमानोऽपि कुप्यसि । हा धिक् कृतान्तवसतिं गते सति कथं सोढुं शक्यते ॥ १६१*१ ॥

178*1) [ चिरकालसंस्थितानि स्वामिजनितानि मानदुःखानि । रिपुगजदशनप्रेरणविवरैर्भटस्य गलितानि ॥ ] भटस्य मानदुःखानि गलितानि । कैः । शत्रुगजदशनयोः प्रेरणविवरैः । किंविशिष्टानि मानदुःखानि । चिरकालसंस्थितानि । पुनः किंविशिष्टानि मानदुःखानि । स्वामिजनितानि ॥ १७८*१ ॥

178*2) [ कर्दमरुधिरविलिप्तो रणाङ्गणे नैव निपतितः सुभटः । अतिसाहसेन भीत इन्द्रोऽमृतेन सिञ्चति ।। ] सुभटो रणाङ्गणे समराङ्गणे नैव निपतितः । किंविशिष्टः सुभटः । कर्दमरुधिरविलिप्तः । इन्द्रोऽमृतेनाभिषिञ्चति । किंविशिष्ट इन्द्रः । अतिसाहसेन भीतः । मा मामकीनं राज्यं ग्रहीष्यत् । अत एव जीवयेय तम् ॥ १७८*२ ॥

178*3) [ एकतो रोदिति प्रिया, अन्यतः समरतूर्यनिर्घोषाः । प्रेम्णा रणरसेन च भटस्य दोलायितं हृदयम् ॥ ] भटस्य हृदयं दोलायितम्

1 Cf. Dhvanyāloka III. 24, 1.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## गयवज्जा ।

199*1) सिद्धंगणाउरत्थलथणभरुच्छलंतमंथरतरंगं ।
सुमरंतो च्चिय मरिहिसि गइंद रे नम्मयाणीरं ॥ १ ॥

199*2) दंतुल्लिहणं सव्वंगमज्जणं हत्थचल्लणायासं ।
पोढगइंदाण मयं पुणो वि जइ नम्मया सहइ ॥ २ ॥

199*3) सयलजणपिच्छणिज्जो जो अप्पा आसि सो तए मूढ ।
केसरिभएण भज्जंत अज्ज लहुयत्तणं पत्तो ॥ ३ ॥

---

आन्दोलसमारूढम् । केन । प्रेम्णा, अन्यतो रणरागेण च । किं तत् प्रेम । एकतः प्रिया रुदति ( रोदिति ) । अन्यतः समरतूर्यनिर्घोषः । तेन प्रेम्णा रणरसेन च उभाभ्याम् आन्दोलितं मनः । यदा स्नेहं विचिन्तयति तदा गन्तुं न समीहते । यदा संग्रामतूर्याणि शृणोति तदा गन्तुमुत्सुको भवति ॥ १७८*३ ॥

199*1) [ सिद्धाङ्गनाउरःस्थलस्तनभरोच्छलन्मन्थरतरङ्गम् । स्मरन्नेव मरिष्यसि गजेन्द्र रे नर्मदानीरम् ॥ ] रे गजेन्द्र नर्मदानीरं स्मरन्नेव मरिष्यसि । किंविशिष्टं नर्मदानीरम् । सिद्धाङ्गनाया उरःस्थलं सिद्धाङ्गनोरःस्थलम् । तत्र स्तनभर उच्छलन्तः ( मन्थराः ) तरङ्गा यस्य तत् सिद्धाङ्गनोरःस्थलस्तनभरोच्छलन्मन्थरतरङ्गम् । मन्थरा निश्चलाः । एवंविधम् ॥ १९९*१ ॥

199*2) [ दन्तोल्लिखनं सर्वाङ्गमज्जनं हस्तचालनायासम् । प्रौढगजेन्द्राणां मदं पुनरपि यदि नर्मदा सहते ॥ ] प्रौढगजेन्द्राणां मदं पुनरपि यदि चेन्नर्मदा सहते । तत् किं किम् । दन्तोल्लिखनं सर्वाङ्गमज्जनं हस्तचालनायासम् ॥ १९९*२ ॥

199*3) [ सकलजनप्रेक्षणीयो य आत्मासीत् स त्वया मूढ । केसरिभयेन भज्यमान अद्य लघुत्वं प्राप्तः ॥ ] रे मूढ गजेन्द्र य आत्मा आसीत् स त्वया केसरिभयेन भङ्गं कुर्वता अद्य लघुत्वं प्राप्तः । किंविशिष्ट-स्तव आत्मा । सकलजनप्रेक्षणीयः ॥ १९९*३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



199*4) सरला मुहे न जीहा थोवो हत्थो मउब्भडा दिट्ठी।
रे रयणकोडिगव्विर गइंद न हु सेवणिज्जो सि ॥ ४ ॥

199*5) कुंजर मइंददंसणविमुक्कपुक्कारमयपसंगेण।
न हु नवरि तए अप्पा वि सो वि लहुयत्तणं पत्तो ॥ ५ ॥

वाहवज्जा ।

214*1) ओ सुयइ विलरविल्लुलियधम्मिल्लकुंतलकलावो।
अन्नत्थ वच्च वाणिय अम्हं मुत्ताहलं कत्तो ॥ १ ॥

214*2) इंतीइ कुलहराओ नायं वाहीइ भत्तुणो मरणं।
गयमयकवोलणिहसणमलमइलकरंजसाहाहि ॥ २ ॥

---

199*4) [ सरला मुखे न जिह्वा स्तोको हस्तो मदोद्भटा दृष्टिः ।
रे रत्नकोटिगर्विन् गजेन्द्र न खलु सेवनीयोऽसि ॥ ] रे रत्नकोटिगर्विन् गजेन्द्र, निश्चितं त्वं सेवनीयो नासि । कथं यथं सेवनीयो नासि । मुखे सरला जिह्वा न । अन्यच्च स्तोको हस्त उच्चस्तुण्डः ( ? ) । अन्यच्च मदोद्भटा दृष्टिः । अतस्त्वं न सेवनीयः ॥ १९९*४ ॥

199*5) [ कुञ्जर मृगेन्द्रदर्शनविमुक्तपूत्कारमदप्रसङ्गेन । न खलु केवलं त्वया आत्मापि सोऽपि लघुत्वं नीतः ॥ ] रे कुञ्जर । नवरि विशेषः ( ? ) । त्वया आत्मापि सोऽपि लघुत्वं प्रापितः । केन । मृगेन्द्रदर्शन-विमुक्तपूत्कारमदप्रसङ्गेन । मृगेन्द्रस्य दर्शनं, तेन विमुक्तः पूत्कारमदप्रसङ्गो यस्य सः । तेन ॥ १९९*५ ॥

214*1) [ अहो स्वपिति ....... लुलितधम्मिल्लकुन्तलकलापः ।
अन्यत्र व्रज वणिग् अस्माकं मुक्ताफलं कुतः॥ ] हे वणिक्, त्वमन्यत्र व्रज । अस्माकं गृहे मुक्ताफलानि कुतः । ओ पश्य । गृहस्वामी विह्वर विरल विल (?) लुलिय परस्परं लुलितधम्मिल्ल एवंविधकुन्तलकलापः स्वपिति । चेत् प्रमादी सन् गृह एव सुप्तस्तिष्ठति, तदा मुक्ताफलानि कुतः समानीयन्ते । अतः कारणात् त्वमन्यत्र गच्छ ॥ २१४*१ ॥

214*2) [ आयन्त्या कुलगृहाज् ज्ञातं व्याध्या भर्तुर्मरणम् ।
गजमदकपोलनिघर्षणमलमलिनकरञ्जशाखाभिः ॥ ] व्याध्या भर्तुर्मरणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



214*3) न तहा पइमरणे वि हु रुण्णं वाहीद निब्भरकंठं ।
जह पल्लिसमासन्ने गइंदगलगज्जियं सोउं ॥ ३ ॥

214*4) पल्लिपएसे पच्चूसणिग्गयं लुलियकुंतलकलावं ।
दट्ठूण वाहवंदं दंतकइया नियत्तंति ॥ ४ ॥

214*5) अच्छउ ता करिवहणं तुह तणुओ धणुहरं समुल्लिहइ ।
थोरथिरथणहराणं किं अम्ह माहप्पं ॥ ५ ॥

ज्ञातम् । किंविशिष्टया व्याध्या । कुलगृहात् पितृगृहादागच्छन्त्या । काभिः । गजमदकपोलनिघर्षणमलमलिनकरञ्जशाखाभिः । गजानां मदेन कपोलनिघर्षणेन मलमलिनकरञ्जशाखा यत्र ता गजमदकपोलनिघर्षण-मलमलिनकरञ्जशाखाः । ताभिः ॥ २१४*२ ॥

214*3) [ न तथा पतिमरणेऽपि खलु रुदितं व्याध्या निर्भर-कण्ठम् । यथा पल्लीसमासन्ने गजेन्द्रगलगर्जितं श्रुत्वा ॥ ] व्याध्या तथा पतिमरणेऽपि हु निश्चितं निर्भरकण्ठं यथा भवति तथा न रुदितम् । यथा पल्लीसमासन्ने गजेन्द्रगलगर्जितं श्रुत्वा । भर्तरि मरणं (? भर्तृमरणं) स्मृतिपथमागतम् । अयं भावः ॥ २१४*३ ॥

214*4) [ पल्लीप्रदेशे प्रत्यूषनिर्गतं लुलितकुन्तलकलापम् । दृष्ट्वा व्याधवृन्दं दन्तक्रयिका निवर्तन्ते ॥ ] दन्तकेतारो वणिजो निवर्तन्ते । किं कृत्वा । व्याधवृन्दं दृष्ट्वा । किंविशिष्टं व्याधवृन्दम् । पल्लीप्रदेशे प्रत्यूष-निर्गतम् । पुनः किंविशिष्टं व्याधवृन्दम् । लुलितकुन्तलकलापं विसंष्ठुल-केशसमूहम् ॥ २१४*४ ॥

214*5) [ आस्तां तावत् करिवधनं तव तनुजो धनुर्हरं (?) समुल्लिखति । स्थूलस्थिरस्तनभराणां किमस्माकं माहात्म्यम् ॥ ] किरातवधूः श्वश्रूं प्रति वक्ति । हे श्वश्रु करिवधनं तावत् तिष्ठतु । तव तनयो धनुर्हरं (?) धनुः समुल्लिखति तक्ष्णोति । तत् किमस्माकं स्थूल-स्थिरस्तनभराणां माहात्म्यम् । को भावः । यथा उन्नतपयोधरभारं पश्यन् सन् (?) तथा तत्र पुत्रो विषयान् सेवमानो बलहीनो भवति । कः करोति करिवधम् ॥ २१४*५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करहवज्जा ।

226*1) दे जं पि तं पि अहिलससु पल्लवं मा कहिं पि[1] रे करह ।
उड्ढमुहदीहसासो वल्लिं सरंतो विवज्जिहिसि ॥ १ ॥

226*2) कह वि तुलग्गावडियं महुपडलं चक्खिऊण मा खिज्ज ।
हियइच्छियाइं कत्तो अणुदियहं करह लब्भंति ॥ २ ॥

226*3) नीसससि रुयसि खिज्जसि जूरसि चिंतेसि भमसि उव्विग्गो ।
सा मरणस्स कए णं करह तए चक्खिया वल्ली ॥ ३ ॥

इंदिंदिरवज्जा ।

252*1) मोत्तूण वियडकेसरमयरंदुद्दामसुरहिसयपत्तं ।
जं महइ महुयरो पाडलाइं तं केण व गुणेण ॥ १ ॥

226*1) [ अहं प्रार्थये, यदपि तदपि अभिलषस्व पल्लवं मा कुत्रापि रे करभ । ऊर्ध्वमुखदीर्घश्वासो वल्ली स्मरन् विपत्स्यसे ॥ ] दे इति प्रार्थनायाम् । रे करभ यमपि तमपि पल्लवं कथमपि मा अभिलषस्व, अभिलाषं मा कुरुष्व । ऊर्ध्वमुखो दीर्घश्वासो वल्लीं स्मरन् सन् विपत्स्यसे विपत्तिं प्राप्स्यसि ॥ २२६*१ ॥

226*2) [ कथमपि यदृच्छापतितं मधुपटलमास्वाद्य मा खिद्यस्व । हृदयेप्सितानि कुतो अनुदिवसं करभ लभ्यन्ते ॥ ] रे करभ, कथमपि मधुपटलमास्वाद्य मा खिद्यस्व । किंविशिष्टं मधुपटलम् । तुलग्गावडियं । अटमटान्यायेन (?) संप्राप्तम् । रे करभ, अनुदिवसं दिनं दिनं प्रति हृदयेप्सितानि कुतो लभ्यन्ते ॥ २२६*२ ॥

226*3) [ निःश्वसिषि, रोदिषि, खिद्यसे, क्षीयसे, चिन्तयसि भ्रमसि उद्विग्नः । सा मरणस्य कृते खलु करभ त्वया आस्वादिता वल्ली ॥ ] हे करभ, सा वल्ली त्वया मरणस्य कृते आस्वादिता । कथम् । निश्वःसिषि, रोदिषि, खिद्यसि, जूरसि रणरणसि, चिंतेसि स्मरसि उद्विग्नः सन् विकलितः सन् भ्रमसि । अतः कारणान्मरणमेव सावशेषम् ॥ २२६*३ ॥

252*1) [ मुक्त्वा विकटकेसरमकरन्दोद्दामसुरभिशतपत्रम् । यत् काङ्क्षति मधुकरः पाटलानि तत् केन वा गुणेन ॥ ] मधुकरो भ्रमरो यत्

1 The commentator seems to have read कहं पि ( = कथमपि ).

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



252*2) तं किं पि पएसं पंकयस्स भमिऊण छप्पओ छिवइ।
नलिणीण जेण कड्ढइ आमूलगयं पि मयरंदं ॥ २ ॥

252*3) इंदिंदिर मा खिज्जसु दे निलसु कहिं पि मालईविरहे।
हियइच्छियाइ न हु संपडंति विहे पराहुत्ते[1] ॥ ३ ॥

252*4) बहुगंधलुद्ध महुयर कमलउडणिरुद्ध खिज्जसे कीस।
अहवा वसणासत्ता अन्ने वि सुहं न पावंति ॥ ४ ॥

हंसवज्जा।

263*1) वच्चिहिसि तुमं पाविहिसि सरवरं रायहंस, किं चोज्जं।
माणससरसारिच्छं पुहवि भमंतो न पाविहिसि ॥ १ ॥

पाटलाति महति। किं कृत्वा। विकटकेसरमकरन्दोद्दामधुरभिशतपत्रं मुक्त्वा। यतो मधुकरः। मधु मदिरां करोति इति मधुकरः। योऽसौ मधुकरस्तस्य चेतनाचातुर्यं न भवति ॥ २५२*१॥

252*2) [ तं किमपि प्रदेशं पङ्कजस्य भ्रान्त्वा षट्पदः स्पृशति। नलिनीनां येन कर्षति आमूलगतमपि मकरन्दम् ॥ ] षट्पदः पङ्कजस्य कमलस्य भ्रान्त्वा किमपि प्रदेशं स्पृशति, येन उपायेन नलिनीनाम् आमूलगतमपि मकरन्दमाकर्षति ॥ २५२*२॥

252*3) [ इन्दिन्दिर मा खिद्यस्व प्रार्थये निलय कुत्रापि मालतीविरहे। हृदयेप्सितानि न खलु संपतन्ति दैवे पराग्भूते ॥ ] हे इन्दिन्दिर भ्रमर मा खिद्यस्व। 'दे' इति अभ्यर्थनायाम्। कथमपि मालतीविरहे सति तर्हि निल(य)स्व स्वस्थो भव। दैवे पराङ्मुखे सति हृदयेप्सितानि न सम्पद्यन्ते ॥ २५२*३॥

252*4) [ बहुगन्धलुब्ध मधुकर कमलपुटनिरुद्ध खिद्यसे कस्मात्। अथवा व्यसनासक्ता अन्येऽपि सुखं न प्राप्नुवन्ति ॥ ] बहुगन्धमुग्ध मधुकर कमलपुटनिरुद्धः कस्मात् त्वं खिद्यसे रुदनं करोषि। अथवा व्यसनासक्ताः प्राणिनोऽन्येऽपि सुखं न प्राप्नुवन्ति ॥ २५२*४ ॥

263*1) [ व्रजिष्यसि त्वं प्राप्स्यसि सरोवरं राजहंस, किं चित्रम्। मानससरःसदृक्षं पृथिवीं भ्रमन् न प्राप्स्यसि ॥ ] सुगमा ॥ २६३*१ ॥

1 Cf. Gātha No. 245.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



263*2) माणससरोरुहाणं मा सायं सरसु रे हंस।
कज्जाइ दिव्ववससंठियाइ दुक्खेहि लब्भंति ॥ २ ॥
263*3) हंसेहि समं जह रमइ कमलिणी तह य महुयरेणावि।
सियकसिणणिव्विसेसाइ होंति महिलाण हिययाइं ॥ ३ ॥
263*4) विउलं पि जलं जलरंकुएहि तह कलुसियं हयासेहिं।
जह अवसरवडियाण वि न हु निलयं रायहंसाणं ॥ ४ ॥
छइल्लवज्जा।
284*1) अक्खंडियउवयारा पुव्वाभावे अभिन्नमुहराया।
सिढिलंता वि सिणेहं छेया दुक्खेहि नज्जंति ॥ १ ॥
284*2) ताव च्चिय ढलहलया जाव च्चिय नेहपूरियसरीरा।
छेया नेहविहूणा तिलसच्छाया खला हुंति ॥ २ ॥

263*2) [ मानससरोरुहाणां मा सातं स्मर रे हंस। कार्याणि दैववशसंस्थितानि दुःखैर्लभ्यन्ते ॥ ] हे हंस मानससरोरुहाणां सातानि सौख्यानि मा नाम त्वं स्मरस्व। दैववशसंस्थितानि कार्याणि दुःखैर्लभ्यन्ते ॥ २६३*२ ॥

263*3) [ हंसैः समं यथा रमते कमलिनी तथा च मधुकरेणापि। सितकृष्णनिर्विशेषाणि भवन्ति महिलानां हृदयानि ॥ ] सा कमलिनी हंसेन समं रमते, तथा मधुकरेणापि समं रमते। युक्तम्। महिलानां हृदयानि सितकृष्णनिर्विशेषाणि भवन्ति ॥ २६३*३ ॥

263*4) [ विपुलमपि जलं जलरंकैस्तथा कलुषितं हताशैः। यथा अवसरपतितानामपि न खलु निलयो राजहंसानाम् ॥ ] जलरंकैः जलजीवैः, विपुलमपि जलं तथा कलुषितं यथा अवसरपतितानामपि हु निश्चितं राजहंसानां निलयः स्थानं न भवति ॥ २६३*४ ॥

284*1) [ अखण्डितोपचाराः पूर्वाभावे अभिन्नमुखरागाः। शिथिलयन्तोऽपि स्नेहं छेका दुःखैर्ज्ञायन्ते ॥ ] छेकाश्चतुराः स्नेहं शिथिलयन्तोऽपि दुःखैर्ज्ञायन्ते। किंविशिष्टाश्छेकाः। अखण्डितोपका ( ? चा ) राः, पूर्वाभावे ( ? ) अभिन्नमुखरागाः। अतः कारणात् छेका विरक्ता अपि नावगम्यन्ते ॥ २८४*१ ॥

284*2) [ तावदेव अनुकम्पिनो यावदेव स्नेहपूरितशरीराः। छेकाः स्नेहविहीनास्तिलसदृक्षाः खला भवन्ति ॥ ] छेकास्तावदेव ढलहल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



284*3) वंकभणियाइ कत्तो कत्तो अद्धच्छिपेच्छियव्वाइं ।
ऊससियं पि मुणिज्जइ छइल्लजणसंकुले गामे ॥ ३ ॥

284*4) अणुणयकुसलं परिहासपेसलं लडहवाणिसोहिल्लं ।
आलाव च्चिय छेयाण कम्मणं किं च मूलीहिं ॥ ४ ॥

284*5) ते धन्ना ताण नमो ते कुसला ताण वम्महपसाओ ।
जे बालतरुणिपरिणयवयाहि हियए धरिज्जंति ॥ ५ ॥

284*6) वंकं ताण न कीरइ किं कज्जं जस्स ते वि याणंति ।
सब्भावेण य छेया पुत्ति देव व्व घेप्पंति ॥ ६ ॥

स्वभावाः ... परिणामिनो भवन्ति, यावत् स्नेहप्रपूरिता भवन्ति । छेकाः स्नेहविहीनाः खला भवन्ति, दुर्जनाः स्युः । किंविशिष्टाः छेकाः । तिलसच्छायास्तिलसदृक्षाः । यथा तिलाः स्नेहविहीनाः खला भवन्ति॥२८४*२॥

284*3) [ वक्रभणितानि कुतः कुतो अर्धाक्षिप्रेक्षितव्यानि । उच्छ्वसितमपि ज्ञायते छेकजनसङ्कुले ग्रामे ॥ ] चतुरजनसङ्कुले ग्राम उच्छ्वसितमपि ज्ञायते । स्वल्पेऽपि विकारे हृदयपरिणामं जानन्ति ॥२८४*३॥

284*4) [ अनुनयकुशलं परिहासपेशलं लटभवाणीशोभाढ्यम् । आलाप एव च्छेकानां कार्मणं, किं च मूलीभिः ॥ ] छेकानामालाप एव कार्मणं, मूलिकाभिः किम् । किंविशिष्टं कार्मणम् । अनुनयकुशलम् अनुनयने प्रसादने कुशलम् । एतावता प्रसन्नम् । पुनः कथम् । परिहासपेशलं हास्येन मनोज्ञम् । पुनरपि किंविशिष्टं तत् कार्मणम् । लडहवाणिसोहिल्लं । सौभाग्यवाणीसुन्दरम् ॥ २८४*४ ॥

284*5) [ ते धन्यास्तेभ्यो नमस्ते कुशलास्तेषां मन्मथप्रसादः । ये बालातरुणीपरिणतवयोभिर्हृदये धार्यन्ते ॥ ] ते धन्यास्तेभ्यो नमः, ते कुशलास्तेषां मन्मथः प्रसादे वर्तते, ये मनुष्या बालातरुणीपरिणतवयोभिर्हृदये ध्रियन्ते ॥ २८४*५ ॥

284*6) [ वक्रं तेषां न क्रियते किं कार्यं यस्य तेऽपि जानन्ति । सद्भावेन च च्छेकाः पुत्रि देवा इव गृह्यन्ते ॥ ] हे पुत्रि च्छेका ये ते न (?) जानन्ति । तेषां पुरस्ताद् वक्रं न क्रियते । अन्यच्च ते सद्भावेन देवा इव गृह्यन्ते ॥ २८४*६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



284*7) दिण्णा पुणो वि दिज्जउ रेहा छेयत्तणम्मि कण्हस्स ।
जो रमइ गोविसत्थं हिययणिहित्ताइ लच्छीए ॥ ७ ॥

284*8) हियए जं च निहित्तं तं पि हु जाणंति बुद्धीए ।
मा पुत्ति वंकबंधं जंपसि पुरओ छइल्लाणं ॥ ८ ॥[1]

नयणवज्जा ।

300*1) धणु संधइ भुयवलयं[2] आयड्ढइ नयणबाण कण्णंता ।
विंधइ मणं न जीयं अउव्वधाणुक्किणी बाला ॥ १ ॥

300*2) पामरवहुयाइ सवम्महाण नयणाण रक्खसाणं व ।
सासंको भमइ जणो जोयइ मग्गं पुलोयंतो ॥ २ ॥

284*7) [ दत्ता पुनरपि दीयतां रेखा छेकत्वे कृष्णस्य । यो रमयति गोपीसार्थं हृदयनिहितया लक्ष्म्या ।। ] कृष्णस्य छेकत्वे रेखा दत्ता पुनरपि दीयताम् । यः कृष्णो गोपीभिः सार्धं[3] रमते । कया लक्ष्म्या । किंविशिष्टया लक्ष्म्या । हृदयनिहितया ।। २८४*७ ।।

284*8) [ हृदये यच्च निहितं तदपि खलु जानन्ति बुद्ध्या । मा पुत्रि वक्रबन्धं जल्पसि पुरतश्छेकानाम् ।। ] हे पुत्रि चतुराणां पुरुषाणां पुरस्ताद् वक्रबन्धं मा जल्पसि । यद् हृदये निहितम् आरोपितं भवति तदपि जानन्ति । कया । बुद्ध्या तीक्ष्णमत्या २८४*८ ।।

300*1) [ धनुः संदधाति भ्रूवलयम् आकर्षति नयनबाणान् कर्णान्तात् । विध्यति मनो न जीवम् अपूर्वधानुष्का बाला ।। ] बाला अपूर्वधानुष्किणी अपूर्वधनुर्धरा वर्तते । या बाला मनो विध्यति न जीवं जीवितव्यम् । अत एव अपूर्वधानुष्किणी । भुजवलया ( ? भ्रूवलया ) सती धनुः संधइ संदधाति । नयनबाणान् आ कर्णान्ताद् आकर्षयति ।।३००*१।।

300*2) [ पामरवध्वाः समन्मथाभ्यां नयनाभ्यां राक्षसाभ्यामिव । साशङ्को भ्रमति जनो पश्यति मार्गं प्रलोकयन् ।। ] जनो लोकः साशङ्कः परिभ्रमति । कथं साशङ्कः इत्याह । पामरवध्वा नयनेभ्यश्चान्यद् राक्षसेभ्यः । किंविशिष्टेभ्यो नयनेभ्यः । समन्मथेभ्यः । सकामेभ्यः । किं-

1 Cf. Gātha No. 282. 2 We must obviously read भुमयं instead of भुयवलयं. 3 The commentator appears to have read गोवीसद्धं ( = गोपीसार्धम् = गोपीभिः सार्धम् ).

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



300*3) अज्जे वि य तेण विणा इमीए एयाइ कसिणधवलाइं ।
जच्चंधगोरुयाइ व दिसासु घोलेंति नयणाइं ॥ ३ ॥[2]

300*4) सियकसिणदीहरुज्जलपम्हलघोलंततारणयणाणं ।
तरुणाण मा हु हयविहि दिट्ठीपसरं पि भंजिहिसि ॥ ४ ॥

300*5) रत्तं रत्तेहि सियं सिएहि कसिणं कुणंति कसिणेहिं ।
सियकसिणच्छीहि तए मयच्छि रत्तो जणो चोज्जं ॥ ५ ॥

विशिष्टेभ्यो राक्षसेभ्यः । समन्मथेभ्यः सकामेभ्यः । यथा पामरवध्वा नयनेभ्यो जनः शङ्कते, राक्षसेभ्यस्तथैव शङ्कते । जनः किं कुर्वन् । मार्गं प्ररूपयन् मार्गं विलोकयन् जायते[1] ॥ ३००*२ ॥

300*3) [ अद्यापि च तेन विना अस्या एते कृष्णधवले । जात्यन्धगोरूपाया इव दिशासु घूर्णतो नयने ।। ] अस्या नायिकाया अद्यापि तेन वल्लभेन विना एतानि नयनानि दिशासु घोलंति ( घूर्णन्ति ) । नयनानि कानीव । जात्यन्धगोरूपाया इव । यथा जात्यन्धगोरूपाया नयनानि शून्यानि दिक्षु घोलंति ( घूर्णन्ति ) । किंविशिष्टानि नयनानि । कसिण-धवलाइं । किंचित् कृष्णानि किंचिद् धवलानि ॥ ३००*३ ॥

300*4) [ सितकृष्णदीर्घोज्ज्वलपक्ष्मलघूर्णमानतारनयनानाम् । तरुणानां मा खलु हतविधे दृष्टिप्रसरमपि भङ्क्ष्यसि ।। ] हे हतविधे दुर्दैव । ' हु ' निश्चितम् । नयनयोर्दृष्टिप्रसरं मा भङ्क्ष्यसि । किंविशिष्टयो-र्नयनयोः । सितकृष्णदीर्घतरोज्ज्वलपक्ष्मलघूर्णमानतारकयोः ॥ ३००*४॥

300*5) [ रक्तं रक्तैः सितं सितैः कृष्णं कुर्वन्ति कृष्णैः । सितकृष्णाक्षिभ्यां त्वया मृगाक्षि रक्तो जन आश्चर्यम् ।। ] हे मृगाक्षि, रक्ताभिः अक्षभिः ( ? ) रक्तं कुर्वन्ति, सिताभिः सितं कुर्वन्ति, कृष्णाभिः कृष्णं कुर्वन्ति । हे मृगाक्षि त्वया सितकृष्णाभिः अक्षभिः जनो रक्त इत्याश्चर्यम् ।। ३००*५ ॥

1 The commentator seems to have read जायइ in place of जोयइ ( = पश्यति ). जोयइ involves repetition with पुलोयंतो. जायइ stands in need of some predicative adjective. 2 Cf. Gāthā No. 376.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



300*6) गाढयरचुंबणुप्फुसियबहलणीलंजणाइ रेहंति ।
बप्फब्भिंतरपसरियगलंतबाहाहि अच्छीइं ॥ ६ ॥
300*7) न मए रुण्णं न कयममंगलं होंतु सयलसिद्धीओ ।
विरहग्गिधूमकडुयावियाइ पगलंति नयणाइं ॥ ७ ॥[1]

थणवज्जा ।

312*1) नहकुंतग्गयभिन्ना हारावलिसुत्तमंडलग्गठिया ।
रेहंति सुरयरज्जाहिसेयकलस व्व से थणया ॥ १ ॥
312*2) सो तण्हाइयपहिय व्व दूमिओ तीइ दिट्ठमेत्तेहिं ।
पंथपवाकलसेहि व थणेहि उम्मंथियमुहेहिं ॥ २ ॥

300*6) [ गाढतरचुम्बनप्रोञ्छितबहलनीलाञ्जने शोभेते । बाष्पाभ्यन्तरप्रसृतगलत् ... (?) अक्षिणी ॥ ] नायिकायाः अक्षीणि रेहंति शोभन्ते । काभिः । बाष्पाभ्यन्तरप्रसृतगलद्बाहाभिः (?) । पुनः किंविशिष्टानि अक्षीणि । गाढतरचुम्बनस्पृशात (?) बहुलनीलाञ्जनानि ॥ ३००*६ ॥

300*7) [ न मया रुदितं न कृतममङ्गलं भवन्तु सकलसिद्धयः । विरहाग्निधूमकटुकीकृते प्रगलतो नयने ॥ ] सुगमेयं गाथा ॥ ३००*७ ॥

312*1) [नखकुन्ताग्रकभिन्नौ हारावलीसूत्रमण्डलाग्रस्थितौ । शोभेते सुरतराज्याभिषेककलशाविव तस्याः स्तनौ ॥ ] तस्या नायिकायाः स्तनौ सुरतराज्याभिषेककलशाविव राजेते । किंलक्षणौ । नखकुन्ताग्रकभिन्नौ । अन्यावपि कलशौ नखकुन्ताग्रभिन्नौ स्याताम् । पुनरपि किंविशिष्टौ स्तनौ । हारावलीसूत्रमण्डलाग्रस्थितौ । अन्यावपि कलशौ सूत्रमण्डलाग्रस्थितौ भवतः ॥ ३१२*१ ॥

312*2) [ स तृषितपथिक इव दूनस्तस्या दृष्टमात्राभ्याम् । पथिप्रपाकलशाभ्यामिव स्तनाभ्यां दग्धमुखाभ्याम् ॥ ] स कश्चित् तस्या नायिकायाः स्तनैर्दूनः । स क इव । तृष्णार्दितपथिक इव । स्तनैः कैरिव । पथिप्रपाकलशैरिव । यथा पथिप्रपाकलशैः उन्मथितमुखैः पथिको दूयते । किंभूतैः स्तनैः । दृष्टमात्रैः । दृष्टा स्तोका मात्रा पानीयलक्षणा येषु ते दृष्टमात्राः । तैर्दृष्टमात्रैः ॥ ३१२*२ ॥

1 Cf. Gātha No. 370

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



312*3) थणकणयकलसजुयलं रोमावलिलोहसंकलाबद्धं।
कस्स कए णं बाला रयणणिहाणं समुव्वहइ ॥ ३ ॥

312*4) अणुरायरयणभरियं कंचणकलसम्मि[1] तरुणिथणजुयलं।
ता किं मुहम्मि कालं मसिमुद्दा मयणरायस्स ॥ ४ ॥

312*5) ठाणच्चुयाण सुंदरि मंडलरहियाण विहवचत्ताणं।
थणयाण सुपुरिसाण य को हत्थं देइ पडियाणं ॥ ५ ॥[2]

312*6) नहकुंतग्गयभिन्ना समुहागयकुंभपीलणसमत्था।
थणया निव्वूढभरा भडु व्व पडिया वि सोहंति ॥ ६ ॥

312*3) [ स्तनकनककलशयुगलं रोमावलीलोहशृंखलाबद्धम्। कस्य कृते ननु बाला रत्ननिधानं समुद्वहति ॥ ] बाला कस्य कृते। 'णं' इति वाक्यालंकारे। रत्ननिधानं समुद्वहति। किंविशिष्टं रत्ननिधानम्। स्तनकनककलशयुगलम्। अन्यदपि यत्र रत्ननिधानं भवति तत्र कलशौ विलोक्येते। किंविशिष्टं स्तनयुगलम्। रोमावलीलोहशृंखलाबद्धम्। अन्यावपि कलशौ लोहशृंखलाबद्धौ स्याताम् ॥ ३१२*३ ॥

312*4) [ अनुरागरत्नभृतं काञ्चनकलशे तरुणीस्तनयुगलम्। तत् किं मुखे कालं मषीमुद्रा मदनराजस्य ॥ ] तरुणीस्तनयुगलं काञ्चनकलशे अनुरागरत्नभृतं वर्तते। ता तत इदं स्तनयुगलं मुखे कालं किम्। मदनराजस्य मषीमुद्रा वर्तते। अन्यस्मिन् रत्ननिधानकलशे मुद्रा विधीयते। एषु स्तनेषु कृष्णमुद्रा, कस्य। मदनराजस्य ॥ ३१२*४ ॥

312*5) [ स्थानच्युतानां सुन्दरि मण्डलरहितानां विभवपरित्यक्तानाम्। स्तनानां सुपुरुषाणां च को हस्तं ददाति पतितानाम् ॥ ] हे सुन्दरि, स्तनानां चान्यत् सत्पुरुषाणां पतितानां को हस्तावलम्बं ददाति। अपि तु न कोऽपि। किंविशिष्टानां स्तनानाम्। स्थानच्युतानाम्। पुनः किंविशिष्टानाम्। मण्डलरहितानां परिवाररहितानाम्। पुनः किंविशिष्टानाम्। विभवत्यक्तानाम्। ॥ ३१२*५ ॥

312*6) [ नखकुन्ताग्रकभिन्नौ संमुखागतकुम्भपीडनसमर्थौ। स्तनौ निर्व्यूढभरौ भट इव पतितावपि शोभेते ॥ ] स्तनाः पतिता अपि शोभन्ते।

1 We must read कंचणकलस व्व ( = काञ्चनकलशाविव ), even against the commentator.
2 Cf. Gāthā No. 681

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



312*7) आसन्नपडणभयभीरुएहि जमलेहि सामलमुहेहि ।
दुद्धंसुएहि रुण्णं थणेहि ठाणं मुयंतेहिं ।

312*8) अलिया खल व्व कुडिला मज्झंसे किविणदाणसारिच्छा ।
थणया उन्नयचिंतिय व तीइ हियए न मायंति ॥ ८ ॥[1]

312*9) थणहारं तीइ समुन्नयं पि दट्ठूण तारिसं पडियं ।
मा कुणउ को वि गव्वं एत्थ असारम्मि संसारे ॥ ९ ॥[2]

क इव । भटा इव सुभटा इव । यथा सुभटाः पतिता अपि शोभन्ते । किंविशिष्टाः स्तनाः किंविशिष्टा भटाः । नखकुन्ताप्रभिन्नाः । पुनः किंविशिष्टाः । संमुखागतकुंभपीडनक्षमर्थाः । पुनः किंविशिष्टाः । निर्व्यूढ-भराः उदूढसमरभाराः ॥ ३१२*६ ॥

312*7) [ आसन्नपतनभयभीरुकाभ्यां यमलाभ्यां श्यामलमुखाभ्याम् । दुग्धाश्रुभिः रुदितं स्तनाभ्यां स्थानं मुञ्चद्भ्यां ॥ ] स्तनाभ्यां स्थानं मुञ्चद्भ्यां दुग्धाश्रुभिः रुदितम् । किंविशिष्टाभ्याम् । आसन्नपतनभयभीरुकाभ्याम् । पुनः किंविशिष्टाभ्याम् । युगलाभ्याम् । पुनरपि किंविशिष्टाभ्याम् । श्याम-मुखाभ्याम् ॥ ३१२*७ ॥

312*8) [ अलीकौ खल इव कुटिलौ मध्यांशे कृपणदानसदृक्षौ । स्तनौ उन्नतचिन्तितमिव तस्या हृदये न मातः ॥ ] स्तनौ हृदये न मातः । किमिव । उन्नतचिन्तितमिव । द्विवचने एकवचनं( ? ) ( बहुवचनं ) प्राकृतत्वात् । किंविशिष्टौ स्तनौ । खल इव अलीकौ । यथा खला अलीका भवन्ति ( तथा ) । कुटिलाः खला भवन्ति । पुनः किंविशिष्टाः स्तनाः । कुटिलाः । पुनरपि किंविशिष्टाः स्तनाः । मध्यांशे मध्यप्रदेशे कृपणदान-सदृक्षाः ॥ ३१२*८ ॥

312*9) [ स्तनभारं तस्याः समुन्नतमपि दृष्ट्वा तादृशं पतितम् । मा करोतु कोऽपि गर्वमत्र असारे संसारे ॥ ] भो लोका अत्र असारे संसारे कोऽपि गर्वं मा करोतु । किं कृत्वा । तस्यास्तादृशं समुन्नतमपि स्तनभारं पतितं दृष्ट्वा । एतावता संसारोऽनित्य एव ॥ ३१२*९ ॥

1 Cf. Gāthā No. 302. Better to read उन्नयचिंत व्व so as to suit the metre. 2 Cf. Gāthā No. 311.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



312*10) उच्चट्ठाणा वि सुसंगया वि संपुण्णया वि तुह थणया।
तरुणमणरयणसारं हरंति जं तं महच्छरियं ॥ १० ॥

312*11) ठाणयरेहिं एहिं अहोमुहेहिं अणवरयपोढेहिं।
सिहिणेहि नरिंदेहि व किं किज्जइ पयविमुक्केहिं ॥ ११ ॥

लावण्णवज्जा।

318*1) इह तिवलिरमणे इह वयणकमले इह कढिणविउलथणवट्टे।
अज्झाए लावण्णं फलियं पिव ढुंगढुंगेहिं ॥ १ ॥

318*2) अन्नन्ना मेहलया अन्नन्नो कंचुओ नवयहूए।
परिहेउं न समप्पइ समारुहंतम्मि तारुण्णे ॥ २ ॥

312*10) [ उच्चस्थानावपि सुसंगतावपि संपूर्णावपि तव स्तनौ। तरुणमनोरत्नसारं हरतो यत् तन् महाश्चर्यम् ॥ ] हे सुन्दरि, तव स्तनौ तरुणमनोरत्नसारं यद् हरतः तन् महदाश्चर्यम्। कथम्। किंलक्षणौ स्तनौ। उच्चस्थानौ। न तु येऽत्र उच्चस्थानाः स्युः, ते कस्यापि किमपि हरन्ति। पुनः किंलक्षणौ स्तनौ। सुसंगतावपि सुप्रीतावपि। पुनरपि किंलक्षणौ स्तनौ। संपूर्णावपि। न तु ये संपूर्णाः सन्ति ते परकीयं धनं हरन्ति। इत्याश्चर्यम् ॥ ३१२*१० ॥

312*11) [ स्थानकराभ्यामाभ्यामधोमुखाभ्यामनवरतप्रौढाभ्याम्। स्तनाभ्यां नरेन्द्राभ्यामिव किं क्रियते पदविमुक्ताभ्याम् ॥ ] आभ्यां स्तनाभ्यां पदविमुक्ताभ्यां स्थानच्युताभ्यां किं क्रियते। कैरिव। नरेन्द्रैरिव। यथा स्थानविमुक्तैर्नरेन्द्रैः किं क्रियते। किंविशिष्टैर्नरेन्द्रैः स्तनैश्च। स्थानकरैः। पुनः किंप्रकारैः। अधोमुखैः। पुनरपि किंविशिष्टैः। अनवरतप्रौढैः ॥३१२*११॥

318*1) [ इह त्रिवलिरमण इह वदनकमल इह कठिनविपुलस्तनपट्टे। प्रौढयुवत्या लावण्यं फलितमिव स्तबकस्तबकैः ॥ ] प्रौढयुवत्या लावण्यं ढुंगढुंगेहिं स्तबकस्तबकैः फलितमिव। इवशब्देन वृक्ष इव फलितम्। यथा वृक्षः काले काले स्थाने स्थाने फलति तथा। क फलितम्। अत्र त्रिवलिरमणे जघनप्रदेशे। पुनः क। अत्र च वदनकमले। पुनः क। अत्र कठिनविपुलस्तनपट्टे ॥ ३१८*१ ॥

318*2) [ अन्यान्या मेखला अन्यान्यः कंचुको नववध्वाः। परिधातुं न समाप्यते समारोहति तारुण्ये ॥ ] अन्या अन्या मेखला, अन्यो अन्यः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



318*3) अंतोकढंत मयणग्गिताविथं वहइ कणयकंतिल्लं।
बालाए लावण्णं उप्फिणियं थणभरमिसेण ॥ ३ ॥

318*4) सहस त्ति जं न भज्जइ थणहरभारेण मज्झतणुयंगी।
भंजणभएण विहिणा दिन्नो रोमावलीखंभो ॥ ४ ॥

318*5) बालाकवोललावण्णणिज्जिओ चंद खिज्जसे कीस।
अह माणो न हु कीरउ बहुरयणविभूसिया पुहवी ॥ ५ ॥

318*6) बाला लावण्णणिही नवल्लवल्लि व्व माउलिंगस्स।
चिंचि व्व दूरपक्का करेइ लालाउलं हिययं ॥ ६ ॥

कंचुको नववध्वाः। परिधातुं न समाप्यते समाप्तिं न याति। क सति। ( समारोहति तारुण्ये। ) यावत् सुरतावसाने स्वस्था सती मेखलां कंचुकं च परिदधाति, तावत् पतिना उत्तार्यते इति भावः ॥३१८*२ ॥

318*3) [ अन्तःक्वथत् मदनाग्निनापितं वहति कनककान्तियुक्तम्। बालाया लावण्यं बहिर्निर्गतं, स्तनभरमिषेण ॥ ] बालाए प्रौढयुवत्या लावण्यं स्तनभरमिषेण स्तनभरच्छद्मना अत्र उप्फिणियं उत्कलितं बाह्ये निर्गतम्। कीदृशं लावण्यम्। अन्तःक्वथत्। पुनः कीदृशम्। मदनाग्निना तापितं सत् कनककान्तितुल्यकान्ति। वहति ( स्तनभरमिषेण )। अनेन हेतुना स्तने कनककलशोपमा योग्या ॥ ३१८*३ ॥

318*4) [ सहसेति यन्न भज्यते स्तनभरभारेण मध्यतनुकाङ्गी। भङ्गभयेन विधिना दत्तो रोमावलीस्तम्भो ॥ ] सहसेति यन्न भज्यते न त्रुट्यति स्तनभरभारेण मध्यतनुकाङ्गी, तद् विधिना त्रुटनभयेन रक्षणार्थं रोमावलीस्तम्भः प्रदत्तः ॥ ३१८*४ ॥

318*5) [ बालाकपोललावण्यनिर्जितश्चन्द्र खिद्यसे कस्मात्। अथ मानो न खलु क्रियतां बहुरत्नविभूषिता पृथ्वी ॥ ] हे चन्द्र कस्मात् खिद्यसे। किंविशिष्टश्चन्द्रः। बालाकपोललावण्यनिर्जितः। अथवा मानः कापि न क्रियते (? क्रियताम्)। यतः पृथ्वी बहुरत्नविभूषिता वर्तते ॥ ३१८*५ ॥

318*6) [ बाला लावण्यनिधिर्नवीनवल्लीव मातुलिङ्गस्य। चिंचेव दूरपक्का करोति लालाकुलं हृदयम् ॥ ] बाला लावण्यनिधिर्नवीनमातुलिङ्गस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## सुरयवज्जा

328*1) अन्नोन्नणेहणिज्झरविइण्णहिययाण अलियकुवियाणं ।
पत्तियजणाण सुरए जं सोक्खं तं फुडं अमयं ॥ १ ॥

328*2) सुरयावसाणसमए मउलियणयणाणणा य बिंबोट्ठी ।
अलहंती सुरयसुहं पासत्थमुही पियं भणइ ॥ २ ॥

328*3) सुरयप्पसुत्त कोवण अप्पंभर मा हु रे निवज्जिहिसि ।
कयकज्ज किं न याणसि असमत्तरयाण जं दुक्खं ॥ ३ ॥

328*4) चलवलयमेहलरवं कलकलिरमणोहरं च सोऊण ।
ईसा रोसो महिलत्तणं च मुक्कं सवत्तीहिं ॥ ४ ॥

वल्लीव । सा बाला लालाकुलं हृदयं करोति । केव । चिंचिव्व । आचाम्लिकेव । यथा आचाम्लिका दूरपक्वा सती हृदयं लालाकुलं कुरुते ॥ ३१८ ६ ॥

328*1) [ अन्योन्यस्नेहनिर्झरवितीर्णहृदयानाम् अलीककुपितानाम् । विश्वस्तजनानां सुरते यत् सौख्यं तत् स्फुटममृतम् ॥ ] प्रतीतजनानां सुरते दृढस्नेहयुक्तानां संभोगे यत्सौख्यं तत् स्फुटं प्रकटम् अमृतम् । किंविशिष्टानाम् । अन्योन्यस्नेहनिर्झरवितीर्णहृदयानाम् । पुनः किंविशिष्टानाम् । अलीककुपितानाम् ॥ ३२८*१ ॥

328*2) [ सुरतावसानसमये मुकुलितनयनानना च बिम्बोष्ठी । अलभमाना सुरतसुखं पार्श्वस्थमुखी प्रियं भणति ॥ ] बिम्बोष्ठी सुरतावसानसमये मुकुलितनयनानना सती सुरतसुखमलभमाना वक्रमुखी प्रियं भणति ॥ ३२८*२ ॥

328*3) [ सुरतप्रसुप्त कोपन आत्मंभर मा खलु रे निपत्स्यसे । कृतकार्य किं न जानासि असमाप्तरतानां यद् दुःखम् ॥ ] किं भणतीत्याह । हे कोपन क्रोधनशील, आत्मंभर, हु निश्चितं सुरतप्रसुप्त मा निवर्तयसि[1] । रे कृतकार्य किं न जानासि असमाप्तरतानां यद् दुःखं वर्तते ॥ ३२८*३ ॥

328*4) [ चलवलयमेखलारवं कलकलयुक्तमनोहरं च श्रुत्वा । ईर्ष्या रोषो महिलात्वं च मुक्तं सपत्नीभिः ॥ ] सपत्नीभिः ईर्ष्या रोषो महिलात्वं

1 The commentator seems to have read निवट्टिहिसि in place of निवज्जिहिसि.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



328*5) बाला असमत्तरया रयावसाणम्मि पहरिसी भणइ।
किं सुयसि नाह, हं [1]सुयमि, किं नु पज्जत्तकज्जो सि ॥५॥

पेम्मवज्जा।

349*1) पढमारंभमणहरं घणलग्गं माणरायरमणिज्जं।
पेम्मं सुरिंदचावं व चंचलं झत्ति वोलेइ ॥ १ ॥

349*2) खणभंगुरेण विसमेण हारिणा दुण्णिवारपसरेण।
अणवट्ठियसब्भावेण सव्वहा होउ पेम्मेण ॥ २ ॥

च मुक्तम्। तत्र ईर्ष्या असहनत्वम्। रोरः क्रोधः। महिलात्वं स्त्रीचरित्रम्। मुक्तम्। किं कृत्वा। चलवलयमेखलारवं श्रुत्वा चलनूपुरमेखलाशब्दं समाकर्ण्य। किंविशिष्टं मेखलारवम्। कलकलिरमनोहरम्। मानान्य (?) शब्दसुन्दरम् ।। ३२८*४ ।।

328*5) [ बाला असमाप्तरता रतावसाने प्रहृष्टा भणति। किं स्वपिषि नाथ, अहं स्वपिमि, किं खलु पर्याप्तकार्योऽसि ।। ] बाला रतावसाने प्रहर्षिता सती भणति। किंविशिष्टा बाला। असमाप्तरता। असमाप्तं रतं यया सा। किं भणति तदाह। हे नाथ त्वं स्वपिषि शयनं कुरुषे किम्। अहं स्वपिमि। किं पर्याप्तकार्योऽसि कृतकृत्योऽसि ॥३२८*५॥

349*1) [ प्रथमारम्भमनोहरं घनलग्नं मानरागरमणीयम्। प्रेम सुरेन्द्रधनुरिव चञ्चलं झटिति अपक्रामति ।। ] चञ्चलं प्रेम झटिति शीघ्रं त्रोडयति (?)। किमिव। सुरेन्द्रचापमिव। किंविशिष्टं प्रेम। प्रथमारम्भमनोहरम्। घनलग्नं मनसि सत् रागरमणीयं भवति। सुरेन्द्रचापमपि तथैव ।। ३४९*१ ।।

349*2) [ क्षणभङ्गुरेण विषमेण हारिणा दुर्निवारप्रसरेण। अनवस्थितस्वभावेन सर्वथा भवतु प्रेम्णा ।। ] अनेन प्रेम्णा भवतु पूर्यताम्। किंविशिष्टेन प्रेम्णा। क्षणभङ्गुरेण तत्कालविनश्वरेण। पुनः किंविशिष्टेन प्रेम्णा। विषमेण। पुनरपि किंप्रकारेण प्रेम्णा। हारिणा मनोहारिणा। पुनरपि किंविशिष्टेन। दुर्निवार्यप्रसरेण। पुनरपि किंप्रकारेण प्रेम्णा। अनवस्थितसद्भावेन नैकरंगेण ।। ३४९*२ ।।

1 Better to read हुं ( हुँ )( = yes ).

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



349*3) जइ देव मह पसन्नो मा जम्मं देहि माणुसे लोए।
अह जम्मं मा पेम्मं, अह पेम्मं मा विओयं च ॥ ३ ॥
349*4) अन्नं तं सयदलियं पि मिलइ रसगोलिय व्व जं पेम्मं।
अम्हं मयच्छि मुत्ताहलं व फुट्टं न संघडइ ॥ ४ ॥
349*5) दढणेहणालपसरियसब्भावदलस्स रइसुयंधस्स।
पेम्मुप्पलस्स मुद्धे माणतुसारो च्चिय विणासो ॥ ५ ॥[1]
349*6) अव्वो जाणामि अहं पेम्मं च हवेइ लोयमज्झम्मि।
थिरआसाए रइयं न पीडियं नवरि दिव्वेण ॥ ६ ॥[2]

349*3) [ यदि देव मम प्रसन्नो मा जन्म देहि मानुषे लोके। अथ जन्म मा प्रेम, अथ प्रेम मा वियोगं च ॥ ] हे देव यदि मम प्रसन्नो वर्तसे मनुष्यलोके जन्म मा देहि। मानुषं जन्म मा कुरु। अथ जन्म ददासि तदा प्रेम मा दास्यः ( ? देहि, दद्याः )। अथ प्रेम ददासि तदा वियोगं मा देयाः ॥ ३४९*३ ॥

349*4) [ अन्यत् तत् शतदलितमपि मिलति रसगोलिकेव यत् प्रेम। अस्माकं मृगाक्षि मुक्ताफलमिव स्फुटितं न संघटते ॥ ] शतदलितमपि चूर्णीकृतमपि अन्नं अन्यत् धन्यं तत् ( प्रेम यत् ) मिलति रसगोलकमिव। यथा रसगोलकं दलितमपि मिलति। हे मृगाक्षि, अस्माकं यत् प्रेम तत् स्फुटितं न मिलति। किमिव। मुक्ताफलमिव। यथा मुक्ताफलं स्फुटितं न मिलति ॥ ३४९*४ ॥

349*5) [ दृढस्नेहनालप्रसृतसद्भावदलस्य रतिसुगन्धस्य। प्रेमोत्पलस्य मुग्धे मानतुषार एव विनाशः ॥ ] हे मुग्धे प्रेमोत्पलस्य स्नेहकमलस्य मानतुषार एव विनाशः। किंविशिष्टस्य प्रेमोत्पलस्य। दृढस्नेहनालप्रसृतस्य। पुनः कथंभूतस्य। सद्भावदलस्य सत्स्नेहपत्रस्य। पुनरपि किंप्रकारस्य। रतिसुगन्धस्य सन्तोषपरिमलस्य ॥ ३४९*५ ॥

349*6) [ अहो जानाम्यहं प्रेम च भवति लोकमध्ये। स्थिराशाया रचितं न पीडितं केवलं दैवेन ॥ ] हे मित्र, एतदहं जानामि लोकमध्ये प्रेम स्थिराशारचितं भवति। न पीडितं दैवेन ॥ ३४९*६ ॥

1 Gāthā No. 359. 2 Sense of the Gāthā and commentary obscure.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



349*7) जा न चलइ ता अमयं चलियं पेम्मं विसं विसेसेइ ।
दिट्ठं सुयं व कत्थ वि मयच्छि विसगब्भिणं अमयं ॥ ७ ॥

349*8) भग्गं न जाइ घडिउं दुज्जणहिययं कुलालभंडं व ।
सयखंडं पि घडिज्जइ कंचणकलसो सुयणचित्तं ॥ ८ ॥

349*9) भग्गं पुणो घडिज्जइ कणयं कंकणयणेउरं नयरं ।
पुण भग्गं न घडिज्जइ पेम्मं मुत्ताहलं जच्चं ॥ ९ ॥

349*10) सो को वि न दीसइ सामलंगि जो घडइ विघडियं पेम्मं ।
घडकप्परं च भग्गं न एइ तेहि चिय सलेहिं ॥ ० ॥[1]

---

349*7) [ यावन्न चलति तावदमृतं चलितं प्रेम विषं विशेषयति । दृष्टं श्रुतं वा कुत्रापि मृगाक्षि विषगर्भितम् अमृतम् ॥ ] हे मृगाक्षि क्वापि विषगर्भितम अमृतं दृष्टं चान्यत् श्रुतम्। कथम् । यावत्कालं प्रेम न चलति ( तावत्कालं तदमृतम् ) । चलितं प्रेम विषं विशेषयति ॥ ३४९*७ ॥

349*8) [ भग्नं न याति घटितुं दुर्जनहृदयं कुलालभाण्डमिव । शतखण्डमपि घट्यते काञ्चनकलशः सुजनचित्तम् ॥ ] दुर्जनहृदयं भग्नं सत् घटितुं न याति । किमिव । कुलालभाण्डमिव । यथा कुलालभाण्डं भग्नं सत् घटितुं न याति । सुजनचित्तं शतखण्डमपि घट्यते । किमिव । काञ्चनकलश इव ॥ ३४९*८ ॥

349*9) [ भग्नं पुनर्घट्यते कनकं कङ्कणनूपुरं नगरम् । पुनर्भग्नं न घट्यते प्रेम मुक्ताफलं जात्यम् ॥ ] कनकं कङ्कणं च नूपुरं नगरं भग्नं सत् पुनर्घट्यते । ॥ ३४९*९ ॥

349*10) [ स कोऽपि न दृश्यते श्यामलाङ्गि यो घटयति विघटितं प्रेम । घटकर्परं च भग्नं नैति तैरेव....( ? ) ॥ ] हे श्यामलाङ्गि हे श्यामे, यो विघटितं प्रेम घटयति स कोऽपि न दृश्यते । कथम् । घटकर्परं च भग्नं सत् तैरेव शकैः (?) संधैः (?) न एति नागच्छति ॥ ३४९*१० ॥

---

1 Sense of the last quarter and commentary thereon obscure.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माणवज्जा ।

364*1) दंते तिणाइ कंठे कुवारयं सुंदरं च तुह एयं ।
माणमडप्फरणडिए तुह माणो केण निद्दिट्ठो ॥ १ ॥

364*2) एमेव कह वि माणंसिणीइ तह महमहाविओ माणो ।
जह खेमकुसलसंभासमेत्त सो पिओ जाओ ॥ २ ॥

पवसियवज्जा ।

373*1) वासारत्ते पवासियाण विरहग्गितावतवियाणं ।
अंगेसु लग्गमाणो पढमासारो छमच्छमइ ॥ १ ॥

विरहवज्जा ।

389*1) जेहिं सोहग्गणिही दिट्ठो नयणेहि ते च्चिय रुयंतु ।
अंगाइ अपाविथसंगमाइं ता कीस खिज्जंति ॥ १ ॥[1]

---

364*1) [ दन्ते तृणानि कण्ठे कुवारकं ( ? ) सुन्दरं च तवैतत् । मानाडम्बरखण्डिते तव मानः केन निर्दिष्टः ॥ ] मानमडप्फरनटिते तव मानः केन निर्दिष्टः । दन्तेषु तृणानि, कण्ठे कुवारकं ( ? ) तवैतद् सुन्दरं नान्यत् ॥ ३६४*१ ॥

364*2) [ एवमेव कथमपि मनस्विन्या तथा प्रसारितो मानः । यथा क्षेमकुशलसंभाषमात्रः स प्रियो जातः ॥ ] मनस्विन्या कथमपि तथा मानो महमहाविओ उल्लासितो, यथा क्षेमकुशलसंभाषमात्रः स प्रियो जातः ॥ ३६४*२ ॥

373*1) [ वर्षारात्रे प्रवासिनां विरहाग्नितापतप्तानाम् । अङ्गेषु लगन् प्रथमासारश्छमच्छमायते ॥ ] प्रवासिनां पथिकानामङ्गेषु प्रथमासारः प्रथमवर्षा छमच्छमइ प्रज्वालयति । किंलक्षण आसारः । शरीरे लगमानः । किंविशिष्टानां प्रवासिनाम् । विरहाग्नितप्तानाम् ॥ ३७३*१ ॥

389*1) [ याभ्यां सौभाग्यनिधिर्दृष्टो नयनाभ्यां ते एव रुदताम् । अङ्गान्यप्राप्तसङ्गमानि तत् कस्मात् खिद्यन्ति ॥ ] काचित् नायिका कंचित् पतिं प्रति ब्रूते । हे वल्लभ यैर्नयनैस्त्वं दृष्टस्त एव रुदन्तु । किंविशिष्टस्त्वम् । सौभाग्यनिधिः । ता ततः अप्राप्तसङ्गमानि अङ्गानि कीस कस्मात् खिद्यन्ते ॥ ३८९*१ ॥

---

1 Cf. Gatha No. 389. The text of the commentary is different from that on Gāthā No. 389.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



389*2) तुह सुरयपवरतरुपल्लवग्गकवलाण लद्धमाहप्पो ।
मह मणकरहो मुद्धे दक्खाकवलं पि परिहरइ ॥ २ ॥

389*3) विरहग्गिजलणजालाकरालियं कुवलयच्छि मह अंगं ।
तुह रमणमहाणइपाणिएण मुद्धे पविज्झाहि ॥ ३ ॥

389*4) रेहइ पियपडिरुंभण[1]पसारियं सुरयमंदिरद्दारे ।
हेलाहल्लावियथोरथणहरं भुयलयाजुयलं ॥ ४ ॥

389*5) ता जाइ ता नियत्तइ ठाणं गंतूण झत्ति वाहुडइ ।
पियविरहो घोडा विग्गहो व्व हियए न संठाइ ॥ ५ ॥

389*2) [ तव सुरतप्रवरतरुपल्लवाग्रकवलानां लब्धमाहात्म्यः । मम मनःकरभो मुग्धे द्राक्षाकवलमपि परिहरति ॥ ] हे मुग्धे मम मनःकरभो द्राक्षाकवलमपि परिहरति । किंलक्षणो मनःकरभः । तव सुरतप्रवरतरुपल्लवाग्रकवलानां लब्धमाहात्म्यो लब्धास्वादः । अतः कारणात् ॥ ३८९*२ ॥

389*3) [ विरहाग्निज्वलनज्वालाकरालितं कुवलयाक्षि ममाङ्गम् । तव रमणमहानदीपानीयेन मुग्धे विध्यापय ॥ ] हे कुवलयाक्षि कुवलयनेत्रे, ममाङ्गं विरहाग्निज्वलनज्वालाकरालितं वर्तते । ततस्तव रमणनदीपानीयेन हे मुग्धे प्रविध्याहि उपशमय प्रविध्यापय ॥ ३८९*३ ॥

389*4) [ राजते प्रियप्रतिरोधनप्रसारितं सुरतमन्दिरद्वारे । हेलाचालितस्थूलस्तनभरं भुजलतायुगलम् ॥ ] हे सुन्दरि तव भुजलतायुगलं राजते किंविशिष्टं भुजलतायुगलम् । हेलाहल्लावियथोरथणहरं । हेलया हल्लापितः स्पृष्टः स्थूलस्तनभरो येन । पुनः किंविशिष्टम् । सुरतमन्दिरद्वारे प्रियप्रतिरुन्धनप्रसारितम् ॥ ३८९*४ ॥

389*5) [ तावद्याति तावन्निवर्तते स्थानं गत्वा झटिति व्याघुटति । प्रियविरहोऽश्वो विग्रह इव हृदये न संतिष्ठति ॥ ] प्रियविरहो हृदये न संतिष्ठति । प्रियस्य विरहः प्रियविरहः । अथ. प्रियाया विरहः प्रियाविरहः । हृदये न संतिष्ठति । कथं । घोडा विग्रह इव । अश्वो विग्रह इव । यथा अश्वो विग्रहः स्थाने न संतिष्ठति । तावद्याति तावन्निवर्तयति । स्थानं

1 Better to read परिरंभण ( = आलिङ्गन ) instead of पडिरुंभण.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



389*6) न जलंति न धगधगंति न सिमसिमंति न मुयंति धूमवत्तीओ।
अंगाइ अणंगपरव्वसाइ एमेव डज्झंति ॥ ६ ॥

389*7) वड्ढसि विरहे हस्ससि समागमे हा निसे निसंसा सि।
भद्दे तुमं पि महिला तह वि हु दुक्खं न याणासि ॥ ७ ॥

अणंगवज्जा।

397*1) ता किं करेमि माए निज्जियरूवस्स कामदेवस्स।
दड्ढं पि डहइ अंगं निद्धूमो संखचुण्णु व्व ॥ १ ॥

---

गत्वा झटिति शीघ्रं व्याघुटति। एतावता यथा अश्वो विग्रहस्तथा प्रियविरहः ॥ ३८९*५ ॥

389*6) [ न ज्वलन्ति, न धगधगन्ति न शमशमन्ति न मुञ्चन्ति धूमवर्तीः। अङ्गानि अनङ्गपरवशानि एवमेव दह्यन्ते ॥ ] अनङ्गपरवशानि अङ्गानि एवमेव दह्यन्ते, अमुना प्रकारेण ज्वलन्ति। एवमेव कथम्। न जलंति न प्रज्वलन्ति, न धगधगन्ति, न शमशमन्ति। धूमवृत्तीः (? धूमवर्तीः) न मुञ्चन्ति ॥ ३८९*६ ॥

389*7) [ वर्धसे विरहे हससि समागमे हा निशे नृशंसासि। भद्रे त्वमपि महिला तथापि खलु दुःखं न जानासि ॥ ] हे भद्रे, अपि पुनस्त्वं महिला। विरहे वर्धसे। समागमे हससि। हा इति विषादे। निशे रात्रि। नृशंसा निस्त्रिंशा निर्दया असि। या निःश्वासान् मुञ्चसि (?)। हु निश्चितम्। तथापि दुःखं न जानासि ॥ ३८९*७ ॥

397*1) [ तत्किं करोमि मातर्निर्जितरूपस्य कामदेवस्य। दग्धमपि दहत्यङ्गं निर्धूमः शंखचूर्ण इव ॥ ] हे मातः किं करोमि कामदेवस्य। अङ्गं दग्धमपि दहति। किंविशिष्टस्य कामदेवस्य। निर्जितरूपस्य, अनङ्गस्य, दग्धदेहस्य। क इव। शंखचूर्ण इव। यथा शंखचूर्णो दहति। किंविशिष्टः शंखचूर्णः। निर्धूमः ॥ ३९७*१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



397*2) हारेण मामि कुसुमच्छडायलुप्पन्नसिहिणा दड्ढो।
वम्मीसणो न मन्नइ उल्हविओ तेण मं डहइ ॥ २ ॥

पियाणुरायवज्जा।

412*1) जे के वि रसा दिट्ठीउ जाउ जे भरहभाविया भावा।
ते नच्चिवज्जंति अणच्चिया वि सहसा पिए दिट्ठे ॥ १ ॥

412*2) सो कत्थ गओ सो सुयणवल्लहो सो सुहासियसमुद्दो।
सो मयणग्गिविणासो जो सो सोसेइ मह हिययं[1] ॥ २ ॥

412*3) सो मासो तं पि दिणं सा राई सव्वलक्खणसउण्णा।
अमयं व तं मुहुत्तं जत्थ पिओ झत्ति दीसिहिइ[2] ॥ ३ ॥

397*2) [ हारेण सखि कुसुमच्छटातलोत्पन्नवह्निना दग्धः। वर्मेषणो न मन्यते विध्यापितः तेन मां दहति ॥ ] हे मामि हे सखि, वर्मेषणः सुभटः, अर्थात् कामः। तेन कारणेन उल्हविओ विध्यापितः उपशमितः मां दहति। किंविशिष्टो वर्मेषणः कामः। हारेण कुसुमच्छटातलोत्पन्नाग्निना दग्धः। यः शीतवीर्येण समुदायेन दग्धो भवति स शीतत्वे न उपशमनं प्राप्नोति[3] ॥ ३९७*२ ॥

412*1) [ ये केऽपि रसा दृष्टयो या ये भरतभाविता भावाः। ते ते नर्त्यन्ते अनृत्ता अपि सहसा प्रिये दृष्टे ॥ ] ये केचन रसाः शृंगारादयो याश्च दृष्टयः स्नेहरागा ये भरतभाविता भावाः, ते अनर्तिताः ( ? अनृत्ताः ) अपि नर्त्यन्ते। क्व। सहसा प्रिये दृष्टे ॥ ४१२*१ ॥

412*2) [ स कुत्र गतः स सुजनवल्लभः स सुभाषितसमुद्रः। स मदनाग्निविनाशो यः स शोषयति मम हृदयम् ॥ ] स सुजनवल्लभः क्व गतः। किंविशिष्टः। सुभाषितसमुद्रः। मम मदनाग्निविनाशकः। यः स मम हृदयं शोषयति ॥ ४१२*२ ॥

412*3) [ स मासस्तदपि दिनं सा रात्रिः सर्वलक्षणसंपूर्णा। अमृतमिव स मुहूर्तो यत्र प्रियो झटिति दृश्यते ॥ ] स मासः तदपि दिनं सा रात्रिः सर्वलक्षणसंपूर्णा, तन्मुहूर्तममृतमिव यत्र प्रियो झटिति दृश्यते ॥ ४१२*३ ॥

1 Cf. Gāthā No. 782. 2 Cf. Gāthā No. 785. 3 The sense of the Gāthā and that of the commentary are obscure.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



412*4) हिययट्ठिओ वि पिओ तह वि हु नयणाण होइ दुप्पेच्छो।
पेच्छह विहिणा न कया मह उयरे जालयगवक्खा ॥४॥[1]

412*5) होही तं किं पि दिणं जत्थ पिओ बाहुपंजरणिबद्धो।
वित्ते सुरयपसंगे पुच्छिहिइ पवासदुक्खाइं[2] ॥ ५ ॥

412*6) दिन्नं गेण्हइ, अप्पेइ पत्थियं, असइ, भोयणं देइ।
अक्खइ गुज्झं पुच्छेइ पडिवयं जाण तं रत्तं ॥ ६ ॥

दूईवज्जा।

421*1) अहवा तुज्झ न दोसो तस्स उ रूवस्स हियकिलेसस्स।
अज्जावि न प्पसीयइ ईसायंति व्व गिरितणया[3] ॥ १ ॥

412*4) [ हृदयस्थितोऽपि प्रियस्तथापि खलु नयनयोर्भवति दुष्प्रेक्षः। प्रेक्षध्वं विधिना न कृता ममोदरे जालकगवाक्षाः ॥ ] काचिद् विरहिणी वक्ति। प्रियो हृदयस्थितोऽपि हु निश्चितं तथापि नयनयोर्दुष्प्रेक्षो भवति। अहो प्रेक्षध्वं ( प्रेक्षध्वं ) विधिना ममोदरे जालकगवाक्षा न कृता यथा सुखेन तं पश्यामि ॥ ४१२*४ ॥

412*5) [ भविष्यति तत् किमपि दिनं यत्र प्रियो बाहुपञ्जरनिबद्धः। वृत्ते सुरतप्रसङ्गे प्रक्ष्यति प्रवासदुःखानि ॥ ] सोऽपि कोऽपि दिनो भविष्यति यत्र प्रियो बाहुपञ्जरनिबद्धः सन् सुरतप्रसङ्गे ( वृत्ते ) अतीते प्रवासदुःखानि ( प्रक्ष्यति ) पृच्छां करिष्यति ॥ ४१२*५ ॥

412*6) [ दत्तं गृह्णाति, अर्पयति प्रार्थितम्, अश्नाति, भोजनं ददाति। आख्याति गुह्यं पृच्छति प्रतिपदं जानीहि तं रक्तम् ॥ ] हे मित्र, तं रक्तं जानीहि। कम्। यो दत्तं गृह्णाति। प्रार्थितम् अर्पयति। मित्रगृहे अश्नाति च भोजनं ददाति। गुह्यमाख्याति, प्रतिव्रतं ( ? प्रतिपदं ) पृच्छति ॥ ४१२*६ ॥

421*1) [ अथवा तव न दोषस्तस्य तु रूपस्य हितक्लेशस्य। अद्यापि न प्रसीदति ईर्ष्यायमाणेव गिरितनया ॥ ] दूती ईश्वरं प्रति वक्ति। अथवा दोषो न तव, हितक्लेशस्य रूपस्य दोषः। हितः क्लेशो यस्य असौ

1 Cf. Gāthā No. 787. We must read हिययट्ठिउ जइ वि पिओ *metri causa*. 2 Cf. Gāthā 783. 3 The sense of the Gāthā and commentary is obscure.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



421*2) कस्स कहिज्जंति फुडं दूइविणट्ठाइ सहि कज्जाइं ।
अहवा लोयपसिद्धं न फलंति समक्कडारामा ॥ २ ॥

ओलुग्गाविया वज्जा ।

438*1) सा दियहं च्चिय पेच्छइ नयणा पडियाइ दप्पणतलम्मि ।
एएहि तुमं दिट्ठो सि सुहय दोहिं पि अच्छीहिं ॥ १ ॥

438*2) दुक्खेहि वि तुह विरहे बालय दुक्खं ठियं, अह चाए ।
अंसुजलेहि रुण्णं नीसासेहिं पि नीससियं ॥ २ ॥

438*3) बालय नाहं दूई तीइ पिओ सि त्ति नम्ह वावारो ।
सा मरइ तुज्झ अयसो त्ति तेण धम्मक्खरं भणिमो[1]॥३॥

हितक्लेशः, तस्य हितक्लेशस्य । तु पुनः । गिरितनया पार्वती ईर्ष्यां कुर्वती, अद्यापि न प्रसीदति न प्रसन्ना भवति ॥ ४२१*१ ॥

421*2) [ कस्य कथ्यन्ते स्फुटं दूतीविनष्टानि सखि कार्याणि । अथवा लोकप्रसिद्धं न फलन्ति समर्कटारामाः ॥ ] हे मामि सखि स्फुटं प्रकटं दूतीविनष्टानि कार्याणि कस्य कथ्यन्ते । अथवा, एतल्लोकप्रसिद्धं वर्तते यत् समर्कटारामाः मर्कटसहिता आरामाः कथं फलन्ति ॥४२१*२॥

438*1) [ सा दिवसमपि प्रेक्षते नयने पतिते दर्पणतले । एताभ्यां त्वं दृष्टोऽसि सुभग द्वाभ्यामप्यक्षिभ्याम् ॥ ] सा काचिन्नायिका दर्पणतले पतितानि ( ? पतिते ) नयनानि ( ? नयने ) दिवसमपि प्रेक्षते । अन्यच्च भणति । हे सुभग, आभ्यां द्वाभ्याम् आक्षिभ्यां त्वं दृष्टोऽसि । एतावता क्व व्रजिष्यसीति रहस्यम् ॥ ४३८*१ ॥

438*2) [ दुःखैरपि तव विरहे बालक दुःखं स्थितम्, अथ त्यागे । अश्रुजलैरपि रुदितं निःश्वासैरपि ( च ) निःश्वसितम् ॥ ] हे बालक तव विरहे दुःखैरपि दुःखं स्थितम् । अथ त्यागेऽप्यश्रुजलै रुदितम् । निःश्वासैरपि निःश्वसितम् । का कथा परेषाम् ॥ ४३८*२ ॥

438*3) [ बालक नाहं दूती तस्याः प्रियोऽसीति नास्माकं व्यापारः । सा म्रियते तव अयश इति तेन धर्माक्षरं भणामः ॥ ] हे

1 Cf. Gāthā No. 438.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



438*4) सा सुहय सामलंगी जा सा नीसाससोसियसरीरा।
आसासिज्जइ[1] सहसा जाव न सासा समप्पंति[2] ॥ ४ ॥

438*5) परपुरपवेसविन्नाणलाहवं सुहय सिक्खियं कत्थ।
जेण पविट्ठो हियए पढम च्चिय दंसणे मज्झ ॥ ५ ॥

पंथियवज्जा।

445*1) उद्धच्छो पियइ जलं जह जह विरलंगुली चिरं पहिओ।
पावालिया वि तह तह धारं तणुयं पि तणुएइ ॥ १ ॥[3]

. . . . . . .

चालक, अहं दूती न। तस्याः प्रियोऽसीति नास्माकं कोऽपि व्यापारः। सा म्रियते तव विरहे, इति तव अयशः। तेन कारणेन धर्माक्षरं भणामः ॥ ४३८*३ ॥

438*4) [ सा सुभग श्यामलाङ्गी या सा निःश्वासशोषितशरीरा। आश्वास्यते सहसा यावन्न श्वासाः समाप्यन्ते ॥ ] हे सुभग सा श्यामलाङ्गी वर्तते सर्वदा मुग्धा। या सा निःश्वासशोषितशरीरा। सा सहसा आश्वास्यते, यावत् श्वासा न समाप्यन्ते ॥ ४३८*४ ॥

438*5) [ परपुरप्रवेशविज्ञानलाघवं सुभग शिक्षितं कुत्र। येन प्रविष्टो हृदये प्रथम एव दर्शने मम ॥ ] हे सुभग परपुरप्रवेशविज्ञानलाघवं क्व शिक्षितम्। येन कारणेन प्रथमदर्शन एव मम हृदये प्रविष्टोऽसि। अतः कारणात् तव परकायप्रवेशिनी विद्या गुर्वी(? अपूर्वी ?) ॥४३८*५॥

445*1) [ ऊर्ध्वाक्षः पिबति जलं यथा यथा विरलाङ्गुलिः चिरं पथिकः। प्रपापालिकापि तथा तथा धारां तनुकामपि तनूकरोति ॥ ] पथिको यथा यथा ऊर्ध्वाक्षो जलं पिबति। किंविशिष्टः पथिकः। विरलंगुली विरला अङ्गुलयो यस्य। कथं यथा भवति। चिरं यथा भवति। पावालिया वि प्रबोलितापि (?) तथा तथा वारिधारां तनुकामपि तनुजलम् एति (? तनुजलां करोति) ॥ ४४५*१ ॥

1 Better to read आसासिज्जउ (आश्वास्यताम्). 2 Cf. Gāthā No. 402
3. Cf. Hāla 161, and Kuvalayānada, ऊर्ध्वाक्षः पिबत्यम्बु etc.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



445*2) अहिणवगज्जियसद्दं मोराण य कलयलं निसामंतो।
मा पवस धिट्ठ पंथिय, मरिहिसि, किं ते पउत्थेण ॥ २ ॥

445*3) वासारत्ते वाउद्धुएण वासं विमग्गमाणेण।
पहिएण पहियघरिणी रुयाविया थरहरंतेण ॥ ३ ॥

445*4) सिहिरडियं घणरडियं दूरं पि घरं घणत्थणं रमणिं।
संभरिऊण सएसं पहिएण घणग्घणं रुण्णं ॥ ४ ॥

445*5) तइ वोलंते बालय तिस्सा वलियाइ तह नु अंगाइं।
जह पट्ठिमज्झणिवडंतबाहधारा व दीसंति ॥ ५ ॥

445*2) [ अभिनवगर्जितशब्दं मयूराणां च कलकलं निशाम्यन्। मा प्रवस धृष्ट पथिक, मरिष्यसि, किं ते प्रवासेन ॥ ] हे धृष्ट पथिक मा प्रवस, प्रवासं मा कुरु। मरिष्यसि। किं ते पउत्थेण तव प्रवासेन किम्। किंविशिष्टस्त्वम्। अभिनवगर्जितशब्दं शृण्वानः। चान्यत मयूराणां केकारवं शृण्वानः ॥ ४४५*२ ॥

445*3) [ वर्षारात्रे वातोद्धूतेन वासं विमार्गयता। पथिकेन पथिकगृहिणी रोदिता कम्पमानेन ॥ ] पथिकेन पथिकगृहिणी रोदिता। किंविशिष्टेन पथिकेन। थरहरंतेण कम्पायमानेन। पुनः किंविशिष्टेन पथिकेन। वासं वसतिं विमार्गमाणेन। पुनरपि किंविशिष्टेन पथिकेन। वातोद्धूतेन पवनान्दोलितेन ॥ ४४५*३ ॥

445*4) [ शिखिरटितं घनरटितं दूरमपि गृहं घनस्तनीं रमणीम्। संस्मृत्य स्वदेशं पथिकेन घनं घनं रुदितम् ॥] पथिकेन घनं घनं रुदितम्। किं कृत्वा स्वदेशं स्मृत्वा। पुनः किं कृत्वा। मयूरकेकारवं श्रुत्वा। पुनः किं कृत्वा। घनरटितं श्रुत्वा। पुनरपि किं कृत्वा। गृहं दूरमपि स्मृत्वा। पुनरपि किं कृत्वा। रमणीं स्मृत्वा। किंविशिष्टां रमणीम्। घनस्तनीं नवपीनस्तनाम् ॥ ४४५*४ ॥

445*5) [ त्वयि अपक्रामति बालक तस्या वलितानि तथा नु अङ्गानि। यथा पृष्ठमध्यनिपतद्बाष्पधारा इव दृश्यन्ते ॥ ] हे बालक अज्ञ, त्वयि वलमाने तथा अङ्गानि तस्या वलितानि यथा पृष्ठिमध्ये निपतन्त्यो बाष्पधारा अग्निज्वालाः ( ? ) दृश्यन्ते ॥ ४४५*५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चवज्जा ।

449*1) इय तरुणितरुणसंभरणकारणं तुरगतरणरणुच्छलियं ।
रइयं इय वरकुलयं पाइयसीलेण लीलेण ॥ १ ॥

हिययसंवरणवज्जा ।

454*1) हे हियय अव्ववट्ठिय अगणिज्जंतो वि तं जणं महसि ।
कंदु व्व सिलावडियं अलद्धपसरं नियत्तिहिसि ॥ १ ॥

454*2) सातम्मि हियय दुलहम्मि मणुसे अलियसंगमासाए ।
हरिण व्व मूढ मयतण्हियाइ दूरं हरिज्जिहिसि ॥ २ ॥

. . . . . . . .

449*1) [ इति तरुणीतरुणसंस्मरणकारणं तुरगतरणरणोच्छलितम् ।
रचितमिति वरकुलकं प्राकृतशीलेन लीलेन ।। ] इति अमुना प्रकारेण लीलेन लीलायुक्तेन वरकुलकं रचितम् । किंविशिष्टेन लीलेन । पाइयसीलेण प्राकृतनिष्ठेन । किंविशिष्टं वरकुलकम् । इति पूर्वोक्तप्रकारेण तरुणीतरुणसंभरणकारणं तरुण्या युवत्या (तरुणस्य) यत् संस्मरणं तस्य कारणम् । किंविशिष्टं वरकुलकम् । तुरगतरणरणोच्छलियं तुरगस्य तरणं रंगणं रणस्य शब्दस्य तद्वद् उच्छलितम् ।। ४४९*१ ।।

445*1) [ हे हृदय अव्यवस्थित अगण्यमानमपि तं जनं काङ्क्षसि ।
कन्दुक इव शिलापतितो अलब्धप्रसरं निवर्तिष्यसे ।। ] हे हृदय अव्यवस्थित अगण्यमानमपि तं जनं महसि । तत् त्वम् अलब्धप्रसरं सत् निवर्तिष्यसे । क इव । कन्दुकमिव । यथा कन्दुकं शिलापतितं सत् निवर्तते तथा त्वं निवर्तिष्यसे ।। ४५४*१ ।।

454*2) [ साते हृदय दुर्लभे मनुष्ये अलीकसङ्गमाशया । हरिण इव मूढ मृगतृष्णिकया दूरं हरिष्यसे ।। ] रे हृदय दुर्लभे मनुष्यभवे साते सौख्ये दूरं हरिष्यसे । किंविशिष्टे मनुष्ये । अलीकसङ्गमाशे । अलीकश्चासौ सङ्गमश्च अलीकसङ्गमः । अलीकसङ्गमे आशा यस्य सो अलीकसङ्गमाशः । तस्मिन् रे मूढ त्वं हरिण इव मृगतृष्णया दूरं हरिष्यसे ।। ४५४*२ ।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



454*3) नयणाइ नयंति नयंतु, हियय को एत्थ तुज्झ वावारो।
होहिंति इमाइ तडे तुह पडिहिइ वम्महचवडक्का ॥ ३ ॥

454*4) नयणाइ फुसउ मा रुयसु अणुदिणं, मुयसु तस्स अणुबंधं।
गाइज्जइ किं मरिऊण पंचमं मुद्ध हरिणच्छि ॥ ४ ॥

454*5) इंदीवरच्छि सयवारवारिया कीस तं जणं महसि।
जइ कणयमयच्छुरिया ता किं घाइज्जए अप्पा ॥ ५ ॥

## सुघरिणीवज्जा।

462*1) परघरगमणालसिणी परपुरिसविलोयणे य जच्चंधा।
परआलावे बहिरा घरस्स लच्छी, न सा घरिणी ॥ १ ॥

---

434*3) [ नयने नयतो नयतां हृदय कोऽत्र तव व्यापारः। भविष्यत इमे तटे तव पतिष्यति मन्मथचपेटा ॥ ] हे हृदय नयनानि नयन्ति तदा नयन्तु। अत्र तव को व्यापारः। इमानि नेत्राणि तटे चटिष्यन्ति। वम्महचवडक्का मन्मथचपेटा तव पतिष्यति ॥ ४५४*३ ॥

454*4) [ नयने प्रोञ्छ मा रोदिहि अनुदिनं, मुञ्च तस्यानुबन्धम्। गीयते किं मृत्वा पञ्चमो मुग्धे हरिणाक्षि ॥ ] हे सुन्दरि नयने परिमार्जय। अनुदिनं मा रोदिहि। तस्य वल्लभस्य अनुबन्धं मुञ्च। हे मुग्धे हरिणाक्षि, मृत्वा पञ्चमं किं गीयते, अपि तु न ॥ ४५४*४ ॥

454*5) [ इन्दीवराक्षि शतवारवारिता कस्मात् तं जनं काङ्क्षसि। यदि कनकमयच्छुरिका तत् किं घात्यत आत्मा ॥ ] इन्दीवराक्षि मया त्वं शतवारान् वारिता। तं दुर्जनं जनं कस्मात् महसि। यदि चेत् कनकमयी छुरिका भवति, तदा किम् आत्मा घात्यते। अपि तु न ॥ ४५४*५ ॥

462*1) [ परगृहगमनालस्यवती परपुरुषविलोकने च जात्यन्धा। परालापे बधिरा गृहस्य लक्ष्मीर्न सा गृहिणी ॥ ] परगृहगमन आलस्यवती, न तु धर्मे। परपुरुषविलोकने च जात्यन्धा, न तु गुरुदर्शने। परेषां सविकारालापश्रवणे बधिरा, न तु गुरुकाणां गुणगणश्रवणे। एवंविधा या भवति सा गृहस्य लक्ष्मीः, न तु गृहिणी ॥ ४६२*१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



462•2) अज्जेव पियपवासो, असई दूरे, विडंबए मयणो।
चरणुग्गओ वि अग्गी कया वि सीसं समारुहइ ॥ २ ॥

## सईवज्जा ।

471•1) भद्दं कुलंगणाणं जासिं मणकमलकोसमणुपत्तो।
मयणभमरो वराओ वच्चइ निहणं तहिं चेव ॥ १ ॥

472•2) सकुलकलंकं नियकंतवंचणं अजसपडहणिग्घोसो।
सरिसवमेत्ते च सुहे को दूइ विडंबए अप्पं ॥ २ ॥

---

462*2) [ अद्यैव प्रियप्रवासो, असती दूरे, विडम्बयति मदनः। चरणोद्गतोऽप्यग्निः कदापि शीर्षं समारोहति ॥ ] प्रियोऽद्यैव प्रवासं गतः। असती दूरे। मदनो विडम्बयति। चरणोद्गतोऽप्यग्निः कदापि शीर्षं समारोहति ॥ ४६२*२ ॥

471*1) [ भद्रं कुलाङ्गनानां यासां मनःकमलकोशमनुप्राप्तः। मदन-भ्रमरो वराको व्रजति निधनं तत्रैव ॥ ] कुलाङ्गनानां भद्रं भवतु। यासां कुलाङ्गनानां मनःकमलकोशमनुप्राप्तः सन् मदनभ्रमरो वराकः, तत्रैव निधनं याति ॥ ४७१*१ ॥

471•2) [स्वकुलकलङ्को निजकान्तवञ्चनम् अयशःपटहनिर्घोषः। सर्ष-पमात्रे च सुखे को दूति विडम्बयत्यात्मानम् ॥ ] सुगमेयं गाथा॥४७१*२॥

496*1) [ येन समं संबन्धो गृह्णाति नाम पुनः पुनस्तस्य। पृच्छति मित्रवर्गं भण्यते एवंविधा रक्ता ॥ ] येन समं संबन्धो भवति, स्नेहः स्यात्, तस्य प्राणिनः पुनः पुनर्नाम गृह्णाति। मित्रवर्गं स्वजनवर्गं पुनः पुनः पृच्छति। रक्ता मनुष्याः स्नेहिनो मनुष्या एवंविधा भण्यन्ते। 'बहुवयणे होइ एगवयणं उ'। अतः कारणात्, बहुवचने 'भण्णइ' इति प्राकृतव्याकरणे ॥ ४९६*१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## असईवज्जा ।

496*1) जेण समं संबंधो गिण्हइ नामं पुणो पुणो तस्स ।
पुच्छेइ मित्तवग्गं भण्णइ एवंविहा रत्ता ॥ १ ॥

496*2) असई असमत्तरया सयडं दट्ठूण गाममज्झम्मि ।
धन्ना हु चक्कणाही निच्चं अक्खो हिओ जिस्सा ॥ २ ॥

496*3) डिंभत्तणम्मि डिंभेहि रामिया जोव्वणे जुवाणेहिं ।
थेरी वि गयवएहिं मया वि असई पिसाएहिं ॥ ३ ॥

496*4) भयवं हुयास एक्कम्ह दुक्कयं खमसु जं पई रमिओ ।
निहणइ पावं जाराणुमरणकयणिच्छया असई ॥ ४ ॥

---

496*2) [ असती असमाप्तरता शकटं दृष्ट्वा ग्राममध्ये । धन्या खलु चक्रनाभिर्नित्यम् अक्षो हितो यस्याः ।। ] असती असमाप्तरता सती ग्राममध्ये शकटं दृष्ट्वा इति चिन्तयति । हु निश्चितम् इयं चक्रनाभिर्धन्या यस्या नित्यं निरन्तरं धुरी (?) अक्षोभिता वर्तते (?) ॥ ४९६*२ ॥

496*3) [ डिम्भत्वे डिम्भै रमिता यौवने युवभिः । स्थविरापि गत-वयोभिर्मृताप्यसती पिशाचैः ॥ ] असती डिम्भत्वे बालचेष्टायां डिम्भैर्बालकै रामिता । यौवने युवभिः पुरुषै रामिता । स्थविरापि वृद्धापि गतवयोभिः पुरुषै रामिता । असती मृता सती पिशाचै रामिता ॥ ४९६*३ ॥

496*4) [ भगवन् हुताश एकमस्माकं दुष्कृतं क्षमस्व यत् पती रमितः । निहन्ति पापं जारानुमरणकृतनिश्चया असती ।।] हे भगवन् हुताश, हे वैश्वानर, एकमस्माकं दुष्कृतं क्षमस्व । यन् मया निजः पतिः रमितः रतः । एकैवाशा गुर्वी वर्तते । यत्तु (?) असती जारानुमरणकृतनिश्चया सती पापं निहन्ति ।। ४९६*४ ।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



496*5) संकेयकुडंगोड्डीणसउणकोलाहलं सुणंतीए ।
घरकम्मवावडाए वहूइ खिज्जंति अंगाइं[1] ॥ ५ ॥

496*6) जारट्ठविणिम्मियमेहलावलिं जा न बंधइ नियंबे ।
ताव च्चिय नवकामालिणीइ रमणं व पज्झरियं ॥ ६ ॥

496*7) जारमसाणसमुब्भवभूईसुहफंससिज्जिरंगीए ।
न समप्पइ नवकामालिणीइ उद्धूलणारंभो ॥ ७ ॥

496*8) बहले तमंधयारे रमियपमुक्काण सासुसुण्हाणं ।
समयं चिय अब्भिडिया दोण्हं पि सरहे हत्था ॥ ८ ॥

486*5) [ सङ्केतकुञ्जोड्डीनशकुनकोलाहलं शृण्वत्याः । गृहकर्म-व्यापृताया वध्वाः खिद्यन्ति अङ्गानि ॥ ] असत्या बहुभिः प्रकारैरङ्गानि जीर्यन्ते त्रुट्यन्तीत्यर्थः । किंविशिष्टाया असत्याः । गृहकर्मव्यापृतायाः । गृहस्य कर्म गृहकर्म । गृहकर्मणि व्यापृता, तस्याः । पुनः किं कुर्वत्याः । संकेतकुडंगोड्डीनशकुनकोलाहलं शृण्वत्याः । संकेतस्य कुडंगः संकेतकुडंगः । संकेतकुडंगादुड्डीना ये शकुनाः, तेषां कोलाहलं शृण्वती, तस्याः॥ ४९६*५ ॥

496*6) [ जारार्थविनिर्मितमेखलावलीं यावन्न बध्नाति नितम्बे । तावदेव नवकामातुराया रमणमिव प्रक्षरितम् ॥ ] नवकामातुराया नायिका-यास्तावदेव तस्मिन् काल एव रमणं प्रक्षरितम् । स्खलनं जातमित्यर्थः । यावन्नितम्बे कटीप्रदेशे जारार्थनिर्मितमेखलावलीं न बध्नाति ॥ ४९६*६ ॥

496*7) [ जारश्मशानसमुद्भवभूतिसुखस्पर्शस्वेदनशीलाङ्ग्याः । न समाप्यते नवकामातुराया उद्धूलनारम्भः ॥ ] नवकामातुरायाः स्वच्छन्द-चारिण्या उध्दूलनारम्भो न समाप्यते । न पर्याप्तो भवति । किंविशिष्टाया नवकामातुरायाः । जारश्मशानसमुद्भवभूतिसुखस्पर्शशय्यारंगितायाः ( ? ) । जारस्य श्मशानं जारश्मशानम् । जारश्मशानात् समुद्भवा या भूतिः, तस्याः सुखस्पर्शनशय्यया रंगितायाः ( ? ) ॥ ४९६*७ ॥

496*8) [ बहले तमोऽन्धकारे रमितप्रमुक्तयोः श्वश्रूस्नुषयोः । सममेव संगतौ ( मिलितौ ) द्वयोरपि.......( ? ) हस्तौ ॥ ] द्वाभ्यां

1 Cf. Dhvanyāloka II.32 and Kāvyaprakāśa V..45

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



496*9) संपत्तिया वि खज्जइ पत्तच्छेयम्मि, मामि को दोसो।
निययवई वि रमिज्जइ परपुरिसविवज्जिए गामे ॥ ९ ॥

496*10) रच्छातुलग्गवडिओ न लत्तो जं जणस्स भीयाए।
सो चेय विरहडाहो अज्ज वि हियए छमच्छमइ ॥ १० ॥

496*11) अच्छीहि तेण भणियं मए वि हियएण तस्स पडिवन्नं।
जा पत्तियं पि जायं घुणक्खुणियं ता हयग्गामे ॥ ११ ॥

496*12) सिंचंतो वि मियंको जोण्हासलिलेण पंकयवणाइं।
तह वि अणिट्ठयरो च्चिय, सकलंको कस्स पडिहाइ ॥१२॥

समकालमेव सारद्दहे (?) हस्तौ अब्भिडिया अवलम्बितौ इत्यर्थः। किंविशिष्टयोर्द्वयोः। बहले तमसोऽन्धकारे रत्वा (? रमित्वा) प्रसुप्तयोः। पुनः किंविशिष्टयोः। श्वाससोष्णयोः (?) ॥ ४९६*८ ॥

496*9) [ पिप्पलीपत्रमपि खाद्यते पत्रच्छेदे, सखि को दोषः। निजकपतिरपि रम्यते परपुरुषविवर्जिते ग्रामे ॥ ] हे मामि हे सखि, पत्रच्छेदे नागवल्लीदलरहिते समये संपत्तिया अपि खाद्यते। अत्र को दोषः। परपुरुषविवर्जिते ग्रामे निजपतिना सह रम्यते ॥ ४९६*९ ॥

496*10) [ रथ्यायदृच्छापतितो नालपितो यज्जनस्य भीतया। स चैव विरहदाहो अद्यापि हृदये छमच्छायते (प्रज्वलति) ॥ ] हे सखि जारो रथ्यातुलाग्रपतितो मया नालापितो यत्। कया। जनस्य भीत्या। स चैव विरहदाघो अद्यापि हृदि छमच्छमइ अद्यापि प्रज्वलति हृदयदाघः ॥ ४९६*१० ॥

496*11) [ अक्षिभ्यां तेन भणितं मयापि हृदयेन तस्य प्रतिपन्नम्। यावत् प्रतीतमपि जातं कर्णोपकर्णिकया प्रकटितं तावद् हतग्रामे ॥] पुनरसती इति प्राह। तेन पुरुषेण अक्षिभ्यां भणितम्। मयापि हृदयेन तस्य परपुरुषस्य प्रतिपन्नम्। यावत् प्रतीतं जातम् उभयोरपि मनोमानितं तावद् हताशग्रामे घुणक्खुणियं लोके नियतिः (?) जाता ॥ ४९६*११ ॥

496*12) [ सिञ्चन्नपि मृगाङ्को ज्योत्स्नासलिलेन पङ्कजवनानि। तथाप्यनिष्टतर एव, सकलङ्कः कस्य प्रतिभाति ॥ ] मृगाङ्कश्चन्द्रस्तथाप्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



496•13) अत्ता जाणइ सुण्हं सुण्हा जाणेइ अत्तचरियाइं ।
वच्चउ सुहेण कालो मा फुट्टउ बिल्ल बिल्लेण ॥ १३ ॥

496•14) पढमं चिय मह रेहा असईमज्झम्मि उब्भिओ हत्थो ।
सरणामि तुज्झ पाया सुरसरि दूयत्तणं कुणइ ॥ १४ ॥

जोइसियवज्जा ।

507•1) सीसेण कह न कीरइ निउंबणं मामि तस्स गणयस्स ।
असमत्तसुक्कसंकमणवेयणा जेण मह मुणिया ॥ १ ॥

---

निष्ठतर एव विरूप एव, निन्द्य एव । किं कुर्वन् । ज्योत्स्नासलिलेन पङ्कजवनान्यभिषिञ्चन्नपि । तदा कथमनिष्ठतरः । सकलङ्कः प्राणी कस्य प्रतिभाति कस्य मानसोल्लासं कुरुते ॥ ४९६•१२ ॥

496•13) [श्वश्रूर्जानाति स्नुषां स्नुषा जानाति श्वश्रूचरितानि । व्रजतु सुखेन कालो मा स्फुटतु बिल्वं बिल्वेन ॥] असती श्वश्रूं प्रति वक्ति । हे श्वश्रु अत्ता श्वश्रूः स्नुषां वधूं जानाति । स्नुषा वधूः अत्तचरियाइं श्वश्रूचरितानि जानाति । तस्मात् कारणात् सुखेन कालो व्रजतु । बिल्वं बिल्वीफलम् आस्फाल्य मा स्फुटतु ॥ ४९६•१३ ॥

496•14) [ प्रथमं चैव मम रेखा असतीमध्ये ऊर्ध्वितो हस्तः । शरणयामि तव पादौ सुरसरिद् दूतत्वं करोति ॥ ] पुनरपि असती वक्ति । असतीनां मध्ये प्रथमैव ( मम ) रेखा । अतः कारणात् ऊर्ध्वितो हस्तः । हे उपपते, तव पादौ सरणामि शरणं गच्छामि । यतः कारणात् मम दूतत्वं सुरसरित् कुरुते । को भावः । उपपतिना प्रहितानि नद्याः प्रवाहे नागवल्ली-दलानि समायातानि । अतः कारणात् मया समा कापि नास्ति ॥ ४९६•१४ ॥

507•1)[ शीर्षेण कथं न क्रियते निकुंबनं(?) सखि तस्य गणकस्य । असमाप्तशुक्रसंक्रमणवेदना येन मम ज्ञाता ॥ ] हे मामि हे सखि, तस्य गणकस्य शीर्षेण निकुंबनं( ? ) कथं न क्रियते । येन गणकेन असमाप्त-शुक्रसंक्रमणवेदना मम ज्ञाता ॥ ५०१•१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



### धम्मियवज्जा।

532*1) धुत्तीरएण धम्मिय जो होइ चडाविएण एक्केण।
सो कुरयाण सएण वि न होइ लिंगस्स परिओसो ॥ १ ॥

532*2) धम्मिय धम्मो सुव्वइ दाणेण तवेण तित्थजत्ताए।
तरुणतरुपल्लवुल्लूरणेण धम्मो कहिं दिट्ठो ॥ २ ॥

### बालासंवरणवज्जा।

551*1) तोलिज्जंते न केण वि सव्वंगायारगोवणसमत्था।
अन्नं उण हिययतुलाइ दिट्ठ च्चिय तुलंति ॥ १ ॥

### कुट्टिणीसिक्खावज्जा।

559*1) पज्झरणं रोमंचो वयणे सच्चं सया महादिट्ठी।
एयं पुणो वि सिक्खसु मुद्धे अत्थक्कविन्नाणं ॥ १ ॥

---

532*1) [ धत्तूरकेण ( धूर्तरितेन ) धार्मिक यो भवति उपरि स्थापितेन एकेन। स कुरबकाणां शतेनापि न भवति लिङ्गस्य परितोषः ॥ ] हे धार्मिक, एकेनापि धत्तूरकेण लिङ्गस्य चडापितेन या शोभा (? यः परितोषः ) भवति, स परितोषः कुरबकाणां शतेनापि लिङ्गस्य न भवति। अन्यच्च। हे धार्मिक., यः परितोषः एकेनापि धूर्तरितेन भवति, स परितोषः कुरतानां शतेनापि न भवति॥ ५३२*१ ॥

532*2) [ धार्मिक धर्मः श्रूयते दानेन तपसा तीर्थयात्रया। तरुणतरुपल्लवोच्छेदनेन धर्मः कुत्र दृष्टः ॥ ] हे धार्मिक, धर्मो दानेन तपसा तीर्थयात्रया श्रूयते। तरुणतरुपल्लवुल्लूरणेण न धर्मः क्वापि दृष्टः। तरुणतरूणां पल्लवास्तरुणतरुपल्लवाः। तेषाम् उल्लूरणं भञ्जनं, तेन ॥५३२*२॥

551*1) [ तोल्यन्ते न केनापि सर्वाङ्गाकारगोपनसमर्थाः। अन्यं पुनर्हृदयतुलया दृष्टमेव तोलयन्ति ॥ ] सर्वाङ्गाकारगोपनसमर्था मनुष्याः केनापि नोत्तोल्यन्ते। हृदयतुलायां पुनरन्यं दृष्टमेव तुलयन्ति ॥ ५५१*१ ॥

559*1) [ प्रक्षरणं रोमाञ्चो वदने सत्यं सदा महादृष्टिः। एतत् पुनरपि शिक्षस्व मुग्धे अश्रान्तविज्ञानम् ॥ ] हे मुग्धे, एतत् पुनः शिक्षस्व।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



559*2) करफंसमलणचुंबणपीलणणिहणाइ हरिसवयणेहिं ।
अत्ता मायंदणिहीण किं पि कुमरीउ सिक्खवइ ॥ २ ॥

## वेसावज्जा ।

578*1) अमुणियजम्मुप्पत्ती सव्वगया बहुभुयंगपरिमलिया ।
मयणविणासणसीला हरो व्व वेसा सुहं देउ ॥ १ ॥

578*2) सव्वंगरागरत्तं दंसइ कणवीरकुसुमसारिच्छं ।
गब्भे कह वि न रत्तं वेसाहिययं तह च्चेव ॥ २ ॥

---

किंविशिष्टमेतत् । अत्थक्कविन्नाणं अश्रान्तविज्ञानम् । किं तत् । प्रक्षरणं निर्मल्ता (?)। पुनः किम् । रोमाञ्चः । वदने सत्यम् । सया महादिट्ठी उज्ज्वला महादृक् ॥ ५५९*१ ॥

559*2) [ करस्पर्शमर्दनचुम्बनपीडननिहननानि हर्षवचनैः । आर्या माकन्दनिधीन् किमपि कुमारीः शिक्षयति ॥ ] अस्या गाथायाः टीका न कृतास्ति । कूटत्वात् ॥ ५५९*२ ॥

578*1) [ अज्ञातजन्मोत्पत्तिः सर्वगता बहुभुजङ्गपरिमृदिता । मदनविनाशनशीला हर इव वेश्या सुखं ददातु ॥ ] वेश्या सुखं ददातु । किंविशिष्टा । अज्ञातजन्मोत्पत्तिः । पुनः कथंभूता । सर्वगता । पुनरपि कथंभूता । बहुभुजङ्गपरिमृदिता । पुनरपि किंविशिष्टा । मदनविनाशनशीला । वेश्या क इव । हर इव । किंविशिष्टो हरः । अज्ञाता जन्मोत्पत्तिर्यस्य । पुनः किंविशिष्टः हरः । सर्वगतः । क्षितिजलपवनहुताशनव्योमसोमसूर्ययजमानाख्या (?) इति ज्ञायते सर्वव्यापकः । पुनरपि किंविशिष्टः । बहुभुजङ्गपरिमृदितः । बहुभिर्भुजङ्गैः परिमृदितः । पुनरपि किंविशिष्टः । मदनविनाशनशीलः । मदनस्य विनाशे शीलः (!) तत्परः, मदनविनाशनशीलः ॥ ५७८*१ ॥

578*2) [ सर्वाङ्गरागरक्तं दर्शयति करवीरकुसुमसादृश्यम् । गर्भे कथमपि न रक्तं वेश्याहृदयं तथा चैव ॥ ] वेश्याहृदयं यथा करवीरकुसुमं तथैव । किंविशिष्टं करवीरकुसुमम् । सर्वाङ्गरागरक्तं दर्शयति । गर्भम् अन्तर्हृदये क्वापि न रक्तम् । तथैव वेश्याहृदयम् ॥ ५७८*२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कण्हवज्जा ।

605*1) उव्वूढभुवणभारो वि केसवो थणहरेण राहाए ।
मालइदल व्व कलिओ लहुइज्जइ को न पेम्मेण ॥ १ ॥

605*2) तह रुण्णं तीइ तडट्ठियाइ राहाइ कण्हविरहम्मि ।
जह से कज्जलमइलं अज्ज वि जउणाजलं वहइ ॥ २ ॥

छियालीवज्जा ।

624*1) छीए जीव न भणियं परियणमज्झम्मि पोढमहिलाए ।
छोडेइ चिहुरभारं पुण बद्धं केण कज्जेण ॥ १ ॥

624*2) कुलबालिया पसूया पुत्तवई सुरयकज्जतल्लिच्छा ।
एरिसगुणसंपन्ना भण कीस न वासिया पत्ता ॥ २ ॥

605*1) [ उदव्यूढभुवनभारोऽपि केशवः स्तनभरेण राधायाः । मालतीदलमिव कलितो लघूक्रियते को न प्रेम्णा ॥ ] केशवो नारायणो राधया स्तनभरेण मालतीदल इव कलितः । उच्चैरुत्पाटितः ( ? ) । किंविशिष्टो हरिः । उदूढभुवनभारोऽपि । कोऽर्थः । उदूढः त्रिभुवनस्य भारो येन स तथा । योऽसौ उदूढभुवनभारः स राधया स्तनभरेण मालतीदल इव कथं कलितः । तत्र कारणमाह कविः । प्रेम्णा स्नेहेन को न लघूक्रियते । सर्वोऽपि जनो मोहेन लघुर्भवति ॥ ६०५*१॥

605*2) [ तथा रुदितं तया तटस्थितया राधया कृष्णविरहे । यथास्याः कज्जलमलिनम् अद्यापि यमुनाजलं वहति ॥ ] राधया तटस्थितया यमुनातीरस्थितया कृष्णविरहे तया तथा रुदितं, यथा सा यमुना अद्यापि कज्जलमलिनं जलं वहति ॥ ६०५*२ ॥

624*1) [ क्षुते जीव न भणितं परिजनमध्ये प्रौढमहिलया । मोचयति चिकुरभारं पुनर्बद्धं केन कार्येण ॥ ] प्रौढमहिलया छिक्कत् ( क्षुवत् ) परिजनमध्ये जीव इति न भणितम् । लज्जावशात् । चिकुरभारं छोटयति केन कारणेन पुनः बद्धम् । भावोऽस्याः । यावन्ति मस्तके रोमाणि वर्तन्ते तावन्ति वर्षाणि जीव ॥ ६२४*१ ॥

624*2) [ कुलबालिका प्रसूता पुत्रवती सुरतकार्यतत्परा । ईदृशगुणसंपन्ना भण कस्मान्न वासिता पत्या ॥ ] भण कथय । पत्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



624*3) कस्स कएण किसोयरि वरणयरं वहसि उत्तमंगेणं।
कण्णेण कण्णवहणं वाणरसंखं च हत्थेण ॥ ३ ॥

वसंतवज्जा।

637*1) लंकालएण रत्तंबरवेसिण दिन्नपुप्फयाणेण।
दहवयणेणेव कयं सीयाहरणं पलासेण ॥ १ ॥

---

कुलबालिका कस्मात् न वासिता। वासो न वितेरे। किंविशिष्टा कुलबालिका। प्रसूता। पुनः किंविशिष्टा। पुत्रसहिता। पुनः किंविशिष्टा। सुरतकार्यतत्परा। पुनः किंविशिष्टा। ईदृशगुणसंपूर्णा। अयं भावः। पुत्रस्य कृपया (?) ॥ ६२४*२ ॥

624*3) कस्य कृते कृशोदरि वरनगरं (वर्णकरं) वहसि उत्तमाङ्गेन। कर्णेन कर्णवहनं वानरसंख्यं च हस्तेन ॥] हे कृशोदरि, कस्य कृते उत्तमाङ्गेन वरनगरं वहसि। कोऽप्युत्तमाङ्गेन वरनगरं वहति? अपि तु न। अत्र भावः। हे कृशोदरि कस्य कृते वर्णकरं वहसि। वर्णकरं चित्रवल्लरीमण्डनम्। कर्णेन कर्णवहनं (?) कस्य कृते वहसि। चान्यत्। वानरसंख्यं (?) कस्य कृते वहसि। पत्युः कृते। अयं भावः ॥ ६२४*३॥

637*1) [ लङ्कालयेन रक्ताम्बरवेषिणा दत्तपुष्पयानेन। दशवदनेनेव कृतं शीताहरणं (सीताहरणं) पलाशेन ॥] पलाशेन वृक्षेण शीतस्य आ समन्ताद्भावेन हरणं कृतम्। किंविशिष्टेन पलाशेन। अलंकारकेण। अक्षरच्युतकलक्षणेन। अलम् अत्यर्थं कालकेन कालकिसलयेन। पुनः किंविशिष्टेन। रत्तंबरवेसिणा। रक्तमम्बरम् आकाशं रक्ताम्बरं, तद्द्वेषो यस्यास्तीति रक्ताम्बरवेषी। तेन रक्ताम्बरवेषिणा। पुनः किंविशिष्टेन। दिन्नपुप्फयाणेण। दत्तं पुष्पस्य यानं येन स दत्तपुष्पयानः। तेन। पलाशेन केन इव। दशवदनेनेव। यथा दशवदनेन सीताहरणं कृतम्। किंविशिष्टेन दशवदनेन। लङ्कालयेन। लङ्कायाम् आलयं यस्यासौ लङ्कालयस्तेन लङ्कालयेन। पुनः किंविशिष्टेन। रत्तंबरवेसिणा। रक्तं च तदम्बरं च रक्ताम्बरम्। रक्ताम्बरस्य वेषो यस्यासौ रक्ताम्बरवेषी, तेन रक्ताम्बरवेषिणा।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



641*1) गुरुविरहसंधिविग्गहणिम्मवणो अत्थि को वि जइ मत्तो।
पढमिक्कमंजरिं अंगुलिं व उब्भेइ सहयारो ॥ १ ॥

641*2) चंचुपुडकोडिवियलियमायंदरसोहसित्तदेहस्स।
कीरस्स मग्गलग्गं भमरउलं भमइ गंधड्ढं ॥ २ ॥

641*3) सच्चं चेव पलासो असइ पलं विरहियाण महुमासे।
तिंत्ति अवच्चमाणो जलइ व्व छुहाइ सव्वंगं ॥ ३ ॥

---

पुनः किंविशिष्टेन। दिन्नपुष्फयाणेण। दत्तं पुष्पकं नाम विमानं येन स दत्तपुष्पकविमानः, तेन। एवंविधेन दशवदनेन सीताहरणं कृतम् ॥ ६३७*१ ॥

641*1) [ गुरुविरहसंधिविग्रहनिर्माता अस्ति कोऽपि यदि मत्तः। प्रथमैकमञ्जरीमङ्गुलिमिव ऊर्ध्वयति सहकारः ॥ ] सहकारः प्रथमैकमञ्जरीम् ऊर्ध्वयति। कामिव। अङ्गुलिमिव। यथा कश्चिदङ्गुलिम् ऊर्ध्वयति। यदि चेत् मत्तः कोऽपि गुरुविरहसंधिविग्रहनिर्माणकरणे समर्थः कोऽप्यस्ति। अपि तु कोऽपि नास्ति। अहं गुरुविरहिणां संधिविग्रहनिर्माणं कर्तुं क्षमः। मत्तः कोऽपि अपरो नास्ति, अतः कारणात् मञ्जरीमिषाद् अङ्गुलिं दर्शयति ॥ ६४१*१ ॥

641*2) [चञ्चूपुटकोटिविगलितमाकन्दरसौघसिक्तदेहस्य। कीरस्य मार्गलग्नं भ्रमरकुलं भ्रमति गन्धाढ्यम् ॥] कीरस्य शुकस्य मार्गलग्नं सद् भ्रमरकुलं मधुकरसमूहः परिभ्रमति। कथंभूतं भ्रमरकुलम्। गन्धाढ्यम्। किंविशिष्टस्य कीरस्य। चञ्चुपुटकोटिविगलितमाकन्दरसौघसिक्तदेहस्य। चञ्चुपुटस्य कोटिरग्रविभागः। तत्र विगलितमाकन्दरसस्य ओघेन सिक्तो देहो यस्य स तथा। तस्य ॥ ६४१*२ ॥

641*3) [ सत्यं चैव पलाशोऽश्नाति पलं विरहिणां मधुमासे। तृप्तिम् अव्रजन् ज्वलतीव क्षुधया सर्वाङ्गम् ॥] मधुमासः सत्यं चैव पलाशः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



641*4) सुहियाण सुहंजणया दुक्खंजणया य दुक्खियजणस्स ।
एए सोहंजणया सोहंजणया वसंतस्स ॥ ४ ॥

पाउसवज्जा ।

652*1) विज्जुभुयंगमसहियं चवलबलायाकवालकयसोहं ।
गज्जियफुडट्टहासं भइरवरूवं नहं जायं ॥ १ ॥

---

कथम् । विरहिणां पलं मांसम् अश्नाति । किंविशिष्टो मधुमासः । तृप्तिम् अव्रजन् । किम् इव । जलमिव (?) । यथा क्षुधा-( ? सुधा )दीप्त-सर्वाङ्गो जलात् तृप्तिं न प्राप्नोति, तथा अयं मधुमासो विरहिणां पलम् अश्नन् सन् तृप्तिं न व्रजति ॥ ६४१*३ ॥

641*4) [ सुखितानां सुखजनका दुःखजनकाश्च दुःखितजनस्य । एते शोभंजनकाः शोभाजनका वसन्तस्य ॥ ] एते शोभंजनका वसन्तस्य शोभाजनका वर्तन्ते । कथम् । सुखितानां सुखजनका वर्तन्ते । दुःखित-जनस्य दुःखजनका वर्तन्ते ॥ ६४१*४ ॥

652*1) [ विद्युद्भुजंगमसहितं चपलबलाकाकपालकृतशोभम् । गर्जितस्फुटाट्टहासं भैरवरूपं नभो जातम् ॥ ] नभ आकाशं भैरवरूपं जातम् । किंविशिष्टम् । विद्युद्भुजंगमसहितम् । पुनः किंविशिष्टम् । चपलबलाकाकपालसंयुक्तम् । यत्र भैरवो भवति तत्र कपालमपि विलोक्यते । पुनः किंविशिष्टम् । गर्जितस्फुटाट्टहासम् । भैरवः स्फुटाट्टहासं करोति ॥ ६५२*१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# VAJJĀLAGGAṂ

## ENGLISH TRANSLATION

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## Prologue

1) Having saluted the Goddess of learning, residing in the lotus of the mouth of the Omniscient One (the Jina), I shall proclaim the excellent utterances of wise people, connected with the three objects of human existence, Dharma (virtue) etc.

2) Those who do not know how to recite and hear (appreciate) Prākrit poetry which is (like) nectar (itself)-- how do they not feel abashed (embarassed) while pretending to carry on gossip about the nature of love?

3) Having gathered excellent groups of *gāthās* (stanzas) composed by different poets, this *Vajjālagga* (also) called *Jaya-vallabha*, has been composed (compiled) (by me) according to a certain plan and system.

4) Where several *gāthās* (stanzas) are recited, dealing with a matter (topic) having one single idea running through, that indeed is *vajjālagga*, and *vajjā* is said to be (i.e. means or signifies) a line (row, succession or series) (*paddhati*).

